CC-0. In Public Domain. Digitization by eGangotri

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालाया द्वाचत्वारिंशं पुष्पम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य संस्कृतभाषाप्रशिक्षणविषयकपाठ्यक्रमे निर्धारितः

संस्कृतशिक्षणाभ्यासः

{ द्वितीयो भागः }

रचयिता

प्रा. नीलमणिढुङ्गानाः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालाया द्वाचत्वारिंशं पुष्पम्

संस्कृतशिक्षणाभ्यासः

{ संस्कृत-नेपालीटीकासहितो द्वितीयो भागः }

रचयिता

प्रा. नीलमणिढुङ्गानाः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुण्डी, दाङ

प्रकाशनम्
प्रथमसंस्करणम् - २०५३
द्वितीयसंस्करणम् - २०५७

प्रकाशितपुस्तकानि - २००० प्रतिरूपाणि

मूल्यम् - रू. ७५।-

कम्प्यूटरटङ्कणम्
क्वालिटी लेजर प्रिन्ट, बागबजार,
दूरभाषसङ्ख्या (फोन नं.) २४२६५६

मुद्रकः
नेपाल प्रिन्टर्स एण्ड ट्रेडर्स सहकारी लिमिटेड
फोन : ४२७४५६, ४१७६७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्मतिः

महेन्द्रसंस्कृतविश्वविद्यालयस्य संस्कृतभाषाप्रशिक्षणपाठ्यक्रमे निर्धारितान् पाठ्यविषयान् विविधेभ्यो ग्रन्थेभ्यः सङ्गृह्य नूतनया पद्धत्या व्यवस्थाप्य च रचितो व्युत्पादनसहयोगिभिर्विषयैः समवेतः संस्कृतशिक्षणाभ्यासस्य द्वितीयो भागो द्वितीयसंस्करणतया प्रकाश्यत इति प्राज्ञिकोत्कर्षद्योतकोऽयं विषयः ।

संस्कृतभाषाया व्याकरणं परमरमणीयं विस्तृतं वैज्ञानिकञ्च विलसति. परमधुना प्रचलितायाः पाठनपद्धतेर्दोषात्तत् सरसमपि नीरसं मृदुलमपि कर्कशं रुचिसंवर्धनपरमपि, अरुचिविधायकं प्रतिभाति । स्वल्पेनैव कालेन स्तोकेनैवायासेन संस्कृतभाषामधिगन्तुकामानां छात्राणां कृते तथाविधाभ्यासप्रधानग्रन्थानां न्यूनत्वमपि वर्तते वैरस्योत्पादनस्य कारणम् । संस्कृतभाषाशिक्षणे शिक्षकाणां सोत्साहायाः प्रवृत्तेरल्पत्वस्य चायमेव विद्यते हेतुः । अत एव शिक्षाध्यक्षपदभारवहनकालत एव मया स्तरानुकूलान् पाठ्यग्रन्थान् सहायकग्रन्थान् सन्दर्भग्रन्थाँश्च नवीन-पद्धत्या प्रणेतुम्, दुर्बोधग्रन्थानां ससमीक्षं टीकाऽनुवादादिकं विधातुञ्च संबद्ध-विषयविशेषज्ञा अभिप्रेरणीया इति सङ्कल्प्य तत्कार्याणि संपादयितुं विद्वांसः प्रवर्तिताः। तेषु कैश्चन विश्वविद्यालयस्य प्राज्ञिकोत्कर्षमेव निजोत्कर्षं मन्यमानै-र्नवीनपद्धत्युद्भावनकुशालान्तःकरणैः क्रियावद्भिः प्राध्यापकैः कानिचिद् ग्रन्थ-रत्नानि प्रणीय समुपस्थापितानि । पाठ्यक्रमे निर्धारितानां विषयाणां शिक्षणाया-नुकूलानि तानि निभाल्य सांप्रतं परमानन्दसन्दोहं बिभर्ति मदीयं चेतः ।

एतादृशैः कार्यजातैः छात्राणां सुशिक्षणाय, तेषु प्राज्ञिकोत्कर्षाधानाय च विशिष्टः सहयोगः संपत्स्यते, इत्यस्मिन् विषये नास्ति किमपि वक्तव्यम् । अनयैव रीत्या पाठ्यविषयसंबद्धानामन्येषामपि ग्रन्थानां प्रणयने विदुषां प्रवर्तना स्यादिति साभिनिवेशाऽभ्यर्थना मच्चेतसि सुतरां समुच्छलति ।

सन्दर्भेऽस्मिन् ग्रन्थलेखनाध्ययनाध्यापनानुसन्धानप्रशिक्षणप्रकाशनादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यजातैः प्रकाण्डपाण्डित्यपेशलानामखिलशास्त्रपारदृश्वानां मेधावतां विदुषाम्, संस्कृतवाङ्मयार्णवालोडनकुशलानां गवेषकाणाम्, भाषाम्भोनिधिमन्थनमन्दरायमाणानां भाषावैज्ञानिकानाम्, नैकविधकाव्यप्रणयनचञ्चुराणां प्रतिभावतां कवीनाम्, विविधसंस्कृतिसाहित्यानुशीलनपराणां भावकानाञ्च समुत्पादनाय महेन्द्रसंस्कृतविश्वविद्यालयः सदैव प्राध्यापकवर्याणां विदुषामवदानमपेक्षत इति निवेदयितुञ्च मदन्तःकरणं मुखरयति माम् ।

पर्यन्ते चास्य विश्वविद्यालयस्य कार्यक्रमानुसारेण विविधग्रन्थेष्वाकीर्णान् विषयान् सङ्कलय्य नूतनपद्धत्या व्यवस्थापितमभ्यासप्रधानं संस्कृतव्युत्पत्तिशिक्षणोन्मुखं संस्कृतशिक्षणाभ्यासस्य द्वितीयभागं परिष्कृत्य संशोध्य च प्रकाशनाय प्रस्तुतवते प्राध्यापकाय श्रीनीलमणिढुङ्गानामहोदयाय सहर्षं धन्यवादं प्रयच्छन्निहैव विरमामि शब्दैरेभिरहम् ।

अक्षयतृतीया, २०५७

माधवराजगौतमः
उपकुलपतिः
महेन्द्रसंस्कृतविश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकीयम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमे निर्धारितान् विषयानवलम्ब्य नवीन-पद्धत्या प्रणीतानां पाठ्यपुस्तकानां सहायकपुस्तकानां सन्दर्भपुस्तकानाञ्च प्रकाशनविधौ विश्वविद्यालयोऽयमग्रेसरो विद्यत इति सामोदमावेदयामि पाठकानां पुरतः।

प्रवेशिकापरीक्षां समुत्तीर्य संस्कृतभाषाशिक्षणार्थं प्रविष्टानां छात्राणां सहयोगार्थं प्रा. नीलमणिढुङ्गानामहोदयनिर्मितस्य संस्कृतशिक्षणाभ्यासस्य द्वितीयो भागः सम्प्रति परिष्कारपरिवर्धनपुरस्सरं द्वितीयसंस्करणतया प्रकाश्यते । अनेनच्छात्रा लाभान्विता भविष्यन्तीति अस्माकं विश्वासः । संस्कृतभाषामल्पेन कालेन स्तोकेनायासेन च ज्ञातुमभि-लषतश्छात्रान् सरलया पद्धत्या शिक्षयितुं ग्रन्थोऽयं नितरामुपयोगी भवेदित्यपि विश्वसिमः। पाठयोजनायामाबद्धस्य ग्रन्थस्यास्य भूयोभूयोऽभ्यासेनच्छात्राः संस्कृतभाषायां भावा-भिव्यक्तौ वाक्यरचनायां निबन्धरचनायाञ्च सामर्थ्यमधिगमिष्यन्तीति नूनम् ।

निरन्तरं सद्ग्रन्थप्रणयनसम्पादनप्रकाशनादिकार्येषु प्रेरणां प्रोत्साहनञ्च प्रदाय मार्गदर्शनं कुर्वद्भ्यो महेन्द्रसंस्कृतविश्वविद्यालयस्य उपकुलपतिपदमलङ्कुर्वद्भ्यः श्रीमाधवराजगौतममहाभागेभ्यो हार्दिकीं कृतज्ञतां समर्पयामि । अस्य ग्रन्थस्य महताध्यव-सायेन प्रणयनं विधाय छात्राणामुपकारविधौ दत्तचेतसे विदुषे प्रा. श्रीनीलमणिढुङ्गाना-महोदयाय साधुवादं प्रयच्छामि ।

पुनश्च सुन्दरकम्प्यूटरटङ्कणकारिणे बागबजारस्थ-क्वालिटीलेजरप्रिन्ट-संस्थानाय, सुरुचिरमुद्रणविधायिने डिल्लीबजारस्य नेपालप्रिन्टर्सएण्डको-अपरेटिभलिमिटेडाख्य-संस्थानाय च धन्यवादं प्रदायान्येभ्यश्च संबद्धसहयोगिभ्यः धन्यवादं वितराम्यहम् ।

प्रा.डा. वावुरामपोख्रेलः
शिक्षाध्यक्षः
महेन्द्रसंस्कृतविश्वविद्यालयः

अक्षयतृतीया, २०५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदनं किमपि

महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यग्रन्थलेखनसम्बद्धं नियमितपत्रमनुसृत्य संस्कृतभाषाप्रशिक्षणकार्यक्रमे निर्धारितानां संस्कृतरचनाविषयसंबद्धानां पाठ्यांशानां सङ्कलनं विधाय पाठयोजनानुरूपं व्यवस्थाप्य च प्रणीतस्याभ्यासबहुलस्य संस्कृत-शिक्षणाभ्यासस्य व्युत्पत्तिशिक्षणोन्मुखः द्वितीयभागो द्वितीयसंस्करणतया प्रकाश्य-मानोऽस्तीति संबद्धच्छात्राणाम्, संस्कृतभाषामधिगन्तुकामानाञ्च परमसन्तोषावहोऽयं विषयः।

नीतिकथानां नीतिपद्यानाञ्च माध्यमेन व्युत्पत्तेः शिक्षणाय प्रणीतोऽयं द्वितीयोभागः। अत्र छात्राणामध्ययनसौकर्याय संस्कृतपर्यायशब्दैर्नेपालीभाषायामर्थोऽपि सहैव प्रदत्तः। संस्कृतशब्दानां नेपालीभाषायामनुवादकार्यं संस्कृतनेपालीभाषाप्रकृत्योर्मौलिकभेदहेतोः प्रायः कठिनं भवतीति जानन्ति विद्वांसः। तादृशस्थलेषु मया भावग्राहिता अङ्गीकृता वर्तते।

पर्यन्ते च संस्कृतरचनाविषयशिक्षणे छात्राणां काठिन्यमनुभूय भूयो भूयो ग्रन्थलेखने प्रेरयद्भ्य उपकुलपतिपदविभूषितेभ्यः श्रीमाधवराजगौतममहाभागेभ्यो हार्दिकीं कृतज्ञतां ज्ञापयामि। ग्रन्थलेखनकर्मणि सहयोगं कुर्वते शिक्षाध्यक्षपदालङ्कृताय प्रा.डा. वावुरामपोखे्रलमहाभागाय, कुलसचिवपदमण्डिताय डा. भोजराजपन्तमहाभागाय च निजां कृतज्ञतां व्यनज्मि। अस्य ग्रन्थस्य स्वरूपसम्पादने सहयोगं विदधते प्रा.डा.वेणीमाधवढकालमहोदयाय च कृतज्ञतां प्रकाशयामि सहर्षमहम्।

पुनश्च ग्रन्थस्य स्वरूपसम्पादने सहयोगिनो मित्रजनान् बन्धुजनाँश्च साधुवादेन सभाजयित्वा सुन्दरकम्प्यूटरटङ्कणकारिणे क्वालिटीलेजरप्रिन्ट-संस्थानाय कलात्मक-मुद्रणकारिणे नेपालप्रिन्टर्सएण्डकोअपरेटिभलिमिटेडनाम्ने मुद्रणालयाय च धन्यवाद-वचनानि वितीर्य भ्रमप्रमादादिसमुद्भवानां त्रुटीनां कृते पाठकसन्निधौ क्षमां याचमानोऽत्रैव विरमत्यसौ जनः।

अक्षयतृतीया, २०५७ — प्रा. नीलमणिढुङ्गानाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयसूची

पाठाः	विषयाः	पृष्ठसङ्ख्याः
प्रथमः पाठः	चित्रग्रीव-हिरण्यककथा - १	१
द्वितीयः पाठः	चित्रग्रीव-हिरण्यककथा - २	६
तृतीयः पाठः	वृद्धव्याघ्र-लुब्धपथिककथा-१	११
चतुर्थः पाठः	वृद्धव्याघ्र-लुब्धपथिककथा-२	१५
पञ्चमः पाठः	वृद्धव्याघ्र-लुब्धपथिककथा-३	१९
षष्ठः पाठः	चित्रग्रीवहिरण्यककथा - ३	२४
सप्तमः पाठः	चित्रग्रीव-हिरण्यककथा - ४	२८
अष्टमः पाठः	चित्रग्रीव-हिरण्यककथा - ५	३२
नवमः पाठः	लघुपतनक-हिरण्यककथा - १	३८
दशमः पाठः	चित्राङ्ग-सुबुद्धि-क्षुद्रबुद्धिकथा-१	४१
एकादशः पाठः	चित्राङ्ग-सुबुद्धि-क्षुद्रबुद्धिकथा-२	४६
द्वादशः पाठः	चित्राङ्ग-सुबुद्धि-क्षुद्रबुद्धिकथा-३	४९
त्रयोदशः पाठः	जरद्गव-दीर्घकर्णकथा-१	५३
चतुर्दशः पाठः	जरद्गव-दीर्घकर्णकथा-२	५९
पञ्चदशः पाठः	चूडाकर्ण-वीणाकर्णकथा	६२
षोडशः पाठः	भैरवव्याध-दीर्घरावजम्बूककथा	६७
सप्तदशः पाठः	कर्पूरतिलक-जम्बूककथा	७१
अष्टादशः पाठः	पद्यगद्यलक्षणं तद्भेदाश्च	७६
ऊनविंशः पाठः	आर्यावृत्तम्	८१
विंशः पाठः	अनुष्टब्वृत्तम् - १	८५
एकविंशः पाठः	अनुष्टब्वृत्तम् - २	८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाविंशः पाठः	अनुष्टब्वृत्तम् - ३	९३
त्रयोविंशः पाठः	अनुष्टब्वृत्तम् - ४	९७
चतुर्विंशः पाठः	अनुष्टब्वृत्तम् - ५	१०३
पञ्चविंशः पाठः	इन्द्रवज्रोपेन्द्रवज्रावृत्ते, उपजातिश्च	१०८
षड्विंशः पाठः	वंशस्थवृत्तम्	११५
सप्तविंशः पाठः	वसन्ततिलकवृत्तम्	११९
अष्टाविंशः पाठः	मालिनीवृत्तम्	१२३
ऊनत्रिंशः पाठः	मन्दाक्रान्तावृत्तम्	१२७
त्रिंशः पाठः	शिखरिणीवृत्तम्	१३१
एकत्रिंशः पाठः	शार्दूलविक्रीडितवृत्तम्	१३३
द्वात्रिंशः पाठः	स्रग्धरावृत्तम्	१३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः

चित्रग्रीव-हिरण्यककथा - १

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति स्म । अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं पाशहस्तं व्याधमवलोक्याचिन्तयत्- 'अद्य

१.१ **गोदावरीतीरे** = भागिरथीतटे (गोदावरी नदीको तीरमा) **विशालः** = महान् (ठूलो) **शाल्मलीतरुः** = शाल्मलीनामा वृक्षः (सिमलको रूख) **अस्ति** = वर्तते (छ) **तत्र** - तस्मिन् वृक्षे (त्यस रूखमा) **नानादिग्देशात्** = विविधदिग्भ्यः, देशेभ्यश्च (अनेक दिशा र देशबाट) **आगत्य** = एत्य (आएर) **रात्रौ** = निशायाम् (रातमा) **पक्षिणः**= खगाः (पक्षीहरू) **निवसन्ति स्म**= वासं कुर्वन्ति स्म (वस्दथे) **अथ** = अनन्तरम् (त्यसपछि) **कदाचिद्** = कस्मिंश्चिद् समये (कुनै समयमा) **रात्रौ** = निशायाम् (रात) **अवसन्नायाम्**= व्यतीतायाम् (वितेपछि) **भगवति** = ऐश्वर्यशालिनि (भगवान्) **कुमुदिनीनायके** = कैरविणीप्रिये (कमलिनीका नायक) **चन्द्रमसि** = विधौ (चन्द्रमा) **अस्ताचलचूडावलम्बिनि** = अस्ताचलशिखरमुपगते (अस्ताचलको शिखरमा पुगेपछि) **प्रबुद्धः** = सुप्तोत्थितः (जागेको) **लघुपतनकनामा** = लघुपतनाभिधः (लघुपतनक नाम गरेको) **वायसः** = काकः (कागले) **द्वितीयम्** = अपरम् (अर्को) **कृतान्तम् इव** = यमराजम् इव (यमराज जस्तै) **आयान्तम्** = आगच्छन्तम् (आउँदै गरेको) **पाशहस्तम्** = करधृतजालम् (हातमा पाशो लिएको) **व्याधम्**= लुब्धकम् (व्याधालाई) **अवलोक्य**= दृष्ट्वा (देखेर) **अचिन्तयत्**= चिन्तितवान् (विचार गऱ्यो) **अद्य**= अस्मिन् दिने (आज) **प्रातः एव**= प्रभाते एव (बिहानै) **अनिष्टदर्शनम्** = अशुभविलोकनम् (अशुभ कुराको दर्शन) **जातम्** = भूतम् (भयो) **न जाने** = न वेद्मि (जान्दिन) **किम्** (के) **अनभिमतम्** = अनिष्टम् (अशुभ) **दर्शयिष्यति**= विलोकयिष्यति (देखाउने छ) **ततः** = चिन्तनानन्तरम् (त्यसपछि) **असौ** = लघुपतनकनामा वायसः (लघुपतनक नाम गरेको काग) **तदनुसरणक्रमेण** = व्याधानुगमनविधिना (व्याधाको हिडाइको अनुसरण गर्दै) **चलितः** = प्रस्थितः (हिड्यो)

१.२ **विग्रहः - गोदावरीतीरे**- गोदावर्याः तीरम् (ष.त.) तस्मिन् । **नानादिग्देशात्**- दिशश्च देशाश्च दिग्देशम् (स.द्व.) नाना च तद् दिग्देशम् (कर्म.) तस्मात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातरेवानिष्टदर्शनञ्ज्ञातम् । न जाने, किमनभिमतं दर्शयिष्यति ।' ततोऽसौ तदनुसरणक्रमेण चलितः ।

अस्ताचलचूडावलम्बिनि- अस्तश्चासौ अचलः (कर्मधा.) अस्ताचलस्य चूडा (ष.त.) ताम् अवलम्बते (उप.त.) तस्मिन्। **कुमुदिनीनायके-** कुमुदिन्याः नायकः (ष.त.) तस्मिन्। **लघुपतनकनामा-** लघुपतनको नाम यस्य सः (बहु.)**अनिष्टदर्शनम्-** न इष्टम् अनिष्टम् (न.त.) तस्य दर्शनम् (ष.त.) तत्। **अनभिमतम्-** न अभिमतम् (न.त.) **तदनुसरणक्रमेण-** तस्य अनुसरणम् (ष.त.) तस्य क्रमः (ष.त.) तेन । **शाल्मलीतरुः** - शाल्मली चाऽसौ तरुः (कर्मधा.) लघुपतनकःनाम यस्य सः (बहु.) । **कृतान्तः** - कृत अन्तः येन तम् । **पाशहस्तम्** - पाशः हस्ते यस्य सः (बहु.) ।

१.३ प्रकृतिप्रत्ययविच्छेदः - आगत्य- आ - गम् + क्त्वा > ल्यप् । **दर्शनम्-** दृश् + ल्युट् > अन । **अवसन्ना-** अव-सद् + क्त-टाप् । **अनुसरणम्-** अनु- सृ + ल्युट्> अन । **अवलोक्य-** अव-लोक् + क्त्वा > ल्यप् । **प्रबुद्धः-** प्र-बुध् + क्त । **द्वितीयः-** द्वि+ तीय । **जातम्-** जन् + क्त । **नायकः** - नी+ण्वुल् > अक । **पक्षी-** पक्ष+ इनि । **विशालः** - वि + शालच्। **निवसन्ति** - नि + वस् + लट् + झि । **भगवति** - भग+ मतुप्। **वायसः** - वयस् + अण् । **द्वितीयः** - द्वि + तीय । **अपश्यत्** - दृश् + लङ् > तिप्। **अचिन्तयत्-** चिन्त+णिच्+लङ् > तिप् । **अद्य, प्रातः-** अव्ययपदे । **जातम्** - जन्+ क्त। **जाने-** ज्ञा+लट् > इट् । **चलितः-** चल+क्त । **दर्शयिष्यति-** दृश्-णिच्+लट् > तिप् ।

१.४ कोषः- तरुः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः, इत्यमरः । **पक्षी-** खगे विहङ्गविहगविङ्गमविहायसाः । शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः, इत्यमरः। **चन्द्रः** - हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदवान्धवः । विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः, इत्यमरः । **वायसः** - काके तु करटारिष्टवलिपुष्टसकृत्प्रजाः । ध्वाङ्क्षात्मघोषपरभृद्वलि- भुग्वायसा अपि, इत्यमरः । **व्याधः** - व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः, इत्यमरः। **कृतान्तः** - कृतान्तो यमुनाभ्राता शमनो यमराड् यमः । धर्मराजः पितृपतिः समवर्ती परेतराट्। कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः, इत्यमरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. **उपरितनगद्यभागमधीत्य निम्नप्रश्नानामुत्तराणि लिखत**

१. शाल्मलीतरुः कुत्र वर्तते ?
२. पक्षिणः कुत्र निवसन्ति ?
३. पक्षिणः कुतः समागताः सन्ति ?
४. वायसः कदा प्रबुद्धः ?
५. कुमुदिनीनायकः कोऽस्ति ?
६. वायसस्य नाम किं वर्तते ?
७. अवसन्नायां रात्रौ चन्द्रः किमकरोत् ?
८. काकः कीदृशं व्याधमपश्यत् ?
९. व्याधं विलोक्य काकः किमचिन्तयत् ?
१०. वायसः कमनुसृत्य चलितवान् ?

२. **पर्यायशब्दान् लिखत ।**

गोदावरीतीरे । विशालः । तरुः । रात्रौ । आगत्य । पक्षिणः । निवसन्ति । कदाचित्। अद्य । चन्द्रः । काकः । प्रबुद्धः । अथ । दर्शयिष्यति । चलितः ।

३. **विग्रहान् प्रदर्श्य समासनामानि च लिखत ।**

गोदावरीतीरे । नानादिग्देशात् । अस्ताचलचूडावलम्बिनि । कुमुदिनीनायके। लघुपतनकनामा । अनिष्टदर्शनम् । अनभिमतम् । तदनुसरणक्रमेण ।

४. **सन्धिविच्छेदं कुरुत ।**

देशादागत्य । पक्षिणो निवसन्ति । रात्रावस्ताचलचूडावलम्बिनि । दर्शनज्ञातम्। अवलोक्याचिन्तयत् । ततोऽसौ । कदाचिदवसन्नायाम् ।

५. **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

आगत्य । दर्शनम् । अवसन्ना । अनुसरणम् । अवलोक्य । प्रबुद्धः। द्वितीयः। जातः । नायकः । पक्षी ।

६. **वाक्येषु प्रयोगं कुरुत ।**

रात्रौ । आगत्य । अवलोक्य । प्रबुद्धः । अद्य । व्याकुलः । अचिन्तयत् । उक्त्वा । अपश्यत् । दर्शयिष्यति । निवसन्ति । द्वितीयः । कदाचित् । अस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७ वाक्यसंश्लेषणं कुरुत ।

१. गोदावरीतीरे तरुः, अस्ति । तस्य नाम शाल्मली वर्तते । तत्र पक्षिणो निवसन्ति। ते दिग्देशादागताः सन्ति ।

२. वायसः प्रबुद्धः । तस्य नाम लघुपतनक आसीत् । स व्याधमपश्यत् । व्याधः कृतान्त इवासीत् ।

३. काकश्चलितः । स च व्याकुल आसीत् । सोऽनिष्टस्य शङ्कामकरोत् । स चिन्तितोऽभवत् ।

८. निर्धारितगद्यभागस्य सरलार्थं लिखत ।

९. परस्परं मेलयत ।

(क)	(ख)
१. तरुः	(क) निवसन्ति
२. पक्षिणः	(ख) उक्त्वा
३. इति	(ग) अस्ति
४. चन्द्रः	(घ) अचलत्
५. वायसः	(ङ) अस्तङ्गतः

१०. कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानानि पूरयत ।

१. शाल्मलीतरवः........... सन्ति (गोदावरीतट) ।

२. पक्षिणः.................. रात्रौ निवसन्ति स्म (देश, आ–गम्) ।

३. कदाचित्............... रात्रौ वायसः प्रबुद्धः (अव–सद्) ।

४. वायसः................ व्याधमपश्यत् (आ–या) ।

५. लघुपतनकः........... अवलोक्याचिन्तयत् (तत्) ।

६. व्याधो द्वितीय आगच्छन्............. इवासीत् (कृतान्त) ।

७. नानादिग्देशादागत्य.................. खगा निवसन्ति (तरु) ।

८. अस्तङ्गते........................... वायसः प्रबुद्धः । (चन्द्रमस्)

९. न जाने.............................. दर्शयिष्यति । (किम्, अनभिमत)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११. वाक्यविश्लेषणं कुरुत ।

अवसन्नायां रात्रावस्ताचलचूडावलम्बिनि कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धो व्याधमपश्यत् ।

१२. रेखाङ्कितपदानां विभक्तिकारकयोर्निर्देशं कुरुत ।

१३. विशेषणपदान्यन्विष्य लिखत ।

१४. बहुवचने परिवर्तनं कुरुत ।

गोदावरीतटे विशालः शाल्मलीतरुर्वर्तते । अस्मिन् पक्षी निवसति । स च देशादागतोऽस्ति। कदाचित् तत्र पाशहस्तो व्याधः समागतः । स च पक्षी भयार्तः कोलाहलं कृतवान् ।

१५. वाच्यपरिवर्तनं कुरुत ।

लघुपतनकः कृतान्तसदृशं व्याधमपश्यत् । तं विलोक्य तेनायं व्याधः पक्षिणो घातयिष्यतीति चिन्तितम् । ततः पाशहस्तं तमेव व्याधमनुसृतवान् ।

१६. वाक्यसंश्लेषणं कुरुत

रात्रिः अवसन्ना । कुमुदिनीनायकः चन्द्रः, अस्ताचलचूडाम् अवलम्बते । वायसः प्रबुद्धः । तस्य नाम लघुपतनकः, अस्ति । स च व्याधम् अपश्यत् ।

१७. निम्नलिखितपदानां पदवर्गं निर्धारयत ।

गोदावरी । तीरम् । विशालः । दिक् । पक्षिणः । आगत्य । वायसः । द्वितीयः । व्याधः । पाशहस्तम् । आलोक्य । अचिन्तयत् । अद्य । प्रातः । किम्। दर्शयिष्यति । व्याकुलः । रात्री । अस्ति ।

१८. अधोलिखितपदानि प्रयुज्य विभक्तीश्च विपरिणमय्य संकथनं पूरयत-

गोदावरीतीरम् । विशालः । तरुः । तत्र । दिग्देशम् । पक्षी । वसति । कदाचित् । अवसन्ना । रात्रिः। अस्तङ्गतः । चन्द्रः । लघुपतनकः । कृतान्तः । इव। पाशहस्तः। व्याधः । अपश्यत् । तम् । दृष्ट्वा । सः । किम् । अशुभम् । दर्शयिष्यति। ततः । असौ । व्याधम् । अनुसृत्य । चलितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पाठः

चित्रग्रीव-हिरण्यककथा - २

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम् । स च प्रच्छन्नो भूत्वा स्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पन् तान् तण्डुलकणानवलोकयामास । ततस्तण्डुलकणलुब्धान् कपोतान् प्रति कपोतराज आह- 'कुतोऽत्र निर्जने वने तण्डुलकणानां संभवः? तन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । प्रायेणानेन तण्डुलकणलोभेना-

---

२.१ **अथ** = अनन्तरम् (यसपछि) **तेन** = पूर्वोक्तेन (अघि भनिएको) **व्याधेन**= लुब्धकेन (व्याधाद्वारा) **तण्डुलकणान्** = तण्डुलखण्डान् (चामलका कनिका) **विकीर्य**= भूमौ निक्षिप्य (जमिनमा छरेर) **जालम्** = पाशः (पाशो) **विस्तीर्णम्** = प्रसारितः (फिजाइयो)। **स च** = व्याधश्च (व्याधा त) **प्रच्छन्नो भूत्वा** = अन्तर्हितो भूत्वा (लुकेर) **स्थितः** = तस्थौ (रह्यो) **तस्मिन्नेव काले** = तस्मिन्नेव समये (त्यसै वेला) **सपरिवारः** = सपरिकरः (परिवारले सहित) **वियति** = आकाशे (आकाशमा) **विसर्पन्** = उद्गच्छन् (उडिरहेको) **चित्रग्रीवनामकः** = चित्रग्रीवेति विख्यातः (चित्रग्रीव नाम गरेको) **कपोतराजः**= पारावतराजः (परेवाको राजाले) **तान्**= भूमौ निक्षिप्तान् (जमिनमा छरिएका) **तण्डुलकणान्**= तण्डुलखण्डान् (चामलका कनिका) **अवलोकयामास** = ददर्श (देख्यो) **ततः** = तण्डुलकणदर्शनानन्तरम् (चामलको कनिका देखेपछि) **कपोतराजः**= चित्रग्रीवः (चित्रग्रीवले) **तण्डुलकणलुब्धान्**= तण्डुलकणभक्षणोन्मुखान् (चामलका कनिकामा लोभिएका) **कपोतान् प्रति** = पारावतान् प्रति (परेवाहरूलाई) **आह** = उक्तवान् (भन्यो) **अत्र** = अस्मिन् (यो) **निर्जने** = जनरहिते (मान्छे नभएको) **वने** = अरण्ये (जङ्गलमा) **तण्डुलकणानाम्** = तण्डुलखण्डानाम् (चामलका कनिकाको) **सम्भवः** = उत्पत्तिः (उत्पत्ति) **कुतः** = कस्मात् स्थानाद् भवति ? (कहाँबाट हुन्छ) **तत्** = तस्माद् हेतोः । (त्यसैले) **तावद्** = आदौ (पहिले) **निरूप्यताम्** = सम्यग्विचार्यताम् (राम्रोसित विचार गरियोस्) **इदम्** = तण्डुलकणभक्षणम् (चामलका कनिका खानु) **भद्रम्** = कल्याणकरम् (कल्याणकारक) **न पश्यामि** = न विलोकयामि (देख्दिन) **प्रायेण** = बाहुल्येन (धेरैजसो) **अनेन** = एतेन (यो) **तण्डुलकणलोभेन**= तण्डुलखण्डभक्षणलालसया(कनिका खाने लोभले) **अस्माभिः**= कपोतैः (हामी परेवाले पनि) **तथा भवितव्यम्** (त्यस्तै हुनुपर्ने छ) **यथा** = येन प्रकारेण (जसरी) **कङ्कणस्य** = स्वर्णबालस्य (सुनको बालाको) **लोभेन** = लालसया (लोभले)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्माभिरपि तथा भवितव्यं यथा कङ्कणस्य लोभेन सुदुस्तरे महापङ्के निमग्नः पथिको वृद्धव्याघ्रेण घातितः खादितश्च ।

सुदुस्तरे = तर्तुमशक्ये (पार पाउन नसकिने) **महाकर्दमे** = विशालपङ्के (ठूलो हिलोमा) **निमग्नः = पतितः (फसेको) पथिकः** = पान्थः (बटोही) **वृद्धव्याघ्रेण** = वृद्धशार्दूलेन (बूढो बाघद्वारा) **घातितः** = मारितः (मारियो) **खादितः** = भक्षितश्च (खाइयो पनि) ।

२.२ विग्रहः– तण्डुलकणान्– तण्डुलानाम् कणाः (ष.त.) तान् । **चित्रग्रीवनामा–** चित्रग्रीवः नाम यस्य सः (बहु.) **कपोतराजः–** कपोतानाम् राजा (ष.त.) **तण्डुलकण-लुब्धान्–** तण्डुलानाम् कणाः (ष.त.) तेषु लुब्धाः (स.त.) तान् । **तण्डुलकणलोभेन–** तण्डुलानाम् कणाः (ष.त.) तेषां लोभः (ष.त.) तेन । **महापङ्के–** महान् चासौ पङ्कः (कर्म.) तस्मिन् । **वृद्धव्याघ्रेण–** वृद्धश्चासौ व्याघ्रः (कर्म.) तेन । **निर्जने–** निर्गताः जनाः यस्मात् (बहु.) तस्मिन् । **सपरिवारः –** परिवारैः सहितः (बहु.) ।

२.३ प्रकृतिप्रत्ययविच्छेदः – विकीर्य– वि–कॄ+क्त्वा > ल्यप् । **विस्तीर्णम्–** वि–स्तॄ +क्त । **प्रच्छन्नः–** प्र–छद्+क्त । **भूत्वा–** भू+क्त्वा । **स्थितः–** स्था+क्त । **विसर्पन्–** वि–सृप्+लट् > शतृ । **कुतः –** किम् + तसिल् । **भवितव्यम्–** भू + तव्यत् (भावे प्रयोगः) । **संभवः –** सं – भू + अच् । **लुब्ध–** लुभ् + क्त । **कपोतराजः–** कपोतराजन्+ टच् । **घातितः –** हन् + णिच् + क्त । **खादितः–** खाद् + क्त । **अवलोकयामास –** अव+ लोक् +णिच् + लिट् > तिप् । **प्राह –** प्र + ब्रू (आह) + लट् > तिप् । **निरूप्यताम् –** नि+ रूप्+ णिच् + लोट् (कर्मणि प्रयोगः) । **पश्यामि –** दृश् + लट् > मिप् ।

२.४ कोषः – जालम् – आनायः पुंसि जालं स्यात्, इत्यमरः । **कालः –** कालो दिष्टोऽप्यनेहापि समयः, इत्यमरः । **कपोतः –** पारावतः कलरवः कपोतः, इत्यमरः । **कङ्कणम् –** कङ्कणं करभूषणम्, इत्यमरः । **कर्दमः –** निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ, इत्यमरः । **व्याघ्रः –** शार्दूलद्वीपिनौ व्याघ्रे, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. **उपरितनगद्यभागमधीत्य निम्नलिखितप्रश्नानामुत्तराणि लिखत ।**

१. व्याधः किं कृत्वा जालं विस्तारितवान् ?

२. पाशान् विस्तार्य व्याधेन किं कृतम् ?

३. तदानीं चित्रग्रीवः किं कुर्वन् आसीत् ?

४. कपोतराजः किमपश्यत् ?

५. कपोताः केषु लुब्धा आसन् ?

६. चित्रग्रीवः कपोतान् किमाह ?

७. कपोतराजः कस्मिन् विषये भद्रं नापश्यत् ?

८. कङ्कणस्य लोभेन पथिकस्य का दशा सञ्जाता ?

२. **विग्रहान् प्रदर्श्य समासनामानि लिखत ।**

तण्डुलकणान् । चित्रग्रीवनामा । कपोतराजः । सपरिवारः । तण्डुलकणलुब्धान्। तण्डुलकणलोभेन । दुस्तरे । महापङ्के । वृद्धव्याघ्रेण । निर्जने ।

३. **निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।**

४. **सन्धिविच्छेदं कुरुत ।**

तस्मिन्नेव । कपोतराज आह । कुतोऽत्र । तन्निरूप्यताम् । लोभेनास्माभिः । प्रायेणानेन।

५. **प्रकृतिप्रत्ययविच्छेदं कुरुत**

विकीर्य । विस्तीर्णः । प्रच्छन्नः । भूत्वा । स्थितः । विसर्पन् । कुतः । भवितव्यम् । संभवः । लुब्धः । कपोतराजः । घातितः । खादितः ।

६. **वाक्येषु प्रयोगं कुरुत ।**

विकीर्य । भूत्वा । ततः । सपरिवारः । आह । अत्र । प्रायेण । अस्माभिः । कुतः । यथा । स्थितः । निरूप्यताम् । भद्रम् । लोभेन । निमग्नः । घातितः । खादितः ।

७. **वाक्यसंश्लेषणं कुरुत ।**

१. व्याधः प्रथमं तण्डुलकणान् व्यकिरत् । ततः स जालं विस्तारितवान् । तदनु व्याधः प्रच्छन्नोऽभवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२. चित्रग्रीवस्तण्डुलकणानपश्यत् । स कपोतानां राजासीत् । स सपरिवारो वियति विसर्पति स्म ।
३. चित्रग्रीवः कपोतान् प्रत्याह । ते च तण्डुलकणेषु लुब्धा आसन् । चित्रग्रीवः कपोतानां राजासीत् ।
४. चित्रग्रीवेण कथितम् । तण्डुलकणानां लोभेनास्माकं कल्याणं न भवति । कङ्कणस्य लोभेन सुदुस्तरे महापङ्के निमग्नः पथिको वृद्धव्याघ्रेण व्यापादितः।

८. **निर्धारितगद्यभागस्य सरलार्थं लिखत ।**

९. **परस्परं मेलयत ।**

(क)	(ख)
१. व्याधः	(क) चित्रग्रीवः
२. वियति	(ख) संभवः
३. सपरिवारः	(ग) कङ्कणस्य
४. कुतः	(घ) प्रच्छन्नः
५. लोभेन	(ङ) विसर्पन्

१०. **कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानानि पूरयत ।**

१. पान्थः........................ घातितः । (वृद्धव्याघ्र)
२. कपोताः .... लुब्धा आसन् । (तण्डुलकण)
३. इयं........................... न पश्यामि । (भद्र)
४. पथिकः .... पङ्के निमग्नः । (सुदुस्तर)
५. चित्रग्रीवः .... प्रत्याह । (कपोत)
६. अनेन........................ तथा भवितव्यम् । (तण्डुलकणलोभ)
७. लुब्धकेन................... विकीर्य जालं विस्तीर्णम् । (तण्डुल)
८. कपोतराजो वियति .... तण्डुलकणान् दृष्टवान् । (वि-सृप्)
९. व्याधः .... प्रच्छन्नोऽभवत् । (जाल, वि-स्तृ)
१०. कुतोऽत्र............. वने...........संभवः ? (निर्जन, तण्डुलकण)

११. **वाच्यपरिवर्तनं कुरुत ।**

तेन जालं विस्तीर्णम् । कपोतराजस्तण्डुलकणानपश्यत् । तन्निरूप्यताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पथिको वृद्धव्याघ्रेण घातितः । व्याधस्तण्डुलकणानकिरत् । जालं विस्तार्य व्याधः प्रच्छन्नोऽभवत्।

१२. **वाक्येषु प्रयोगं कुरुत ।**

कथम् । अकथयत् । व्याघ्रः । भाग्येन । किन्तु । सर्वत्र । केनचित् । यत्र। विकीर्य। विस्तीर्णः । स्थितः । एकदा । आलोचितम् । सर्वत्र । अत्र । विसर्पन् ।

१३. **निर्धारितपाठान्तर्गतानि कर्तृपदानि कर्मपदानि चान्विष्य लिखित ।**

१४. **रेखाङ्कितपदानां विभक्तिकारकयोरुल्लेखं कुरुत ।**

१५. **एकवचने परिवर्तनं कुरुत ।**

१. व्याधैस्तण्डुला विकीर्णाः, जालानि च विस्तीर्णानि ।

२. तदा सचित्रग्रीवाः कपोता वियति विसर्पन्त आसन् ।

३. कपोतास्तण्डुलानां कणेषु लुब्धा अभवन् ।

४. वयं भद्राणि न पश्यामः ।

१६. **कमपि कथानकं प्रकल्प्य कामपि कथामेकां रचयत ।**

१७. **भूतकाले परिवर्तनं कुरुत ।**

चित्रग्रीवो वियति विसर्पति । स च सपरिवारोऽस्ति । स कपोतानां राजा वर्तते । तदा चित्रग्रीवस्तण्डुलकणान् पश्यति ।

१८. **वर्तमानकाले परिवर्तनं कुरुत ।**

व्याधस्तण्डुलकणान् व्यकिरत् । वियति विसर्पन् सपरिवारश्चित्रग्रीवस्तान् तण्डुलकणानपश्यत् । स कपोतानकथयत्–निर्जनेऽत्र वने तण्डुलकणानामुत्पत्तिः कथम्?

१९. **अधोलिखितपदानि प्रयुज्य विभक्तीश्च विपरिणमय्य संकथनं पूरयत-**

अथ । सः । व्याधः । तण्डुकलकणाः । विकीर्य । जालम् । विस्तीर्णम् । सः । प्रच्छन्नः । भूत्वा । स्थितः । सः । कालः । चित्रग्रीवनामा । कपोतराजः । सपरिवारः । वियति । विसर्पन् । तद् । तण्डुलकणाः । अवलोकयामास । ततः। तण्डुलकणलुब्धाः । कपोताः । प्रति । कपोतराजः । आह । कुतः । अत्र । निर्जनम् । वनम् । तण्डुलकणाः । सम्भवः । तत् । निरूप्यताम् । इदम् । भद्रम्। न पश्यामि । प्रायेण । इदम् । तण्डुलकणलोभः । अस्मद् । तथा । भवितव्यम् । यथा । कङ्कणम् । लोभः । सुदुस्तरः । महापङ्कः । निमग्नः । पथिकः । वृद्धव्याघ्रः। घातितः । खादितः । च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः पाठः

वृद्धव्याघ्र-लुब्धपथिककथा-१

कपोता ऊचुः- कथमेतत् ? चित्रग्रीवोऽकथयत्- अहमेकदा दक्षिणारण्ये चरन्नपश्यम्- एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते- भो भो पान्थाः, इदं सुवर्णकङ्कणं गृह्यताम् । ततो केनचिद् लोभाकृष्टेन पान्थेनालोचितम् । भाग्येनैतत्संभवति किन्त्वत्रात्मसन्देहे प्रवृत्तिर्न विधेया । यतोऽनिष्टादिष्टलाभेऽपि शुभा गतिर्न जायते । यत्र विषसंसर्गमास्ते तदमृतमपि मृत्यवे भवति किन्तु

३.१ **कपोताः** = पारावताः (परेवाहरूले) **ऊचुः** = कथयामासुः (भने) **एतत्** = इदम् (यो कुरा) **कथम्** = केन प्रकारेण जातम् (कसरी भयो) **चित्रग्रीवः** = कपोतराजः (चित्रग्रीवले) **अकथयत्** = अवोचत् (भन्यो) - **अहम्** = चित्रग्रीवः (म) **एकदा** = एकस्मिन् समये (एक समयमा) **दक्षिणारण्ये** = दक्षिणदिग्भवे वने (दक्षिण दिशामा पर्ने जङ्गलमा) **चरन्** = भ्रमन् (घुम्दा) **अपश्यम्** = दृष्टवान् (देखें) **एकः** = असहायः (एक्लो) **वृद्धव्याघ्रः**= जीर्णशार्दूलः (बूढो बाघ) **स्नातः** = कृतस्नानः (नुहाएर) **कुशहस्तः**= दर्भपाणिः (हातमा कुश लिएर) **सरस्तीरे** = तडागतटे (तलाउको तीरमा) **ब्रूते** = कथयति (भन्छ) **भो भो पान्थाः** = हे हे पथिकाः (हे बटोही हो) **इदम्** = मम हस्ते स्थितम् (मेरो हातमा रहेको) **सुवर्णकङ्कणम्** = कनकवलयम् (सुनको बालो) **गृह्यताम्** = आदीयताम् (लिइयोस्) । **ततः** = तदनन्तरम् (बाघले भनेको सुनेपछि) **लोभाकृष्टेन** = लुब्धेन (लोभी) **पान्थेन** = पथिकेन (बटोहीले) **आलोचितम्** = विचारितम् (विचार गऱ्यो) **भाग्येन** = दैवेन (भाग्यद्वारा नै) **एतत्** = कनकवलयलाभः (सुनको बालाको लाभ) **सम्भवति** = जायते (हुन्छ) **किन्तु** = परन्तु (तर) **अत्र** = अस्मिन् (यो) **आत्मसन्देहे**= प्राणसंशये (प्राणको बाजी लगाउनु पर्ने काममा) **प्रवृत्तिः** = प्रयत्नः (प्रयास) **न विधेया**= न नकर्तव्या (गर्नु हुँदैन) । **यतः** = यस्मात् (किनभने) **अनिष्टात्**= अशुभात् (खराब वस्तुबाट) **इष्टलाभे** = अभिलषितप्राप्तौ अपि (इष्टसिद्धि भए पनि) **शुभा** = कल्याणदा (कल्याण गर्ने) **गतिः** = अवस्था (स्थिति) **न जायते** = नभवति (हुँदैन) **यत्र** = यस्मिन् (जसमा) **विषसंसर्गम्** = गरलसंपर्कम् (विषको मिसावट) **आस्ते**= वर्तते (छ) **तत्** = तादृशम् (त्यस्तो) **अमृतम् अपि** = सुधा अपि (अमृत पनि) **मृत्यवे**= हत्यायै (मृत्युका निमित्त) **भवति** = जायते (हुन्छ) **किन्तु** = परन्तु (तर) **सर्वत्रैव** = सर्वस्मिन् स्थाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्र प्रायेणार्थार्जनप्रवृत्तौ सन्देह एव ।

(सबै ठाउँमा) **प्रायेण** = बहुशः (धेरैजसो) **अर्थार्जनप्रवृत्तौ** = धनोपार्जन-प्रयत्ने (पैसा कमाउने प्रयासमा) **सन्देह एव** = जीवनसंशय एव (ज्यानको बाजी लगाउनु पर्छ नै)

३.२ विग्रहः – चित्रग्रीवः – चित्रा ग्रीवा यस्य सः (बहु.) **दक्षिणारण्ये**– दक्षिणस्याम् अरण्यम् (स.त.) तस्मिन् । **कुशहस्तः** – कुशः हस्ते यस्य सः (बहु.) **सरस्तीरे**– सरसः तीरम् (ष.त.) तस्मिन् । **सुवर्णकङ्कणम्**– सुवर्णस्य कङ्कणम् (ष.त.) तत् । **लोभाकृष्टेन**– लोभेन आकृष्टः (तृ.त.) तेन । **आत्मसंदेहे**– आत्मनः सन्देहः (ष.त.) तस्मिन् । **अनिष्टाद्**– न इष्टम् अनिष्टम् (न.त.) तस्मात् । **इष्टलाभे**– इष्टस्य लाभः (ष.त.) तस्मिन् । **विषसंसर्गम्**– विषस्य संसर्गो यत्र (बहु.) तत् । **अर्थार्जनप्रवृत्तौ**– अर्थस्य आर्जनम् (ष.त.) तस्य प्रवृत्तिः (ष.त.) तस्याम् ।

३.३ प्रकृतिप्रत्ययविच्छेदः – एकदा – एक+दा (अव्ययपदम्)। **चरन्** – चर्+ लट् > शतृ । **वृद्धः** – वृध् + क्त । **स्नातः** – स्ना + क्त । **आकृष्टः** – आ-कृष् + क्त। **आलोचितम्**– आ-लोच् + क्त । **प्रवृत्तिः**– प्र – वृत् + क्तिन् । **गतिः** – गम् + क्तिन् । **सर्वत्र**– सर्व + त्रल् । **अर्जनम्**– अर्ज + ल्युट् > अन । **अपश्यम्** – दृश् + लङ् > मिप्। **गृह्यताम्** – ग्रह+लोट् + त (कर्मवाच्यप्रयोगः) । **विधेयाः** – वि-धा + यत्+टाप् ।

३.४ कोषः – कुशः – अस्त्री कुशं कुथो दर्भः पवित्रम्, इत्यमरः । **सरः** – कासारः सरसि सरः, इत्यमरः । **सुवर्णम्** – स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्, इत्यमरः । **पान्थः** अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि, इत्यमरः । **अमृतम्** – पीयूषममृतं सुधा, इयमरः । **मृत्युः** – स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः । अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्, इत्यमरः । **भाग्यम्** – दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः, इत्यमरः । **विषम्** – क्ष्वेडस्तु गरलं विषम्, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. निम्नगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।

१. चित्रग्रीवः कुत्र भ्रमन्नासीत् ।
२. व्याघ्रः कीदृशः ?
३. व्याघ्रस्य वचनं निशम्य पान्थेन किं विचारितम् ?
४. कुत्र प्रवृत्तिर्न विधेया ?
५. कस्मिन् शुभा गतिर्न भवति ?
६. पान्थः कीदृश आसीत् ?
७. प्रायेण कस्मिन् विषये सन्देह एव भवति ?

२. विग्रहान् प्रदर्श्य समासनामानि लिखत ।

चित्रग्रीवः । दक्षिणारण्ये । कुशहस्तः । सरस्तीरे । सुवर्णकङ्कणम् । लोभाकृष्टेन। आत्मसन्देहे । अनिष्टात् । इष्टलाभे । विषसंसर्गम् । अर्थार्जनप्रवृत्तौ ।

३. सन्धिविच्छेदं कुरुत ।

कपोता ऊचुः । चित्रग्रीवोऽकथयत् । चरन्नपश्यम् । पान्थेनालोचितम् । भाग्येनैतत् । किन्त्वत्र । अत्रात्मसन्देहे । अनिष्टादिष्टलाभे । लाभेऽपि । सर्वत्रार्थार्जन–प्रवृत्तौ । सन्देह एव। वृद्धो व्याघ्रः ।

४. निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

५. सविग्रहं समासनामानि लिखत ।

दक्षिणारण्ये । कुशहस्तः । सरस्तीरे । सुवर्णकङ्कणम् । लोभाकृष्टेन । आत्म–सन्देहः । अनिष्टात् । इष्टलाभे । विषसंसर्गम् । अर्थार्जनप्रवृत्तौ ।

६. निर्धारितपाठस्य सरलार्थं लिखत ।

७. परस्परं मेलयत ।

(क)	(ख)
१. कपोताः	(क) आलोचितम्
२. अहम्	(ख) ऊचुः
३. इदम्	(ग) गतिः
४. शुभा	(घ) गृह्यताम्
५. पान्थेन	(ङ) अपश्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानानि पूरयत ।

१. अहं............ चरन्नपश्यम् । (पान्थ)
२. व्याघ्रः कुशहस्तः .... ब्रूते । (पान्थ)
३. कदाचित्............ इष्टं लभ्यते । (अनिष्ट)
४. विषयुक्तममृतमपि............ भवति । (मृत्यु)
५. अर्थार्जने प्रायेण............ एव भवति । (सन्देह)
६. चित्रग्रीवः .... अकथयत् । (कपोत)
७. कपोताः .... ऊचुः । (चित्रग्रीव)
८. अनिष्टात्............ शुभा न भवति । (इष्टलाभ)

९. वाच्यपरिवर्तनं कुरुत ।

दक्षिणारण्ये चरन्नहं कुशहस्तं व्याघ्रमपश्यम् । केनचित्पान्थेनालोचितम् । कपोताश्चित्रग्रीवमुक्तवन्तः । चित्रग्रीवेण कापि कथा कथिता । कदाचिदनिष्टमपीष्टं जनयति।

१०. रेखाङ्कितपदानां विभक्तिकारकयोर्निर्देशं कुरुत ।

११. निम्नलिखितपदानां वर्गं निर्धारयत ।

अहम् । एकदा । एकः । वृद्धः । व्याघ्रः । स्नातः । कुशहस्तः । पान्थाः । गृह्यताम् । ततः । केनचित् । पान्थेन । आलोचितम् । भाग्येन । संभवति । किन्तु। अस्मिन् । प्रवृत्तिः ।

१२. अधोलिखितपदानि प्रयुज्य विभक्तीश्च विपरिणमय्य संकथनं पूरयत-

कपोतः । ऊचुः । कथम् । एतत् । चित्रग्रीवः । कथयति । अहम् । एकदा। दक्षिणारण्यम् । चरन् । अपश्यम् । एकः । वृद्धः । व्याघ्रः । स्नातः । कुशहस्तः। सरस्तीरम् । ब्रूते । भो । पान्थः । इदम् । सुवर्णकङ्कणम् । गृह्यताम् । ततः । कश्चिद् । लोभाकृष्टः । पान्थः । आलोचितः । भाग्यम् । एतत् । सम्भवति । किन्तु। आत्मसन्देहः । प्रवृत्तिः । न । विधेया । अनिष्टम् । इष्टलाभः । शुभा । गतिः । न । जायते । यत्र । विषसंसर्गम् । आस्ते । तद् । अमृतम् । अपि । मृत्युः। भवति । किन्तु । सर्वत्र । प्रायेण। अर्थार्जनप्रवृत्तिः । सन्देहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः पाठः

वृद्धव्याघ्र-लुब्धपथिककथा- २

तन्निरूपयामि तावत् । प्रकाशं ब्रूते-कुत्र तव कङ्कणम् ? व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत्- कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच-शृणु रे पान्थ, प्रागेव यौवनदशायामहतिदुर्वृत्त आसम् । अनेकगो-मानुषाणां वधान्मे पुत्रा मृता दाराश्च । अतोऽहं वंशविहीनो जातः । ततः केनचिद् धार्मिकेणाहमुपदिष्टः- दानधर्मादिकं चरतु भवान् । तदुपदेशादिदानीं

४.१ **तत्** = तस्मात् (त्यसै कारणले) **तावद्** = आदौ (पहिले) **निरूपयामि**= अस्य हस्ते सुवर्णकङ्कणं विद्यते न वेति निश्चिनोमि (यसको हातमा सुनको बालो छ कि छैन भन्ने निश्चय गर्छु) **प्रकाशम्** = स्पष्टम् (सुनिने गरी) **ब्रूते** = कथयति (भन्छ) **तव** = भवतः (तिम्रो) **कङ्कणम्** = वलयम् (बालो) **कुत्र अस्ति** = क्व वर्तते (कहाँ छ) **व्याघ्रः** = शार्दूलः (बाघ) **हस्तम्** = करम् (हात) **प्रसार्य** = विस्तार्य (फैलाएर) **दर्शयति** = प्रकाशयति (देखाउँछ) **पान्थः** = पथिकः (बटोहीले) **अवदत्** = अकथयत् (भन्यो) - **मारात्मके** = घातुके (हिंस्रक) **त्वयि** = व्याघ्रे (तँ बाघमाथि) **कथम्** = केन प्रकारेण (कसरी) **विश्वासः** = प्रत्ययः (विश्वास गर्ने ?) **व्याघ्रः** = शार्दूलः (बाघले) **उवाच** = जगाद (भन्यो) **रे पान्थ** = हे पथिक (हे बटोही) **शृणु** = आकर्णय (सुन्) **प्राक् एव** = पूर्वस्मिन्नेव समये (उहिल्यै) **अहम्** = व्याघ्रः (म) **यौवनदशायाम्**= युवावस्थायाम् (जवानीको अवस्थामा) **अतिदुर्वृत्तः** = नितरां दुराचारी (अति नै बदमास) **आसम्** = अभवम् (थिएँ) **अनेकगोमानुषाणाम्** = असङ्ख्यधेनुनराणाम् (धेरै गाई र मानिसको) **बधात्** = मारणात् (हत्याले) **मे** = मम (मेरा) **पुत्राः** = सुताः (छोराहरू) **दाराः** = पत्न्यश्च (पत्नीहरू पनि) **मृताः** = दिवङ्गताः (मरे) **अतः** = अस्मात् कारणात् (यस कारणले) **अहम्** = व्याघ्रः (म) **वंशविहीनः** = सन्तानरहितः (निःसन्तान) **जातः**= अभवम् (भएँ) **ततः** = तदनन्तरम् (त्यसपछि) **केनचित्** = केनापि (कुनै) **धार्मिकेण**= धर्मात्मना (धर्मात्माद्वारा) **अहम्** = व्याघ्रः (म) **आदिष्टः** = उपदिष्टः (उपदेश दिइएँ) **भवान्** = त्वम् (तपाइँ) **दानधर्मादिकम्** = दानं व्रतादि च (दानधर्म आदि पुण्यकार्य) **चरतु** = करोतु (गर्नुहोस्) **तदुपदेशात्** = धार्मिकस्यादेशात् (धर्मात्माको उपदेशबाट) **इदानीम्** = सांप्रतम् (अहिले) **स्नानशीलः** = नित्यस्नायी (सँधै नुहाउने) **दाता**= दानकर्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानशीलो दाता वृद्धो गलितनखदन्तश्चास्मीति कथं न विश्वासभूमिः ? मम चैतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुमिच्छामि तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः ।

(दानी) **वृद्धः** = वयोऽतीतः (बूढो) **गलितनखदन्तः** = पतितनखरदशनः (दात र नङ झरेको) **अस्मि** = वर्ते (छु भने) **कथम्** = कुतः (किन) **न विश्वासभूमिः** = न प्रत्यययोग्यः (विश्वासपात्र बन्न योग्य भइँन) **मम** = व्याघ्रस्य (मेरो) **एतावान्** = एतादृशः (यस्तो) **लोभविरहः** = लोभाभावः (लोभको अभाव छ) **येन** = कारणेन (जुन कारणले) **स्वहस्तस्थम्** = निजकरगतम् (आफ्नो हातमा रहेको) **सुवर्णकङ्कणम्** = कनकवलयम् (सुनको बालो) **यस्मै कस्मैचित्** = आततायिनेऽपि (जो कोही-आफ्नो हत्यारालाई पनि) **दातुम्** = वितरितुम् (दिन-दान गर्न) **इच्छामि** = वाञ्छामि (चाहन्छु) **तथापि** = दानादिसत्कर्मणि प्रवृत्तौ अपि (दान, व्रत आदि असल कार्यमा लागे तापनि) **व्याघ्रः** = शार्दूलः (बाघ) **मानुषम्** = नरम् (मान्छेलाई) **खादति** = भक्षयति इति (खान्छ भन्ने) **लोकापवादः** = जनापवादः (सामाजिक भनाइ) **दुर्निवारः** = निवारयितुमशक्यः (हटाउन सकिदैन) ।

४.२ विग्रहः – मारात्मके – मारः आत्मा यस्य सः, (बहु.) तस्मिन् । **यौवनदशायाम्**– यौवनस्य दशा (ष. त.) तस्याम् । **अतिदुर्वृत्तः**– अतिशयेन दुष्टं वृत्तं यस्य सः (बहु.) । **अनेकगोमानुषाणाम्**– अनेकाश्च ते गोमानुषाः (कर्म.) तेषाम् । **वंशविहीनः** – वंशैः विहीनः (तृ त.) । **दानधर्मादिकम्**– दानञ्च धर्मश्च (द्वन्द्व) दानधर्मौ । तौ आदि यस्य तत् (बहु.) । **तदुपदेशात्**– तस्य उपदेशः (ष. त.) तस्मात् । **स्नानशीलः** – स्नाने शीलः (स. त.) । **गलितनखदन्तः**– नखाश्च दन्ताश्च नखदन्तम्, (द्वन्द्व.) गलितं नखदन्तं यस्य सः (बहु.) । **विश्वासभूमिः**– विश्वासस्य भूमिः (ष. त.) । **लोभविरहः** – लोभस्य विरहः (ष. त.) । **स्वहस्तस्थम्** – स्वहस्ते तिष्ठतीति (उप. त.) तत् । **सुवर्णकङ्कणम्**– सुवणस्य कङ्कणम् (ष. त.) तत् । **लोकापवादः** – लोकानां अपवादः (ष. त.) ।

४.३ प्रकृतिप्रत्यविच्छेदः – प्रसार्य– प्र-सृ+णिच् + क्त्वा > ल्यप् । **यौवनम्**– युवन् + अण् । **हीनः** – हा + क्त > न । **मृतः** – मृ + क्त । **धार्मिकः** – धर्म + ठक् > इक । **उपदिष्टः** – उप – दिश् + क्त । **दानम्**– दा +ल्युट् > अन । **इदानीम्**– इदम् + दानीम् । **एतावान्**– एतत् + मतुप् > वतुप् । **दातुम्**– दा + तुमुन् । **स्वहस्तस्थम्**– स्वहस्त – स्था + क । **अपवादः** – अप – वद् + घञ् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. अधस्तनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।

१. सुवर्णस्य कङ्कणं कुत्रासीत् ?
२. दृष्टे सुवर्णकङ्कणे पान्थः किमकथयत् ?
३. व्याघ्रः कीदृश आसीत् ?
४. व्याघ्रः कथं वंशविहीनो जातः ?
५. व्याघ्रः कस्मै किं दातुमिच्छति ?
६. कतमो लोकापवादो दुर्निवारः ?
७. धार्मिको व्याघ्रं किमुपदिष्टवान् ?
८. कस्य हेतोर्व्याघ्रस्य पुत्रा दाराश्च मृताः ?
९. कस्योपदेशेन व्याघ्रो धर्मकार्ये प्रवृत्तः ?
१०. व्याघ्रो हस्तं प्रसार्य किं दर्शयति ?

२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

मारात्मके । यौवनदशायाम् । अतिदुर्वृत्तः । अनेकगोमानुषाणाम् । वंशहीनः। दानधर्मादिकम् । तदुपेशात् । स्नानशीलः । गलितनखदन्तः । विश्वासभूमिः । लोभविरहः। स्वहस्तस्थम् । सुवर्णकङ्कणम् । लोकापवादः ।

४ सन्धिविच्छेदं कुरुत ।

पान्थोऽवदत् । तन्निरूप्यताम् । व्याघ्र उवाच । प्रागेव । दाराश्च । पुत्रा मृताः। तदुपदेशात् । चैतावान् । व्याघ्रो मानुषम् । खादतीति । तथापि । व्याघ्रो हस्तम् । धार्मिकेणाहम्।

५ निर्धारितपाठस्य सरलार्थं लिखत ।

६ स्वकीयवाक्येषु प्रयोगं कुरुत ।

निरूप्यताम् । प्रकाशम् । ब्रूते । कुत्र । तव । त्वयि । इदानीम् । केनचित्। शृणु । दातुम् । तथापि । दृर्वृत्तः । प्राक् । अवदत् । प्रसार्य । उपदिष्टः । मम । इच्छामि । चरतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७ **कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानानि पूरयत ।**

१. .... व्याघ्रोऽतीव दुर्वृत्त आसीत् । (युवावस्था)

२. .... पुत्रा मृता दाराश्च । (व्याघ्र)

३. व्याघ्रः सुवर्णकङ्कणं .... दित्सति । (किम्, चित्)

४. धार्मिकस्य .... व्याघ्रो धर्मकार्ये प्रवृत्तः । (उपदेश)

५. वृद्धो व्याघ्रः .... शीलो दाता चासीत् । (स्नान)

६. .... मानुषः खाद्यते । (व्याघ्र)

७. .... उपदेशेन व्याघ्रो दाताऽभवत् । (तत्)

८. व्याघ्रो गोमानुषाणां वधात्.................. जातः । (वंशहीन)

९. केनचित्.................. व्याघ्र उपदिष्टः । (धार्मिक)

१०. पान्थेन कथितम्– मारात्मके.................. कथं विश्वासः ? (युष्मद्)

८ **वाक्यसंश्लेषणं कुरुत ।**

१. व्याघ्रो युवक आसीत् । तदा स नैकाः गा अवधीत् । तेन बहवो मानुषाश्च घातिताः। अतस्तस्य पुत्रा मृता दाराश्च परलोकङ्गताः। तेनासौ वंशहीनो जातः।

२. कोऽपि धार्मिको व्याघ्रमुपदिष्टवान् । भो व्याघ्र, त्वं दानं कुरु, धर्मं चर इति। तस्योपदेशात् स नित्यं स्नाति, प्रतिदिनं दानं करोति च ।

३. व्याघ्रो लोभेन हीनो विद्यते । स स्वहस्तस्थं सुवर्णकङ्कणं यस्मै कस्मैचिद् दित्सति । स च वृद्धोऽस्ति । तस्य नखा दन्ताश्च गलिताः सन्ति ।

९ **व्याघ्रपथिकयोः संवादमेकं रचयत ।**

१० **रेखाङ्कितपदानां विभक्तिकारकयोर्निर्देशं कुरुत ।**

११ **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

प्रसार्य । यौवनम् । हीनः । मृतः । धार्मिकः । उपदिष्टः । दाता । इदानीम्। एतावान्। दातुम् । स्वहस्तस्थम् । अपवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः पाठः

वृद्धव्याघ्र-लुब्धपथिककथा- ३

अहं धर्मशास्त्राणि पठितवान् पुराणोपपुराणानि च श्रुतवान् । दरिद्रेभ्यो यद् दानं दीयते तत्सफलं भवतीति तेषामस्ति सारः । त्वञ्चातीव दुर्गतस्तेन तत् तुभ्यं दातुं सयत्नोऽहमस्मि । तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण । ततो यावदसौ तद्वचःप्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के, निमग्नः

५.१ **अहम्**= व्याघ्रः (मैले) **धर्मशास्त्राणि** = धर्मप्रतिपादकानि शास्त्राणि (धर्मको बारेमा प्रकाश पार्ने शास्त्रहरू) **पठितवान्** = अधीतवान् (पढेको छु) **पुराणोपपुराणानि**= ब्रह्मादिपुराणानि, शिवाद्युपपुराणानि च (ब्रह्म आदि १८ पुराण र शिव आदि १८ उपपुराण) **श्रुतवान्** = आकर्णितवान् (सुनेको छु) **दरिद्रेभ्यः** = निर्धनेभ्यः (गरीबलाई) **यत्** (जुन) **दानम्** = द्रव्यादि (विभिन्न उपयोगी वस्तु) **दीयते** = समर्प्यते (दिइन्छ) **तद् दानम्** (त्यो दान) **सफलम्** = पुण्यप्रदम् (पुण्य दिने) **भवतीति** = जायते इति (हुन्छ भन्ने) **तेषाम्** = धर्मशास्त्रपुराणोपपुराणानाम् (धर्मशास्त्र, पुराण र उपपुराणको) **सारः** = निष्कर्षः (निचोड छ) **त्वञ्च** =पथिकश्च (तिमी पनि) **अतीव** = नितराम् (ज्यादै नै) **दुर्गतः** = दरिद्रः (गरीब छौ) **तेन** = कारणेन (त्यसैले) **तत्** = सुवर्णकङ्कणम् (सुनको बालो) **तुभ्यम्** = पथिकाय (तिमी बटोहीलाई) **दातुम्** = समर्पयितुम् (दिन) **अहम्** = व्याघ्रः (म) **सयत्नः**= उद्यतः (लागेको) **अस्मि** (छु) **तत्** = तस्मात् कारणात् (त्यसैले) **अत्र** = अस्मिन्, **सरसि** = तडागे (यस तलाऊमा) **स्नात्वा** = स्नानं कृत्वा (नुहाएर) **सुवर्णकङ्कणम्** = कनकवलयम् (सुनको बालो) **गृहाण** = स्वीकुरु (ग्रहण गर) **ततः** = व्याघ्रवचनश्रवणानन्तरम् (बाघको वचन सुनेपछि) **यावत्** (जब) **असौ** = पथिकः (यो बटोही) **तद्वचःप्रतीतः** = व्याघ्रवचनविश्वस्तः (बाघको भनाइद्वारा विश्वस्त भएर) **लोभात्** = लिप्सातः (लोभले) **स्नातुम्** = स्नानं कर्तुम् (नुहाउन) **सरः** = तडागम् (तलाऊमा) **प्रविशति** = प्रवेशं करोति (पसेथ्यो) **तावत्**= तस्मिन् समये (उत्तिनै खेर) **महापङ्के**= विशालकर्दमे (हिलाको राशमा) **निमग्नः** = पतितः (डुबेर) **पलायितुम्** = पलायनाय (भाग्न) **अक्षमः**= असमर्थः (सकेन) **पङ्के** = कर्दमे (हिलामा) **पतितम्** = निपतितम् (परेको) **तम्** = पथिकम् (त्यस बटोहीलाई)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पलायितुमक्षमः । पङ्के पतितं तं दृष्ट्वा व्याघ्रोऽवदत्- 'अहह । महापङ्के पतितोऽसि। अतस्त्वामुत्थापयामि ।' इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् - 'यदत्र मारात्मके विश्वासः कृतस्तन्मया भद्रं न कृतम् ।' इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च । अत एवोच्यते-कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे । वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा।।

दृष्ट्वा = विलोक्य (देखेर) **व्याघ्रः** = शार्दूलः (बाघले) **अवदत्** = अकथयत् (भन्यो) **अहह** = अहो (अहो) **महापङ्के** = गभीरकर्दमे (गहिरो हिलामा) **पतितोऽसि** = निमग्नोऽसि (डुबेका छौ) **अतः** = अस्मात् कारणात् (यस कारणबाट) **त्वाम्** = पथिकम् (तिमी बटोहीलाई) **उत्थापयामि** = पङ्काद् बहिरानयामि (उठाउँछु, हिलाबाट बाहिर ल्याउँछु) **इत्युक्त्वा** = एतत्कथयित्वा (यति भनेर) **शनैः शनैः** = मन्दं मन्दम् (विस्तारविस्तारै) **उपगम्य** = समीपं गत्वा (नजिक गएर) **तेन** = धूर्तेन (त्यो धूर्त) **व्याघ्रेण** = शार्दूलेन (बाघद्वारा) **धृतः** = गृहीतः (समातिएको) **स पान्थः** = स पथिकः (त्यस बटोहीले) **अचिन्तयत्** = विचारयामास (सोच्यो) **यत्** (के भने) **मारात्मके** = घातुके (हिंस्रक) **अत्र** = अस्मिन् व्याघ्रे (यस बाघमाथि) **विश्वासः**= प्रत्ययः (विश्वास) **कृतः**= विहितः (गरियो) **तत्** (त्यो) **मया** = पथिकेन (मैले) **भद्रम्**= कल्याणम् (असल) **न कृतम्** = न विहितम् (गरिन) **इति** = इत्थम् (यस्तो) **चिन्तयन्**= विचारयन् एव, (सोच्दासोच्दै) **असौ** = पथिकः (यो बटोही) **व्याघ्रेण** = शार्दूलेन (बाघद्वारा) **व्यापादितः** = घातितः (मारियो) **खादितः** = भक्षितश्च (खाइयो पनि) **अत एव** = अस्मादेव कारणात् (यसै कारणले) **उच्यते** = कथ्यते (भनिन्छ) **कङ्कणस्य** = वलयस्य (बालाको) **लोभेन** = लिप्सया (लोभले) **सुदुस्तरे** = अतिशयदुःखेन तर्तुं शक्ये (ज्यादै दुःखले मात्र पार गर्न सकिने) **पङ्के** = कर्दमे (हिलामा) **मग्नः** = पतितः (डुबेको) **वृद्धव्याघ्रेण** = जरत्शार्दूलेन (बूढो बाघद्वारा) **संप्राप्तः** = लब्धः (फेला पारिएको) **स पथिकः** = स पान्थः (त्यो बटोही) **यथा** = येन प्रकारेण (जसरी) **मृतः** = हतः (मऱ्यो) **तथा** (त्यस्तै अवस्था) **अस्माकम्** = पारावतानाम् अपि (हाम्रो पनि) **भवेत्** = स्यात् (होला) **अतः** = अस्माद् (यसै कारण) **अविचारितम्** = सम्यक् नैवालोचितम् (राम्रोसित नसोचिएको) **कर्म** = कार्यम् (काम) **न कर्तव्यम्** = न विधातव्यम् (गर्नु हुँदैन) ।

५.२ विग्रहः = धर्मशास्त्राणि - धर्मप्रतिपादकानि शास्त्राणि, धर्मशास्त्राणि (मध्यमपद.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथास्माकमपि भवेत् । अतः सर्वथाऽविचारितं कर्म न कर्तव्यम् ।

समासः) **पुराणोपपुराणानि-** पुराणानि च उपपुराणानि च, तानि । **सुवर्ण-कङ्कणम्-** सुवर्णस्य कङ्कणम् (ष.त.) तत् । **तद्वचःप्रतीतः** - तस्य वचः (ष. त.) तेन प्रतीतः (तृ. त.) । **महापङ्के** - महान् चासौ पङ्कः, महापङ्कः (कर्मधा.) तस्मिन् । **मारात्मके** - मार आत्मा यस्य सः (बहु.) तस्मिन् । **वृद्धव्याघ्रेण** - वृद्धश्चासौ व्याघ्रः (कर्मधा.) तेन ।

५.३ **प्रकृतिप्रत्ययविच्छेदः = पठितम्** - पठ्+क्त । **श्रुतम्** - श्रु + क्त, **दानम्-** दा+ ल्युट् > अन । **प्रतीतः** - प्रति–इ + क्त । **स्नातुम्** - स्ना + तुमुन् । **कृतम्** - कृ + क्त, **चिन्तयन्** - चित् (चिन्त) + लट् > शतृ । **व्यापादितः** - वि–आ–पद्+क्त । **खादितः** - खाद् + क्त । **सर्वथा** - सर्व+ थाल् । **कर्तव्यम्** - कृ + तव्यत् । **अत्र** - इदम्+ त्रल्। **उपगम्य-** उप– गम् + क्त्वा > ल्यप् । **उक्त्वा** - वच् + क्त्वा । **धृतः** - धृ + क्त। **संप्राप्तः** - सं–प्र–आप् + क्त । **स्नात्वा** - स्ना+क्त्वा । **पतितः** - पत् + क्त । **निमग्नः** - नि – मस्ज् + क्त। **मृतः** - मृ+क्त । **दृष्ट्वा** - दृश् + क्त्वा । **गृहाण** - ग्रह + लोट् + सिप्। **लोभात्** - लुभ् + घञ् (हेत्वर्थे पञ्चमी) । **निमग्नः** - नि+मस्ज् + क्त । **पान्थः** - पथिन+ ण । **पलायितुम्** - परा + अय + तुमुन्। **पतितः** - पत् + क्त । **व्याघ्रः** - वि+आ+घ्रा+कः। **उत्थापयामि** - उद् + स्था+णिच् + लट् > मिप् । **उपगम्य-** उप+गम् + क्त्वा > ल्यप्। **अचिन्तयत्** - चिन्त+णिच् + लङ्> तिप् । **विश्वासः** - वि – श्वस् + घञ् । **व्यापादितः-** वि–आ+पद् + णिच् + क्त ।

५.४. **कोषः – दरिद्रः** निःस्वस्तु दुर्गतो दीनो दरिद्रो दुर्गतोऽपि सः। **सरः**- कासारः सरसी सरः, इत्यमरः। **पङ्कः** – निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ, इत्यमरः । **शनैः**- अद्रुतं शनैः, इत्यमरः । **पान्थः** – अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि, इत्यमरः। **भद्रम्** - श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्, इत्यमरः । **कर्म** - कर्म व्याप्ये क्रियायाञ्च पुंनपुंसकयोर्मतम्, इति रुद्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।

१. केन धर्मशास्त्राणि पठितानि ? पुराणोपपुराणानि च श्रुतानि ?
२. कस्मै दत्तं दानं सफलं जायते ?
३. व्याघ्रः किमर्थं पथिकाय सुवर्णकङ्कणं दातुमैच्छत् ?
४. पथिकः कस्मात् कारणाद् विश्वस्तोऽभवत् ?
५. पङ्के पतितः पान्थः केनोत्थापितः ?
६. कथं पान्थेन भद्रं न कृतम् ?
७. पथिकः कथं मृतः ?
८. अनेन आठेन का शिक्षा लभ्यते ?

२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

धर्मशास्त्राणि । पुराणोपपुराणानि । दुर्गतः । सफलम् । सयत्नः । सुवर्ण-कङ्कणम्। तद्वचःप्रतीतः। महापङ्के । अक्षमः । मारात्मके । अविचारितम्। सुदुस्तरे। वृद्धव्याघ्रेण ।

४ सन्धिविच्छेदं कुरुत ।

भवतीति । त्वञ्च । दुर्गतस्तेन। सयत्नोऽहम् । तदेव । यावदसौ । तद्वचः। तावन्महापङ्के। व्याघ्रोऽवदत् । निपतितोऽसि । इत्युक्त्वा । चिन्तयन्नेव । सर्वथाऽविचारितम्। एवासौ ।

५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

पठितम् । श्रुतम् । दानम् । दातुम् । प्रतीतः । स्नातुम् । कृतम् । चिन्तयन्। व्यापादितः । खादितः । सर्वथा । कर्तव्यम् । अत्र । उपगम्य । उक्त्वा । धृतः । संप्राप्तः । अविचारितम् । स्नात्वा । पतितः । निमग्नः । मृतः । दृष्ट्वा ।

६ निर्धारितपाठस्य सरलार्थं लिखत ।

७ स्वकीयवाक्येषु प्रयोगं कुरुत ।

दरिद्रेभ्यः । तुभ्यम् । स्नात्वा । दातुम् । पलायितुम् । दृष्ट्वा । चिन्तयन् । दीयते । उपगम्य । अतीव । अत्र । सरसि । भद्रम् । यथा । सर्वथा । कर्तव्यम् । यावद् । अतः । असौ । व्यापादितः । खादितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८ वाक्यसंश्लेषणं कुरुत ।

१. मया धर्मशास्त्रं पठितम् । अहं पुराणानि श्रुतवान् । त्वं दुर्गतोऽसि । अतस्तुभ्यं सुवर्णकङ्कणं दित्सामि ।

२. भो पान्थ, प्रथमं सरसि स्नाहि । इदं सुवर्णकङ्कणं मम हस्ते विद्यते । अहं तत्कङ्कणं तुभ्यं दित्सामि । त्वं गृहाण ।

३. व्याघ्रवाक्येन पान्थो विश्वस्तः । स सरसि स्नातुं गतः । स महापङ्के निमग्नः। स व्याघ्रेण धृतः । पथिकोऽचिन्तयत् । व्याघ्रेण व्यापादितः । तेन स खादितः।

९ कोष्टस्थधातूननुसृत्य रिक्तस्थानानि पूरयत ।

१. मया धर्मशास्त्राणि......................... ज्ञानं लब्धम् । (पठ्)

२. व्याघ्रः पान्थाय सुवर्णकङ्कणं............. ऐच्छत् । (दा)

३. पान्थः सरः............................... प्रविष्टवान् । (स्ना)

४. पङ्के पतितं पान्थं......................... व्याघ्रोऽवदत् । (दृश्)

५. त्वामुत्थापयामीति......................... व्याघ्रः सरः प्रविष्टवान्।(वच्)

६. व्याघ्रः शनैः पान्थम्..................... धृतवान् । (उत्-स्था)

७. धृतं पान्थं............................. व्याघ्रः खादितवान् ।(वि-आ-पद्)

१० वाक्यविश्लेषणं कुरुत ।

यावदसौ तद्वचःप्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमो वृद्धव्याघ्रेण धृतो व्यापादितः खादितश्च ।

१२ 'सर्वथाऽविचारितं कर्म न कर्तव्यम्' इत्युक्तेराशयः प्रसङ्गमनुसृत्य प्रकाशयत।

१३ रेखाङ्कितपदानां विभक्तिकारकयोर्निर्देशं कुरुत ।

१४ कर्तृकर्मपदान्यन्विष्य लिखत ।

१५ वाच्यपरिवर्तनं कुरुत ।

१. सरसि स्नात्वा सुवर्णकङ्कणं गृहाण ।

२. पङ्के पतितं त्वामहमुत्थापयामि ।

३. कङ्कणलोभेन पङ्के निमग्नः पान्थो व्याघ्रेण धृतः ।

४. व्याघ्रेण धृतः पान्थश्चिन्तितः ।

५. उत्थापितः पथिको व्याघ्रेण घातितः खादितश्च ।

१६ कमपि विषयमवलम्ब्य संवादमेकं रचयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठः पाठः

चित्रग्रीवहिरण्यककथा - ३

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह- आः किमेवमुच्यते ? आपत्काले वृद्धानां वचनं ग्राह्यं, सर्वत्रैवं विचारे तु भोजनेऽपि प्रवृत्तिर्न स्यात्। एतच्छुत्वा सर्वे कपोतास्तत्रोपविष्टा जालेन बद्धा बभूवुः । ततो यस्य वचनात्तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति स्म । तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच- नायमस्य दोषः विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र

६.१ **एतत्** = इदम् (यो) **वचनम्** = वाक्यम् (परेवाको भनाइ) **श्रुत्वा** = आकर्ण्य (सुनेर) **कश्चित्** = तेषां मध्येऽन्यतरः (कुनै) **कपोतः** = पारावतः (परेवाले) **सदर्पम्** = साभिमानम् (अभिमानका साथ) **आह** = उवाच (भन्यो) **आः** = आश्चर्यम् (आश्चर्यको विषय छ) **किम्** = किमर्थम् (किन) **एवम्** = इत्थम् (यस्तो) **उच्यते** = कथ्यते (भनिन्छ) **आपत्काले** = विपत्काले (आपत् परेको समयमा) **वृद्धानाम्** = वयोऽतीतानाम् (बूढाहरूको) **वचनम्** = वाक्यम् (भनाइ) **ग्राह्यम्** = स्वीकार्यम् (स्वीकार गर्नुपर्छ) **सर्वत्र** = सर्वस्मिन् विषये (सबै विषयमा) **एवम्** = इत्थम् (यसरी) **विचारे** = चिन्तने तु (विचार गर्ने हो भने त) **भोजने** = भक्षणे (खाने कुरामा पनि) **प्रवृत्तिः** = प्रवर्तनम् (संलग्नता) **न स्यात्** = न भवेत् (हुने छैन) **एतत्** = एकस्य कपोतस्य वचनम् (एउटा परेवाको भनाइलाई) **श्रुत्वा** = आकर्ण्य (सुनेर) **सर्वे** = निखिलाः (सबै, भएभरका) **कपोताः** = पारावताः (परेवाहरू) **तत्र** = तस्मिन् स्थाने (त्यो कनिका छरिएको ठाउँमा) **उपविष्टाः** = स्थिताः (बसे) **जालेन** = पाशेन (पाशद्वारा) **बद्धाः** = निबद्धा वभूवुः (बाँधिए) **ततः** = तदनन्तरम् (त्यसपछि) **यस्य** = कपोतस्य (जुन परेवाको) **वचनात्**= वाक्यात् (भनाइबाट) **तत्र** = जाले (पाशोमा) **अवलम्बिताः** = बद्धाः (बाधिए) **सर्वे कपोताः** (सबै परेवा) **तम्** = कपोतम् (त्यस परेवालाई) **तिरस्कुर्वन्ति स्म** = अधिक्षिपन्ति स्म (गाली गर्न थाले) **तस्य**= कपोतस्य (त्यस परेवाको) **तिरस्कारम्** = निन्दाम् (निन्दा) **श्रुत्वा** = आकर्ण्य (सुनेर) **चित्रग्रीवः** = पारावतराजः (चित्रग्रीवले) **उवाच** = आह (भन्यो) **अयम्** = एषः (यो) **अस्य** = कपोतस्य (यस परेवाको) **दोषः** = अपराधः (दोष) **न** = नास्ति (होइन) **विपत्काले** = आपत्समये (आपत्तिको समयमा) **विस्मयः**= शोकाभिव्यक्तिः (चिन्ता व्यक्त गर्नु) **कापुरुषलक्षणम्** = अधमपुरुषचिह्नम् (तुच्छ व्यक्तिको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् । इदानीमेवं क्रियताम् - सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्। इति विचिन्त्य सर्वे पक्षिणो जालमादायोत्पतिताः ।

लक्षण हो) **तत्** = तस्मात् (त्यसैले) **अत्र** = अस्मिन् समये (यस बेला) **धैर्यम्** = साहसम् (धैर्य) **अवलम्ब्य** = आश्रित्य (लिएर) **प्रतीकारः** = आपन्निवारणोपायः (आपत्ति हटाउने बाटो) **चिन्त्यताम्** = विचार्यताम् (सोच्नु पर्‍यो) **इदानीम्** = अधुना (अब) **इत्थम्** = **एवम्** (यसो) **क्रियताम्** = विधीयताम् (गरौं) **सर्वैः** = सकलैः (सबै) **जालम्** = पाशम् (पाशो) **आदाय** = गृहीत्वा (लिएर) **उड्डीयताम्** = उद्गम्यताम् (उडौं) **इति** = एतत् (यो) **विचिन्त्य** = चिन्तयित्वा (सोचेर) **सर्वे** = निखिलाः (सबै) **पक्षिणः**= खगाः (चराहरू, परेवाहरू) **जालम्** = पाशम् (पाशो) **आदाय** = गृहीत्वा (लिएर) **उत्पतिताः** = उद्गताः (उडे) ।

६.२ विग्रहः - आपत्काले - आपदः कालः (ष.त.) तस्मिन् । **विपत्काले** - विपदः कालः (ष.त.) तस्मिन् । **कापुरुषलक्षणम्** - कुत्सितः पुरुषः (गति.) तस्य लक्षणम् (ष.त.) **सदर्पम्** - दर्पेण सहितम् (बहु.) ।

६.३ प्रकृतिप्रत्ययविच्छेदः - वचनम् - वच् + ल्युट् > अन । **ग्राह्यम्** - ग्रह+ ण्यत्, **सर्वत्र** - सर्व + त्रल्, **भोजनम्** - भुज + ल्युट् > अन, **प्रवृत्तिः** - प्र-वृत्+क्तिन् । **श्रुत्वा** - श्रु + क्त्वा । **उपविष्टाः** - उप-विश् + क्त । **वद्धाः** - बध + क्त । **इदानीम्** - इदम् + दानीम् । **आदाय** - आ-दा+क्त्वा>ल्यप् । **विचिन्त्य** - वि-चित् (न्त्)+क्त्वा > ल्यप्। **उत्पतिताः** - उत्पत् + क्त ।

६.४ कोषः - आपत् - विपत्तौ विपदापदौ, इत्यमरः । **वृद्धः** - प्रवयाः स्थविरो वृद्धः, इत्यमरः । **वचनम्** - व्यवहार उक्तिर्लपितं भाषितं वचनं वचः, इत्यमरः । **जालम्**- आनायः पुंसि जालं स्यात्, इत्यमरः । **तिरस्कारः** - अनादरः परिभवः परीभावस्तिरस्क्रिया, इत्यमरः । **विस्मयः** - विस्मयोऽद्भुतमाश्चर्यम्, इत्यमरः । **चित्तम्** - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ **उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।**

१. कस्य वचनात् कपोता जालेन बद्धाः ?
२. सर्वे कं तिरस्कुर्वन्ति स्म ?
३. विपत्तौ चिन्तनीयो विषयः कोऽस्ति ?
४. अन्ते जालबद्धाः कपोताः किमकुर्वन् ?
५. कापुरुषस्य लक्षणं किमस्ति ?

२. **निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।**

३. **सविग्रहं समासनामानि लिखत ।**

आपत्काले । सदर्पम् । चित्रग्रीवः । कापुरुषलक्षणम् । एकचित्तीभूय । विपत्काले।

४. **सन्धिविच्छेदं कुरुत ।**

एतद्वचनम् । सर्वदैवम् । भोजनेऽपि । विस्मय एव । बद्धा बभूवुः । तात्रावलम्बिताः । नायम् । आदायोड्डीयताम् । एतच्छ्रुत्वा । चित्रग्रीव उवाच ।

५. **निर्धारितपाठस्य सरलार्थं लिखत ।**

६. **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

श्रुत्वा । वचनम् । उपदिष्टः । बद्धः । अवलम्ब्य । इदानीम् । आदाय । विचिन्त्य । उत्पतितः । पक्षिणः । प्रवृत्तिः । ग्राह्यम् ।

७. **वाच्यपरिवर्तनं कुरुत ।**

सर्वैः जालमादायोड्डीयताम् । प्रतीकारश्चिन्त्यताम् । आः किमेवमुच्यते । इदानीमेवं क्रियताम् । कपोतास्तं तिरस्कुर्वन्ति । आपत्काल एव वृद्धानां वचनं गृह्यते ।

८. **स्वकीयवाक्येषु प्रयोगं कुरुत ।**

श्रुत्वा । सदर्पम् । अवलम्ब्य । चिन्त्यताम् । क्रियताम् । आदाय । विचिन्त्य। उत्पतितः । पक्षिणः । एवम् । तत्र । एकचित्तीभूय । अस्य ।

९. **वाक्यविश्लेषणं कुरुत ।**

१. चित्रग्रीवस्य वचनं निशम्य क्रुद्धेन कपोतेन पारावतास्तण्डुलभक्षणाय प्रेरिताः।
२. सर्वे कपोतास्तत्रोपविष्टा जालेन बद्धास्तं तिरस्कुर्वन्ति स्म ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. चित्रग्रीवस्य वचनमनुसरन्तः कपोताः प्रतीकारोपायं चिन्तयन्तो जालमादायोत्पतितवन्तः ।

१०. **कोष्ठस्थधातूननुसृत्य रिक्तस्थानानि पूरयत ।**

१. चित्रग्रीवस्य वचनं........... कपोता आहुः । (नि-शम्)
२. एतत्.......................... सर्वे कपोतास्तत्रोपविष्टाः । (आ-कर्ण्)
३. सर्वे धैर्यं..................... प्रतीकारोपायमचिन्तयन् । (कृ)
४. कपोताः प्रतीकारोपायं........ जालमादायोद्गताः । (वि-चिन्त्)
५. सर्वे एकचित्ता जालं......... उत्पतिताः । (ग्रह्)
६. तान्........................... चित्रग्रीवो व्यरमत् । (उपदिश्)
७. चित्रग्रीवस्य वचनं............ सर्वे कपोताः सजालमुद्गताः ।(अनु-सृ)
८. कपोतानाञ्चरित्रं.............. चित्रग्रीवश्चकितः । (वि-लोक्)
९. जालम्........................ उत्पतिताः कपोताः दूरङ्गताः । (आ-दा)

११. **कमपि विषयमवलम्ब्यानुच्छेदमेकं रचयत ।**

१२. **वाक्यसंश्लेषणं कुरुत ।**

१. कपोताश्चित्रग्रीवस्य वचनं श्रुतवन्तः । तेषु कश्चन कपोतस्तस्मै, अकुप्यत् ।

२. आपत्तौ वृद्धानां वचनं समुचितं भवति । यदि सर्वत्र शङ्का क्रियते तदा लोकव्यवहार एवावरुद्धो भविष्यति । अतश्चित्रग्रीवस्य वाक्यं स्वीकर्तुं न शक्यते ।

३. सर्वे कपोता एकस्य कपोतस्य वचनं श्रुतवन्तः । ततस्तस्य वचनं समुचितं मत्वा सर्वे कपोताः तण्डुलकणानां भक्षणाय भूमौ, अवातरन् । ततस्ते जालेन बद्धा अभवन्। यस्य वचनेन ते जालेन बद्धाः सर्वे कपोतास्तमेव तिरस्कृतवन्तः।

४. चित्रग्रीवः कपोतानां तिरस्कारवचनमशृणोत् । ततः स कपोतस्य दोषं निराकृतवान् । स प्रतीकारोपायस्यान्वेषणाय प्रेरयति स्म । ततश्चित्रग्रीवस्याशयमनुसरन्तः कपोता जालमादायोत्पतितवन्तः ।

१३. **'आपत्काले विस्मय एव कापुरुषलक्षणम्' इत्यस्याशयं प्रकाशयत ।**

१४. **रेखाङ्कितपदानां विभक्तिकारकयोर्निर्देशं कुरुत ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमः पाठः

चित्रग्रीव-हिरण्यककथा - ४

अनन्तरं स व्याधः सुदूराज्जालापहारकान् तान् विलोक्य पश्चादधावत्। ततश्चक्षुविषयाक्रान्तेषु स लुब्धको निवृत्तः । तं निवृत्तं विलोक्य कपोता ऊचुः- किमिदानीं कर्तुमुचितम् ? चित्रग्रीव उवाच- अस्माकं मित्रं हिरण्यको नाम मूषकराजः गण्डकीतिरे चित्रवने वसति । सोऽस्माकं पाशाँश्छेत्स्यति । इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च सर्वदापायशङ्कया

७.१ अनन्तरम् = जालापहरणानन्तम् (जाल अपहरण गरेपछि) **सः** = प्रच्छन्नः (लुकेको) **व्याधः** = लुब्धकः (व्याधाले) **सुदूरात्** = विप्रकृष्टाद् (टाढैबाट) **जालापहार-कान्** = पाशमादायोद्गच्छतः (जाल लिएर उड्ने) **तान्** = कपोतान् (ती परेवालाई) **विलोक्य** = दृष्ट्वा (देखेर) **पश्चात्** = अनु (पछि पछि) **अधावत्** = अगच्छत् (दौडियो) **ततः** = तदनन्तरम् (त्यसपछि) **तेषु** = कपोतेषु (परेवा) **चक्षुविषयाक्रान्तेषु** = अदृष्टेषु (नदेखिने भए पछि) **स लुब्धकः** = व्याधः (त्यो व्याधा) **निवृत्तः** = प्रत्याययौ (फर्कियो) **तम्** = व्याधम् (त्यस व्याधालाई) **निवृत्तम्** = प्रत्यावृत्तम् (फर्कन लागेको) **विलोक्य**= दृष्ट्वा (देखेर) **कपोताः** = पारावताः (परेवाहरूले) **ऊचुः** = कथितवन्तः (भने) **इदानीम्**= अधुना (अव) **किं कर्तुम्** = किं विधातुम् (के गर्न) **उचितम्** = योग्यम् (उचित हुन्छ) **चित्रग्रीवः** = पारावतराजः (चित्रग्रीवले) **उवाच** = जगाद (भन्यो) **अस्माकम्** = मम (हाम्रो, मेरो) **मित्रम्** = सुहृद् (मित) **हिरण्यको नाम** = हिरण्यकसंज्ञकः (हिरण्यक नाऊँ गरेको) **मूषकराजः** = मूषकाणां राजा (मूसाहरूको राजा) **गण्डकीतीरे** = कृष्णातटे (गण्डकीको तीरमा) **चित्रवने** = तन्नामकवने (चितवनमा) **निवसति** = वासं करोति (बस्छन्) **सः** = हिरण्यकः (ती हिरण्यकले) **अस्माकम्** = कपोतानाम् (हामी परेवाको) **पाशान्**= बन्धनानि (पाशाहरू) **छेत्स्यति** = भेत्स्यति (काट्नेछन्) **इति** = इत्थम् (यस्तो) **आलोच्य** = विचार्य (सोचेर) **सर्वे** = कपोताः (सबै परेवा) **हिरण्यकविवरसमीपम्**= हिरण्यकविलप्रदेशान्तिकम् (हिरण्यक नामक मूसाको प्वाल नजिकै) **गताः** = याताः (गए) **हिरण्यकश्च** = मूषकराजोऽपि (हिरण्यक पनि) **सर्वदा** = सर्वस्मिन् काले (सँधै) **अपायशङ्कया** = अनिष्टभयेन (अनिष्टको डरले) **शतद्वारम्** = शतमार्गम् (सयओटा ढोका भएको) **विवरम्** = छिद्रम् (प्वाल) **निर्माय** = रचयित्वा (बनाएर) **निवसति स्म**=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतद्वारं विवरं निर्माय निवसति स्म । ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच - सखे हिरण्यक, किमस्मान् न संभाषसे? ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं बहिर्निस्सृत्याब्रवीत्- 'आः पुण्यवानस्मि । प्रियसुहृन्मे चित्रग्रीवः समायातः ।

वासं करोति स्म (बस्दथ्यो) **ततः** = तदनन्तरम् (परेवाको वथान हिरण्यकको प्वाल नजिकै झरेपछि) **हिरण्यकः** = मूषकराजः (हिरण्यक) **कपोतावपातभयात्** = पारावतपतनभयात् (परेवा झरेको आवाजको डरले) **चकितः** = विस्मितः (छक्क परेर) **तूष्णीम्** = निःशब्दम् (चुप्प लागेर) **स्थितः** = तस्थौ (बस्यो) **चित्रग्रीवः** = कपोतराजः (चित्रग्रीवले) **उवाच**= जगाद (भन्यो) **सखे, हिरण्यक** = भो मित्र, (हे मीत) **किम्** = केन हेतुना (किन) **अस्मान्** = कपोतान् (हामी परेवासित) **न संभाषसे** = न वदसि (बोल्नु हुन्न) **ततः** = तदनन्तरम् (त्यसपछि) **हिरण्यकः** = मूषकराजः (हिरण्यकले) **तद्वचनम्** = चित्रग्रीववाक्यम् (चित्रग्रीवको बोली) **प्रत्यभिज्ञाय** = ज्ञात्वा (थाहा पाएर) **ससंभ्रमम्** = सानन्दातिरेकम् (आनन्दले गर्दा हडबडका साथ) **बहिः** = विवराद् बाह्यम् (प्वाल बाहिर) **निस्सृत्य** = निर्गत्य (निक्लिएर) **अब्रवीत्** = अवोचत् (भन्यो) **आः** = भोः (अरे) **पुण्यवान्** = भाग्यशाली (भाग्यमानी) **अस्मि** = वर्ते (रहेछु) **मे** = मम (मेरा) **प्रियसुहृद्** = इष्टमित्रम् (प्यारा मित्र) **समायातः** = उपस्थितः (पाल्नुभयो) ।

७.२ विग्रहः - जालापहारकान् - जालस्य अपहारकाः (ष.त.) तान् । **चक्षुविषयाक्रान्तेषु** - चक्षुषां विषयः (ष.त.) तम् आक्रान्ताः (द्वि.त.) तेषु । **मूषकराजः**- मूषकानां राजा (ष.त.) । **गण्डकीतीरे** - गण्डक्याः तीरम् (ष.त.) तस्मिन् । **चित्रवने** - चित्रञ्च तद् वनम् (कर्म.) तस्मिन् । **हिरण्यकविवरसमीपम्** - हिरण्यकस्य विवरम् (ष.त.) तस्य समीपम् (ष.त.) **अपायशङ्कया** - अपायस्य शङ्का (ष.त.) तया । **शतद्वारम्**- शतं द्वाराणि यत्र (बहु.) तत् । **कपोतावपातभयात्** - कपोतानाम् अवपातः (ष.त.) तस्य भयम् (ष.त.) तस्मात् । **तद्वचनम्** - तस्य वचनम् (ष.त.) तत् । **प्रियसुहृद्** - प्रियश्चासौ सुहृद् (कर्म.) । **चित्रग्रीवः** - चित्रा ग्रीवा यस्य सः (बहु.) ।

७.३ प्रकृतिप्रत्ययविच्छेदः - विलोक्य - वि-लोक्+ क्त्वा >ल्यप् । **इदानीम्**- इदम् + दानीम् । **कर्तुम्** - कृ + तुमुन् । **आलोच्य** - आ-लोच्+क्त्वा >ल्यप् । **निर्माय**- निर् + मा+त्त्वा> ल्यप्। **स्थितः** - स्था + क्त । **प्रत्यभिज्ञाय** - प्रति-अभि-ज्ञा+क्त्वा>ल्यप्। **निस्सृत्य** - निस्-सृ+क्त्वा >ल्यप् । **पुण्यवान्** - पुण्य+मतुप् >वतुप्। **समायातः** - सम्- आ-या +क्त । **सर्वदा** - सर्व+दा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. **उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।**

१. व्याधः किमर्थमधावत् ?
२. अदृष्टेषु कपोतेषु व्याधः किमकरोत् ?
३. निवृत्तं लुब्धकं विलोक्य कपोतैः किं विचारितम् ?
४. हिरण्यकः कस्य मित्रमस्ति ? स च कुत्र वसति ?
५. हिरण्यकेन किमर्थं शतद्वारं विवरं कृतम् ?
६. चित्रग्रीवस्य वचनं श्रुत्वा हिरण्यकेन किं कृतम् ?
७. हिरण्यकः कथं चकितः ?
८. कपोताः किमर्थं चित्रवनङ्गताः ?

२. **सविग्रहं समासनामानि लिखत ।**

जालापहारकान् । चक्षुविषयाक्रान्तेषु । मूषकराजः । गण्डकीतीरे । हिरण्यकविवरसमीपम् । अपायशङ्कया । शतद्वारम् । कपोतावपातभयात् ।

३. **सन्धिविच्छेदं कुरुत**

व्याधो निवृत्तः । कपोता ऊचुः । सोऽस्माकम् । इत्यालोच्य । हिरण्यकश्च। सर्वदाऽपायशङ्कया । भयाच्चकितः । सुहृन्मे । तद्वचनं । प्रत्यभिज्ञाय ।

४. **निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।**

५. **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

दृष्ट्वा । निवृत्तः । कर्तुम् । आलोच्य । गतः । निर्माय । सर्वदा । स्थितः । प्रत्यभिज्ञाय । निस्सृत्य । पुण्यवान् । आयातः ।

६. **स्वकीयवाक्येषु प्रयोगं कुरुत ।**

विलोक्य । निवृत्तः । दृष्ट्वा । तूष्णीम् । प्रत्यभिज्ञाय । निस्सृत्य । कृत्वा । ससंभ्रमम् । पश्चाद् । इदानीम् ।

७. **निर्धारितगद्यभागस्य सरलार्थं लिखत ।**

८. **वाच्यपरिवर्तनं कुरुत ।**

व्याधो जालापहारकान् तानपश्यत् । कपोतैः लुब्धकः दृष्टः । हिरण्यकः कपोतानां पाशाँश्छेत्स्यति । हिरण्यकेन शतद्वाराणि विवराणि कृतानि । हिरण्यकश्चित्रग्रीवस्य वचनं प्रत्यभिज्ञातवान् । सर्वे कपोताः पाशच्छेदोपायमालोचितवन्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९. वाक्यविश्लेषणं कुरुत ।

१. अनन्तरं स व्याधः सुदूराज्जालापहारकान् तान् विलोक्य पश्चादधावत् ।

२. लुब्धकं निवृत्तं विलोक्य कपोताः पाशच्छेदनाय गण्डकीतीरे चित्रवने वसतो हिरण्यकस्य समीपं गतवन्तः ।

३. कपोतावपातभयात्तूष्णीं स्थितो हिरण्यकश्चित्रग्रीवस्य वचनं निशम्य ससंभ्रमं बहिर्निसृत्य तत्समीपङ्गतवान् ।

१०. वाक्यसंश्लेषणं कुरुत ।

१. कपोताः जालमादायोद्गताः । व्याधो दूरादेव तानपश्यत् । ततः स पश्चादधावत्। कपोता अदृश्याः सञ्जाताः । व्याधो निवृत्तः ।

२. कपोता लुब्धकं निवृत्तं ज्ञातवन्तः । ततस्ते प्रतीकारोपायमचिन्तयन् । कपोता जालच्छेदाय चित्रवनङ्गताः । चित्रवनञ्च गण्डकीतीरे आसीत् । तत्र हिरण्यकः प्रतिवसति स्म । स च मूषकानां राजासीत् ।

३. चित्रग्रीवस्य वचनं हिरण्यकः श्रुतवान् । ततः स विवराद् बहिरागतवान् । निसृते च तस्मिन् चित्रग्रीवो हिरण्यकमपश्यत् । हिरण्यकश्च चित्रग्रीवं विलोक्य परां मुदमलभत ।

११. रेखाङ्कितपदानां विभक्तिकारकयोर्निर्देशं कुरुत ।

१२. कोष्ठस्थधातूननुसृत्य रिक्तस्थानानि पूरयत ।

१. इति.......................... कपोता हिरण्यकविवरङ्गताः । (आ-लोच्)

२. हिरण्यकश्चित्रग्रीवस्य वचनं............ बहिर्निगतः । (प्रति-अभि-ज्ञा)

३. हिरण्यकः शतद्वारं विवरं............... वसति स्म । (कृ)

४. हिरण्यको विवरात्...................... चित्रग्रीवं दृष्टवान् । (नि.सृ.)

५. कपोता लुब्धकं निवृत्तं................. ऊचुः । (दृश्)

६. जालापहारकान् तान्.................... पश्चादधावत् । (वि-लोक्)

७. इति...................... सर्वे हिरण्यकविवरसमीपङ्गताः । (आ-लोक्)

८. इदानीं किं.............. उचितम् । (कृ)

१३. चित्रग्रीवहिरण्यकयोः संवादमेकं रचयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः पाठः

चित्रग्रीव-हिरण्यककथा - ५

पाशाबद्धाँश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा हिरण्यक उवाच- सखे, किमेतत् ? चित्रग्रीवोऽवदत्- अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्। एतच्छुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । चित्रग्रीव उवाच- मा मैवम् । अस्मदाश्रितानामेषान्तावत् पाशांश्छिन्धि तदनु मम पाशान् पश्चात् छेत्स्यसि । हिरण्यकोऽप्याह- अहमल्पशक्तिः, दन्ताश्च मे कोमलाः, तदेतेषां

८.१ **पाशबद्धान्** = जालसंमितान् (पाशाले बाधिएका) **एतान्** = कपोतान् (यी परेवालाई) **दृष्ट्वा** = विलोक्य (देखेर) **सविस्मयः** = साश्चर्यः (चकित भएर) **क्षणम्** = किञ्चित्कालम् (केही समय) **स्थित्वा** = प्रतिपाल्य (रहेर - चुप लागेर) **हिरण्यकः** = मूषकराजः (मूसाको राजा हिरण्यकले) **उवाच** = जगाद (भन्यो) **सखे** = भो मित्र (हे मितज्यू) **एतत्** = पाशबन्धनम् (यो पाशोमा बाधिने काम) **किम्** = कथम् (कसरी भयो) **चित्रग्रीवः** = कपोतराजः (चित्रग्रीवले) **अवदत्** = अकथयत् (भन्यो) **सखे** = भो मित्र, **एतत्** = इदम् (यो) **अस्माकम्** = कपोतानाम् (हामी परेवाको) **प्राक्तनजन्मकर्मणः**= पूर्वस्मिन् जन्मनि कृतस्य पापकृत्यस्य (पूर्वजन्ममा गरेका पापकर्मको) **फलम्**= भोगः (फल हो) **एतत्** = चित्रग्रीववचनम् (चित्रग्रीवको भनाइ) **श्रुत्वा** = निशम्य (सुनेर) **हिरण्यकः**= मूषकराजः (हिरण्यक) **चित्रग्रीवस्य** = कपोतराजस्य (चित्रग्रीवको) **बन्धनम्**= पाशम् (पासोलाई) **छेत्तुम्** = भेत्तुम् (काट्न) **सत्वरम्** = शीघ्रम् (छिटो) **उपसर्पति** = समीपं गच्छति (नजिकै जान्छ) **चित्रग्रीवः** = कपोतराजः (चित्रग्रीवले) **उवाच** = आह (भन्यो) **मित्र**= सखे (हे मीत) **मा मैवम्** = एवं न कुरु (यसो नगर्नुहोस्) **अस्मदाश्रितानाम्**= मदाश्रयाणाम् (मेरो आश्रयमा रहेका) **एषाम्** = कपोतानाम् (यी परेवाको) **पाशान्** = जालानि (पाशालाई) **तावत्** = आदौ (पहिले) **छिन्धि** = भिन्धि (काट्नुहोस्) **तदनु**= तत्पश्चात् (त्यसपछि) **मम** = चित्रग्रीवस्य (मेरो) **पाशान्** = जालानि (पाशो) **छेत्स्यसि**= द्विधा करिष्यसि (काट्नु हुनेछ) **हिरण्यकः** = मूषकराजोऽपि (मूसाले पनि) **आह** = उवाच (भन्यो) **अहम्** = हिरण्यकः (म) **अल्पशक्तिः** = लघुशक्तिः (थोरै शक्ति भएको छु) **मे**= मम (मेरा) **दन्ताः** = दशनाश्च (दाँतहरू पनि) **कोमलाः** = मृदुलाः (कमला छन्) **तत्** = तस्माद् (त्यसैले) **एतेषाम्** = कपोतानाम् (यी परेवाको) **पाशान्** =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाशान् छेत्तुं कथं समर्थः । तदपि यावन्मे दन्ता न त्रुट्यन्ति तावत् प्रथमं तव पाशान् छिनद्मि, तदनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि । चित्रग्रीव उवाच- अस्त्वेवम्, तथापि प्रथमं यथाशक्त्येतेषां बन्धनं खण्डय । हिरण्यकेनोक्तम्- आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम्। चित्रग्रीव उवाच- नीतिस्तावदीदृश्येव । किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः। तेनेदं ब्रवीमि । इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः

जालानि (पाशाहरूलाई) **छेत्तुम्** = भेत्तुम् (काट्न) **कथम्** = केन प्रकारेण (कसरी) **समर्थः** = शक्तः (सक्दछु) **तदपि** = तथापि (तैपनि) **यावत्** = यत्कालपर्यन्तम् (जहाँसम्म) **मे** = मम (मेरा) **दन्ताः** = दशनाः (दाँतहरू) **न त्रुट्यन्ति** = स्थानभ्रष्टा न भवन्ति (टुट्दैनन्) **तावत्** = तत्कालपर्यन्तम् (त्यहाँसम्म) **प्रथमम्** = आदौ (पहिले) **तव** = भवतः (तपाईंको) **पाशान्** = जालानि (पाशालाई) **छिनद्मि** (काट्छु) **तदनन्तरम्** = तत्पश्चात् (त्यसपछि) **यथाशक्ति** = यावच्छक्यम् (शक्ति अनुसार) **एषाम् अपि** = कपोतानाम् अपि (यी परेवाको पनि) **बन्धनम्**= पाशान् (पाशालाई) **छेत्स्यामि**= भेत्स्यामि (काट्नेछु) **चित्रग्रीवः**:= कपोतराजः (चित्रग्रीवले) **उवाच** = जगाद (भन्यो) **एवमस्तु**= इत्थं भवतु (ठीकै हो) **तथापि** = तदपि (तै पनि) **यथाशक्ति** = यावच्छक्यम् (जति सकिन्छ) **प्रथमम्** = आदौ (पहिले) **एतेषाम्** = कपोतानाम् (यी परेवाहरूको) **बन्धनम्**= पाशान् (पाशालाई) **खण्डय** = छिन्धि (काट्नुहोस्) **हिरण्यकेन** = मूषकराजेन (हिरण्यकले) **उक्तम्** = कथितम् (भन्यो) **आत्मपरित्यागेन** = स्वरक्षणम् अकृत्वा (आफ्नो रक्षा नगरी) **यत्** (जुन) **आश्रितानाम्** = परिवाराणाम् (परिवारको) **रक्षणम्** = परित्राणम् (रक्षा गर्नु) **तत्** (त्यो) **नीतिविदाम्** = नीतिज्ञानाम् (नीतिज्ञहरूको) **न सम्मतम्** = नेष्टम् (मत छैन) **चित्रग्रीवः** = कपोतराजः (चित्रग्रीवले) **उवाच** = आह (भन्यो) **नीतिः** = नयः (नीति) **ईदृशी** = एतादृश्येव (यस्तै हुन्छ) **किन्तु** = परन्तु (तर) **अहम्** = कपोतराजः (म) **अस्मदाश्रितानाम्** = निजपरिवाराणाम् (आफ्ना परिवारको) **दुःखम्** = क्लेशम् (दुःख) **सोढुम्**= सहनं कर्तुम् (सहन) **सर्वथा** = सर्वप्रकारेण (सबै किसिमबाट) **असमर्थः**:= अशक्तः (सक्दिन) **तेन** = कारणेन (त्यसैले) **इदम्**= एतत् (यो कुरा) **ब्रवीमि**= कथयामि (भन्दै छु) **इति** = चित्रग्रीववचनम् (चित्रग्रीवको यो भनाइ) **आकर्ण्य** = श्रुत्वा (सुनेर) **प्रहृष्टमनाः** = प्रसन्नचेताः (खुशी भएको) **हिरण्यकः** = मूषकराजः (हिरण्यकले) **पुलकितः सन्** = रोमाञ्चितः सन् (पुलकित भएर) **अब्रवीत्** = अकथयत् (भन्यो) **मित्र** (मितज्यू)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्नब्रवीत् -मित्र, साधु, अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते । एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि। ततो हिरण्यकः सर्वान् सादरं संपूज्याह- सखे चित्रग्रीव, सर्वथात्र जालबन्धनविधौ दोषमाशङ्क्यात्मनि, अवज्ञा न कर्तव्या। इति प्रबोध्यातिथ्यञ्च कृत्वा संप्रेषितश्चित्रगुप्तो यथेष्टदेशान्

साधु = शोभनमुक्तम् (ठीक भन्नुभयो) **अनेन** = एतेन (यो) **आश्रितवात्सल्येन** = परिवारस्नेहेन (परिवारको स्नेहले गर्दा) **त्रैलोक्यस्य** = स्वर्गमर्त्यपातालानाम् (स्वर्ग मर्त्य र पाताल तीनै लोकको) **प्रभुत्वम्** = स्वामित्वम् (मालिक हुनु) **त्वयि** = भवति (तपाइँमा) **युज्यते**= उपयुक्तो भवति (उपयुक्त हुन्छ) **एवम्** = इत्थम् (यो कुरा) **उक्त्वा** = कथयित्वा (भनेर) **तेन** = हिरण्यकेन (हिरण्यकबाट) **सर्वेषाम्** = कपोतानाम् (सबै परेवाका) **बन्धनानि**= जालानि (जालहरू) **छिन्नानि**= भिन्नानि (काटिए) **ततः**= तदनन्तरम् (त्यसपछि) **हिरण्यकः** = मूषकराजः (हिरण्यकले) **सर्वान्** = कपोतान् (सबै परेवालाई) **सादरम्** = आदरपूर्वकम् (आदरका साथ) **संपूज्य** = सत्कृत्य (सत्कार गरेर) **आह** = उवाच (भन्यो) **सखे** = मित्र चित्रग्रीव (हे मित्र चित्रग्रीव) **अत्र** = अस्मिन् (यो) **जालबन्धनविधौ** = पाशनियन्त्रणकार्ये (जाल बाधिने कार्यमा) **दोषम्** = अपमानम् (अपमान भयो भन्ने) **आशङ्क्य** = संभाव्य (विचार गरेर) **सर्वथा** = सर्वप्रकारेण (सबै किसिमले) **आत्मनि** = स्वस्मिन् (आफूमाथि) **अवज्ञा** = हीनताबोधः (हीनताबोध) **न कर्तव्या** = न विधेया (नगर्नू) **इति**= इत्थम् (यसरी) **प्रबोध्य** = आश्वास्य (संझाएर) **आतिथ्यम्** = अतिथिसत्कारम् (अतिथि-सत्कार) **कृत्वा** = विधाय (गरेर) **आलिङ्ग्य**= आश्लिष्य (अङ्कमाल गरेर) **तेन**= हिरण्यकेन (हिरण्यकद्वारा) **संप्रेषितः** = विसर्जितः (विदा गरिएको) **चित्रग्रीवः**= कपोतराजः (चित्रग्रीव) **सपरिवारः** = सबान्धवः (परिवारका साथ) **यथेष्टदेशान्** = स्वाभिलषितस्थानानि (आफूलाई मन परेका स्थानहरूमा) **ययौ** = जगाम (गयो) **हिरण्यकः** = मूषकराजोऽपि, **स्वविवरम्**= निजविलम् (आफ्नो प्वालमा) **प्रविष्टः** = विवेश (पस्यो) ।

८.२ विग्रहः - **पाशबद्धाः** - पाशैः बद्धाः (तृ.त.) तान्। **सविस्मयः** - विस्मयेन सहितः (बहु.) **प्राक्तनजन्मकर्मणः**- प्राक्तनञ्च तज्जन्म (कर्म) तस्य कर्म (ष. त.) तस्य। **अल्पशक्तिः** - अल्पा शक्तिः यस्य सः (बहु.) । **आत्मपरित्यागेन** - आत्मनः परित्यागः (ष.त.) तेन । **नीतिविदाम्** - नीतिं विदन्तीति (उपपद.त.) तेषाम् । **प्रहृष्टमनाः**- प्रहृष्टं मनः यस्य सः (बहु.) । **आश्रितवात्सल्यम्** - आश्रितानां वात्सल्यम् (ष.त.) तेन। **सादरम्**- आदरेण सहितम् (बहु.)। **जालबन्धनविधौ** - जालानाम् बन्धनम् (ष.त.) तस्य विधिः (ष.त.) तस्मिन् । **यथेष्टदेशम्**- इष्टश्चासौ देशः (कर्म.), इष्टदेशमनतिक्रम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपरिवारो ययौ । हिरण्यकोऽपि स्वविवरं प्रविष्टः ।

(अव्य.) । **सपरिवारः** - परिवारैः सहितः (बहु.) । **स्वविवरम्** - स्वस्य विवरम् (ष.त.) । **यथाशक्ति** - शक्तिमनतिक्रम्य (अव्य.) ।

८.३ प्रकृतिप्रत्ययविच्छेदः - **दृष्ट्वा** - दृश् + क्त्वा । **श्रुत्वा** - श्रु + क्त्वा । **स्थित्वा** - स्था + क्त्वा । **बध्वा** - बध् + क्त्वा । **छेत्तुम्** - छिद् + तुमुन् । **आश्रितः** - आ-श्रि-क्त । **रक्षणम्** - रक्ष् + ल्युट् > अन । **आकर्ण्य** - आ-कर्ण+क्त्वा> ल्यप् । **वात्सल्यम्** - वत्सल + ष्यञ् । **प्रभुत्वम्** - प्रभु + त्व । **त्रैलोक्यम्** - त्रिलोकी+ ष्यञ् । **उक्त्वा** - वच् + क्त्वा । **आशङ्क्य** - आ-शक्(शङ्क्) + क्त्वा > ल्यप् । **प्रबोध्य** - प्रबुध् + णिच् +क्त्वा > ल्यप् । **आतिथ्यम्** - अतिथि + ञ्य । **संप्रेषितः** - सम् - प्रेष् + क्त । **सोढुम्** - सह + तुमुन् । **संपूज्य** - सं-पूज +क्त्वा > ल्यप् । **नीतिः**- नी + क्तिन् ।

८.४ कोषः – **पाशः** – पाशस्तु मृगपश्वादिबन्धने, इति हैमः । **कोमलम्** – सुकुमारन्तु कोमलं मृदुलं मृदु, इत्यमरः । **दन्तः** – रदना दशना दन्ता रदाः, इत्यमरः । **दुःखम्** – पीडा बाधा व्यथा दुःखम्, इत्यमरः । **अवज्ञा**– अनादरः परिभवः परीभावस्तिरस्क्रिया । रीढावमाननावज्ञावहेलनमसूर्क्षणम्, इत्यमरः । **जन्म** – जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः, इत्यमरः । **शक्तिः** – शक्तिरायुधभेदे स्यादुत्साहादौ बले स्त्रियाम्, इत्यमरः । **मित्रम्** – अथ मित्रं सखा सुहृद्, इत्यमरः । **आतिथ्यम्** – क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि, इत्यमरः । **विवरम्** – कुहरं शुषिरं विवरं बिलम् । छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. उपरितनलिखितगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत।

१. हिरण्यकः किमर्थञ्चकितः ?
२. जालबद्धं चित्रग्रीवं विलोक्य हिरण्यकेन किं कृतम् ?
३. केषां दुःखं सोढुं न शक्यते ?
४. हिरण्यकः कस्य हेतोः पुलकितः ?
५. कपोतानां बन्धनानि केन छिन्नानि ?
६. नीतिविदां संमतं किं नास्ति ?
७. चत्रग्रीवे कथं त्रैलोक्यस्य प्रभुत्वं युज्यते ?
८. हिरण्यकेन किं कृत्वा चित्रग्रीवः प्रेषितः ?
९. चित्रग्रीवः कुत्र गतवान् ?
१०. अल्पशक्तिः कः, दन्ताश्च कस्य कोमलाः सन्ति ?
११. अनेन पाठेन का शिक्षा लभ्यते ?

२. निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३. सविग्रहं समासनामानि लिखत ।

पाशबद्धान् । सविस्मयः । अल्पशक्तिः । यावच्छक्यम् । आत्मपरित्यागेन। नीतिविदाम् । प्रहृष्टमनाः। आश्रितवात्सल्येन । सादरम् । जालबन्धनविधौ। यथेष्टदेशान्। सपरिवारः । स्वविवरम् । यथाशक्ति ।

४. सन्धिविच्छेदं कुरुत ।

चैतान् । हिरण्यक उवाच । बद्धाँश्चैतान् । मैवम् । यावच्छक्यम् । पाशाँश्छिन्धि। हिरण्यकोऽपि । अप्याह । अस्त्वेवम् । यथाशक्त्येषाम् । नीतिस्तावत् । ईदृश्येव। किन्त्वहम्। सर्वथासमर्थः । इत्याकर्ण्य । सन्नब्रवीत् । त्रैलोक्यस्यापि । संपूज्याह। तेनेदम् । सर्वथात्र । ततो हिरण्यकः । आशङ्क्यात्मनि । प्रबोध्यातिथ्यम् । संप्रेषितश्चित्रगुप्तः । हिरण्यकोऽपि ।

५. प्रकृतिप्रत्ययविच्छेदं कुरुत ।

दृष्ट्वा । स्थित्वा । श्रुत्वा । बन्धनम् । छेत्तुम् । आश्रितः । रक्षणम् । आकर्ण्य । वात्सल्यम् । प्रभुत्वम् । त्रैलोक्यम् । उक्त्वा । आशङ्क्य । प्रबोध्य । आतिथ्यम् । संप्रेषितः । प्रविष्टः । सोढुम् । संपूज्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. **निर्धारितपाठस्य सरलार्थं लिखत ।**

७. **वाक्यसंश्लेषणं कुरुत ।**

कपोताः पाशबद्धा आसन् । हिरण्यकस्तान् दृष्टवान् । हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुमुपासर्पत् ।

८. **वाच्यपरिवर्तनं कुरुत ।**

१. हिरण्यको जालबद्धान् कपोतानपश्यत् ।
२. तावदेतेषां पाशान् छिन्धि, ततो मम छेत्स्यसि ।
३. हिरण्यकेन सर्वेषां बन्धनानि छिन्नानि ।
४. मूषकेनातिथ्यं कृत्वा सपरिवारश्चित्रग्रीवः संप्रेषितः ।
५. हिरण्यकः स्वविवरं प्राविशत् ।

९. **वाक्यविश्लेषणं कुरुत ।**

१. कपोतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा हिरण्यकश्चित्रग्रीवस्य पाशान् छेत्तुं सत्वरमुपसृतवान् ।
२. हिरण्यकः कपोतान् सादरं संपूज्य तान् प्रबोध्यातिथ्यं कृत्वा संप्रेष्य च स्वविवरं प्रविष्टः ।

१०. **निर्धारितपाठान्तर्गतानि क्रियापदानि विलिख्य वाक्येषु प्रयोगञ्च कुरुत।**

११. **कर्तृपदानि कर्मपदानि चान्विष्य लिखत ।**

१२. **निम्नलिखितपदानां वर्गं निर्धारयत-**

पाशबद्धान् । एतान् । दृष्ट्वा । सविस्मयः । स्थित्वा । अस्माकम् । कर्मणः । फलम्। एतत् । अवदत् । पाशान् । आह । तावत् । तदनु । कोमलाः । छेत्तुम् । कथम् । बन्धनम् । दन्ताः । तव । छिनद्मि । अस्तु । यथाशक्ति । दुःखम् । सोढुम्। नीतिविदाम् । कृत्वा । सर्वान् । सपरिवारः । ययौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमः पाठः

लघुपतनक-हिरण्यककथा - १

अथ लघुपतनकनामा काकः सर्ववृतान्तदर्शी साश्चर्यमिदमाह-अहो हिरण्यक, श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि । अतो मां मैत्र्येणानुग्रहीतुमर्हसि । एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह-कस्त्वम्? काको ब्रूते- लघुपतनकनामा वायसोऽहम् । हिरण्यको विहस्याह- का त्वया सह मैत्री ? भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं भवति यथा शृगालात्पाशबद्धो

९.१ **अथ** = अनन्तरम् (यसपछि) **लघुपतनकनामा** = तदाख्यः (लघुपतनक नाम गरेको) **सर्ववृत्तान्तदर्शी** = चित्रग्रीवहिरण्यकयोर्वृतान्तं पश्यन् (चित्रग्रीव र हिरण्यकको सबै वृत्तान्त थाहा पाउने) **काकः** = वायसः (कागले) **साश्चर्यम्** = सचकितम् (छक्क पर्दै) **इदम्** = कथ्यमानम् (तल भनिने कुरा) **आह** = उवाच (भन्यो) **अहो हिरण्यक** = भो मूषकराज, (हे हिरण्यक) **श्लाघ्योऽसि** = धन्योऽसि (धन्य छौ) **अतः** = अस्मात् कारणात् (यसैले) **अहम्** = लघुपतनकः (म पनि) **त्वया** = भवता (तपाईंसित) **मैत्रीम्**= सख्यम् (मित्रता) **इच्छामि** = अभिलषामि (चाहन्छु) **अतः** = अस्माद् कारणात् (यसैले), **माम्** = लघुपतनकम् (मलाई) **मैत्र्येण** = सख्येन (मित्रताद्वारा) **अनुग्रहीतुम्** = अनुग्रहं विधातुम् (अनुग्रह गर्न) **अर्हसि** = योग्योऽसि (योग्य छौ) **एतत्** = इदम् (यो लघुपतनकको भनाइ) **श्रुत्वा**= आकर्ण्य (सुनेर) **हिरण्यकोऽपि** = मूषकराजोऽपि (हिरण्यकले पनि) **विवराभ्यन्तरात्** = बिलमध्यात् (प्वाल भित्रबाटै) **आह** = उवाच (भन्यो) **त्वम्** = भवान् (तपाइँ) **कः** (को हुनुहुन्छ) **काकः** = वायसः (कागले) **ब्रूते** = कथयति (भन्दछ)। **लघुपतननामा** = लघुपतनकनामकः (लघुपतनामक) । **वायसः** = काकः (काग) **अस्मि** (हुँ) **हिरण्यकः** = मूषकराजः (हिरण्यकले) **विहस्य** = हासं कृत्वा (हाँसेर) **आह** = उवाच (भन्यो) **त्वया** = काकेन सह (तपाइँ कागसित) **का** = कीदृशी (कस्तो) **मैत्री** = सख्यम् भवति (मित्रता हुन्छ) **भक्ष्यभक्षकयोः** = खाद्यखादकयोः (खाइने र खानेको) **मैत्री** = सख्यम् (मित्रता) **विपत्तेः** = आपदः (आपत्तिको) **कारणम्** = हेतुः (कारण) **भवति** = जायते (हुन्छ) **यथा** = येन प्रकारेण (जसरी) **शृगालात्** - जम्बुकात् (श्यालबाट, अर्थात् उसको योजनाबाट) **पाशबद्धः** = जालबद्धः (जालमा फसेको) **मृगः** = हरिणः (मृग) **काकेन** = वायसेन (कागद्वारा) **रक्षितः** = पालितः (रक्षा गरियो) **वायसः**= काकः (कागले) **आह** = उवाच (भन्यो) **एतत्** = **इदम्** (यो कुरा) **कथम्** = केन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृगः काकेन रक्षितः । वायस आह- कथमेतत् ?

प्रकारेण जातम् (कसरी भयो) ।

९.२ विग्रहः - **लघुपतनकनामा** - लघुपतनकः नाम यस्य सः (बहु.) । **सर्ववृतान्तदर्शी** - सर्वे च ते वृत्तान्ताः (कर्म.) तान् पश्यतीति (उप.त.) सः । **साश्चर्यम्**- आश्चर्येण सहितम् (बहु.) । **विवराभ्यन्तराद्** - विवराणां आभ्यन्तरम् (ष.त.) तस्मात्। **भक्ष्यभक्षकयोः** - भक्ष्यश्च भक्षकश्च (द्व.स.) तयोः । **पाशबद्धः** - पाशैः बद्धः (तृ.त.)।

९.३ **प्रकृतिप्रत्ययविच्छेदः** - **श्लाघ्यः** - श्लाघ् + यत् । **मैत्री** - मित्र + इञ्। **अनुग्रहीतुम्** - अनु - ग्रह् + तुमुन् । **विहस्य**- विहस् + क्त्वा > ल्यप् । **विपत्तिः** - वि- पद् + क्तिन् । **कारणम्** - कृ + ल्युट् > अन । **प्रीतिः** - प्री + क्तिन् । **बद्धः** - वध् + क्त । **रक्षितः** - रक्ष् + क्त । **भक्ष्यः** - भक्ष् + यत् । **भक्षकः** - भक्ष्+ ण्वुल् > अक ।

९.४ **कोषः** – **प्रीतिः** – मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसंमदाः, इत्यमरः । **विपत्तिः**- विपत्तौ विपदापदौ, इत्यमरः । **विवरम्** - विवरं दूषणे गर्ते इति विश्वः । **आश्चर्यम्** - विस्मयोऽद्भुतमाश्चर्यम्, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ **उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।**

१. लघुपतनकः कीदृशोऽस्ति ?
२. स केन सह मैत्रीमिच्छति ?
३. काकः केनानुग्रहीतुं हिरण्यकं निवेदयति ?
४. विपत्तेः कारणं किम् ?
५. कयोः प्रीतिर्न भवति ? कश्चात्र दृष्टान्तः ?

२ **निर्धारितपाठान्तर्गतपदानां केवलं पर्यायशब्दान् लिखत ।**

३ **सविग्रहं समासनामानि लिखत ।**

लघुपतनकनामा । सर्ववृतान्तदर्शी । साश्चर्यम् विवराभ्यन्तराद् । भक्ष्य-भक्षकयोः ।

४ **सन्धिविच्छेदं कुरुत, सूत्राणि च लिखत ।**

श्लोघ्योऽपि । अतोऽहम् । मैत्र्येणानुग्रहीतुम् । हिरण्यकोऽपि । आभ्यन्तरादाह। कस्त्वम् । विहस्याह । बद्धोऽसौ । वायस आह ।

५ **प्रकृतिप्रत्यविच्छेदं कुरुत ।**

श्लाघ्यः । मैत्रीम् । विहस्य । प्रीतिः । बद्धः । रक्षितः । कारणम् । भक्षकः। भक्ष्यः।

६ **निर्धारितपाठस्य सरलार्थं लिखत ।**

७ **वाच्यपरिवर्तनं कुरुत ।**

काक इदमकथयत् । अहं त्वया सह मैत्रीं वाञ्छामि । हिरण्यकेन विवराभ्यन्तरादुक्तम् । पाशबद्धो मृगः काकेन रक्षितः । काकेनोक्तम् ।

८. **निम्नलिखितपदानां वर्गं निर्धारयत-**

काकः। साश्चर्यम् । इदम् । आह । अहो । श्लाघ्यः। अतः । त्वया । मैत्रीम्। एतत्। काकः । विपत्तेः । भवति । ब्रूते । विहस्य । माम् । अर्हसि । शृगालात् । हिरण्यकः । का । यथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमः पाठः

चित्राङ्ग - सुबुद्धि - क्षुद्रबुद्धिकथा - १

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचिच्छृगालेनावलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत्- आः कथमेतन्मांसं सुललितं भक्षयामि। भवतु, तावद् विश्वासमुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् - मित्र, कुशलन्ते? मृगेणोक्तम्- कस्त्वम् ? क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो

१०.१ **मगददेशे** = मगधनामके जनपदे (मगध देशमा) **चम्पकवती** = तन्नाम्नी (चम्पकवती नामक) **अरण्यानी** = महद्वनम् (ठूलो जङ्गल) **अस्ति** = वर्तते (छ) **तस्याम्** = अटव्याम् (त्यस ठूलो जङ्गलमा) **चिराद्** = बहुकालाद् (धेरै समयदेखि) **मृगकाकौ** = हरिणवायसौ (मृग र काक) **महता स्नेहेन** = अतिशयप्रेम्णा (ज्यादै प्रेमले) **निवसतः** = वासं कुरुतः (बस्दथे) **स च** = पूर्वोक्तः (त्यो) **स्वेच्छया** = निजाभिलाषया (आफ्नो इच्छाले) **भ्राम्यन्** = अटन् (घुमिरहेको) **हृष्टपुष्टाङ्गः** = हृष्टपुष्टावयवः (हृष्टपुष्ट अङ्ग भएको) **मृगः** = हरिणः (मृगलाई) **केनचित्** = अपरिचितेन (कुनै) **शृगालेन** = गोमायुना (स्यालले) **अवलोकितः** = दृष्टः (देख्यो) **तम्** = मृगम् (त्यस्तो मृगलाई) **दृष्ट्वा** = विलोक्य (देखेर) **शृगालः** = गोमायुः (स्यालले) **अचिन्तयत्** = विचारयति स्म (विचार गर्‍यो) **आः** = अहो (अहो) **सुललितम्** = अतीव कोमलम्, **एतन्मांसम्** = मृगामिषम्, (मृगको मासु) **कथम्** = कया रीत्या (कसरी) **भक्षयामि** = खादामि (खाउँ) **भवतु** = अस्तु (भैगयो) **तावत्** = आदौ (पहिले) **विश्वासम्** = प्रत्ययम् (विश्वास) **उत्पादयामि** = जनयामि (उत्पन्न गर्छु) **इति** = एतत् (यो कुरा) **आलोच्य** = विचार्य (सोचेर) **उपसृत्य** = मृगस्य समीपं गत्वा (मृगको नजिकै गएर) **सः** = शृगालः (त्यस स्यालले) **अब्रवीत्** = अकथयत् (भन्यो) **भो मित्र** = हे सखे, (हे मित्र) **ते** = तव (तिम्रो) **कुशलं वर्तते** = क्षमं विद्यते (कुशलता छ) **मृगेण** = हरिणेन (मृगले) **उक्तम्**= कथितम् (भन्यो) **त्वम्** = भवान् (तपाइँ) **कोऽसि** (को हुनुहुन्छ) **स शृगालः** = स गोमायुः (त्यो स्याल) **कथयति** = ब्रूते (भन्छ) **क्षुद्रबुद्धिनामा** = तदाख्यः (क्षुद्रबुद्धि नाम गरेको) **जम्बुकः** = शृगालः (स्याल) **अस्मि** (हुँ) **अत्र** = अस्मिन् (यो) **अरण्ये**= वने (जङ्गलमा) **बन्धुहीनः** = बान्धवरहित (दाजुभाइ विना नै) **मृतवत्** = पञ्चत्वङ्गत इव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया सर्वथा वर्तितव्यम् । मृगेणोक्तम्- एवमस्तु । ततः पश्चादस्तङ्गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिङ्गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति स्म । तौ दृष्ट्वा काकोऽवदत्-सखे, चित्राङ्ग, कोऽयं द्वितीयः? मृगो ब्रूते- अयं

(मरेजस्तै भएर) **निवसामि** = तिष्ठामि (रहन्छु) **इदानीम्** = सांप्रतम् (अहिले) **त्वाम्** = भवन्तम् (तपाईँलाई) **मित्रम्** = सखायम् (मित्रको रूपमा) **आसाद्य** = प्राप्य (पाएर) **पुनः** = भूयः (फेरि) **सबन्धुः** = बान्धवसहितः (दाजुभाइका साथ) **जीवलोकम्** = संसारम् (संसारमा) **प्रविष्टः** = प्राविशम् (पसें) **अधुना** = सांप्रतम्, (यस अवस्थामा) **मया** = शृगालेन (मैले) **तव** = भवतः (तपाइँको) **सर्वथा** = सर्वप्रकारेण (हरतरहले) **अनुचरेण** = भृत्येन (नोकर भएर) **वर्तितव्यम्** = स्थातव्यम् (रहनुपर्छ) **मृगेण** = हरिणेन (मृगले) **उक्तम्** = कथितम् (भन्यो) **एवमस्तु** = इत्थम् भवतु (ठीकै छ) **ततःपश्चात्** = तदनन्तरम् (त्यसपछि) **भगवति** (भगवान्) **मरीचिमालिनि** = किरणमालिनि (किरण भएका) **सवितरि** = सूर्ये (सूर्य) **अस्तङ्गते** = अस्ताचलम् उपगते (अस्ताए पछि) **तौ** = मृगशृगालौ (मृग र स्याल) **मृगस्य** = हरिणस्य (मृगको) **वासभूमिम्** = निवासस्थानम् (बस्ने ठाउँमा) **गतौ** = यातौ (गए) **तत्र** = तस्मिन् वासस्थाने (त्यो बस्ने ठाउँमा) **चम्पकवृक्षशाखायाम्** = हेमपुष्पकशाखायाम् (चाँपको रूखको हाँगामा) **सुबुद्धिनामा** = सुबुद्धिरिति प्रसिद्धः (सुबुद्धि नाम गरेको) **मृगस्य** = हरिणस्य (मृगको) **चिरमित्रम्** =बहुकालसुहृद् (पुरानो समयदेखिको मित्र) **काकः** = वायसः (काग) **निवसति स्म** = वासं करोति स्म (बस्तथ्यो) **तौ** = हरिणशृगालौ (मृग र स्याललाई) **दृष्ट्वा** = विलोक्य (देखेर) **काकः** = वायसः (कागले) **अवदत्** = अकथयत् (भन्यो) **सखे चित्राङ्ग** = मित्र चित्राङ्ग (हे चित्राङ्ग) **अयम्** = एषः (यो) **द्वितीयः** = अपरः (अर्को) **कः** (को हो) **मृगः** = हरिणः (मृग) **ब्रूते** = कथयति (भन्छ) **अयम्** = एषः (यो) **जम्बुकः** = शृगालः (स्याल हो) **अस्मत्सख्यम्** = अस्माकं मैत्रीम् (हाम्रो मित्रतालाई) **इच्छन्** = वाञ्छन् (इच्छा गर्दै) **आगतः** = समायातः (आएको छ) **काकः** = वायसः (काग) **ब्रूते** = कथयति (भन्छ) **मित्र** = सखे (हे मित्र) **अकस्मात्** = सहसा (अचानक) **आगन्तुना सह** = आगच्छता साकम् (आउनेका साथ) **मैत्री** = सख्यम् (मित्रता) **न युक्ता** = नोचिता (ठीक हुँदैन) **जम्बुकः** = शृगालः (स्यालले) **सकोपम्** = सक्रोधम् (रिसाएर) **आह** = उक्तवान् (भन्यो) **मृगस्य** = हरिणस्य (मृगको) **प्रथमदर्शनदिने** =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जम्बुकोऽस्मत्सख्यमिच्छन्नागतः । काको ब्रूते - मित्र, अकस्मादागन्तुना सह मैत्री न युक्ता । जम्बुकः सकोपमाह- मृगस्य प्रथमदर्शनदिने भवानपि, अज्ञातकुलशील एव । तत्कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धत एव । यथायं मृगस्तव बन्धुस्तथा त्वमपि मे बन्धुः । मृगेणोक्तम्- किमनेनोत्तरोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् ।

आद्यावलोकनदिवसे (पहिलो भेटघाटको दिनमा) **भवान् अपि** = त्वमपि (तपाइँ पनि) **अज्ञातकुलशील एव** = अपरिचित एव (अपरिचित नै हुनुहुन्थ्यो) **तत्** = तस्मात् (त्यसपछि) **भवता सह** = त्वया साकम् (तपाइँसित) **एतस्य** = हरिणस्य (मृगको) **स्नेहानुवृत्तिः** = मैत्री (मित्रता) **उत्तरोत्तरम्** = दिनानुदिनम् (दिन प्रतिदिन) **कथम्** = केन प्रकारेण (कसरी) **वर्द्धत एव** = वृद्धिम् उपगत एव (बढी नै रहेको छ) **यथा** = येन प्रकारेण (जसरी) **अयम्** = एषः (यो) **मृगः** = हरिणः (मृग) **तव** = वायसस्य (तपाइँको) **बन्धुः** = बान्धवः (बन्धु हो) **तथा** = तेनैव प्रकारेण (त्यसरी नै) **त्वम्** = भवानपि (तपाइँ पनि) **मम**= शृगालस्य (मेरो) **बन्धुः** = बान्धवः (बन्धु हो) **मृगेण** = हरिणेन (मृगले) **उक्तम्**= कथितम् (भन्यो) **अनेन** = एतेन (यो) **उत्तरोत्तरेण** = वृथालापेन (भनाभनले) **किम्** = को लाभः (के फाइदा) **सर्वैः** = समस्तैः (सबै) **एकत्र** = एकस्मिन् स्थाने (एकै ठाउँमा) **विश्रम्भालापैः** = विश्वस्तैर्भाषणैः (विश्वासिला कुराकानी गरेर) **सुखम्** = आनन्दम् (आनन्द) **अनुभवद्भिः** = अनुभवं कुर्वद्भिः (अनुभव गर्दै) **स्थीयताम्** = स्थातव्यम् (बसौं) । **काकेन** = वायसेन (कागले) **उक्तम्** = कथितम् (भन्यो) **एवमस्तु** (त्यसो भए हुन्छ त लौ) । **ततः** + तदनन्तरम् (त्यसपछि) **प्रातः** = प्रभाते (बिहान) **सर्वे** = मृगशृगालवायसाः (मृग, स्याल र काग) **यथाभिलषितदेशम्** - यथेप्सितप्रदेशम् (जता मन लाग्छ उतै) **गताः** = याताः (गए) ।

१०.२ विग्रहः - मृगकाकौ - मृगश्च काकश्च (द्व.स.) तौ । **चम्पकवती** - चम्पकाः सन्ति यस्यां सा (बहु.) । **हृष्टपुष्टाङ्गः** - हृष्टानि पुष्टानि च अङ्गानि यस्य सः (बहु.) । **क्षुद्रबुद्धिनामा** - क्षुद्रबुद्धिः नाम यस्य सः (बहु.) । **बन्धुहीनः** - बन्धुभिः हीनः (त.स.) । **सबन्धुः** - बन्धुना सहितः (बहु.) । **जीवलोकम्** - जीवानां लोकः (ष.त.) तम् । **मरीचिमालिनि** - मरीचीनां माला (ष.त.) सा अस्ति अस्मिन् तस्मिन् । **वासभूमिम्**- वासाय भूमिः (च.त.) ताम् । **चम्पकवृक्षशाखायाम्** - चम्पकश्चासौ वृक्षः (क.) तस्य शाखा (ष.त.) तस्याम् । **सुबिद्धनामा** - सुबुद्धिः नाम यस्य सः (बहु.) । **उत्तरोत्तरेण** - उत्तरस्यापि उत्तरम् (ष.त.) तेन । **चिरमित्रम्** - चिरात् मित्रम् (प.त.) । **चित्राङ्गः** -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काकेनोक्तम् - एवमस्तु । ततः प्रातः सर्वे यथाभिलषितदेशं गताः ।

चित्राणि अङ्गानि यस्य सः (बहु.) । **अस्मत्सख्यम्** - अस्माकम् सख्यम् (ष.त.) । **प्रथमदर्शनदिने** - प्रथमं दर्शनं यस्मिन् (बहु.) तच्च तद् दिनम् (कर्म.) तस्मिन् । **अज्ञातकुलशीलः** - न ज्ञातम् (नञ्) अज्ञातं कुलं शीलं च यस्य सः (बहु.) ।

१०.३ प्रकृतिप्रत्ययविच्छेदः - भ्राम्यन् - भ्रम + शतृ । **दृष्ट्वा** - दृश् + क्त्वा । **उपसृत्य** - उप-सृ - क्त्वा+ल्यप् । **आलोच्य** - आ - लोच् + क्त्वा ल्यप् । **मृतवत्** - मृत् + वत् । **आसाद्य** - आ - सद् + क्त्वा + ल्यप् । **प्रविष्टः** - प्र-विश्+ क्त्वा । **वर्तितव्यम्** - वृत् + तव्यत् । **मरीचिमालिनि** - मरीचिमाला + इनि । **गतः** - गम् + क्त। **मैत्री** - मित्र + इञ् । **एकत्र** - एक + त्रल् ।

१०.४ कोषः - जम्बुकः - शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः, इत्यमरः । **स्नेहः**- प्रेमा ना प्रियता हार्दं प्रेम स्नेहः, इत्यमरः । **आगन्तुः** - स्युरावेशिक आगन्तुरतिथिर्ना गृहागते, इत्यमरः । **कोपः** - कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ, इत्यमरः । **बन्धुः**- सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः, इत्यमरः । **विश्रम्भः** - समौ विस्रम्भविश्वासौ, इत्यमरः । **सुखम्** - मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः । स्यादानन्दथुरानन्द शर्मशातसुखानि च, इत्यमरः । **काकः** - काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः । ध्वङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि, इत्यमरः । **सख्यम्** - सख्यं साप्तपदीनं स्यात्, इत्यमरः । **कुलम्** - कुलं जनपदे गोत्रे सजातीयगणेऽपि च, इति मेदिनी । **मरीचिः** - किरणोऽस्रमयूखांशुगभस्तिघृणिरश्मयः। भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्, इत्यमरः । **चम्पकः** - चाम्पेयश्चम्पको हेमपुष्पकः, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनगद्यभागमधीत्य निम्नप्रश्नानामुत्तराणि लिखत ।

१. मृगकाकौ कुत्र वसतः ?
२. मृगः कीदृश आसीत् ?
३. मृगं विलोक्य शृगालेन किं विचारितम् ?
४. शृगालेन स्वपरिचयः कथं प्रस्तुतः ?
५. मृगशृगालौ कदा मृगस्य वासस्थानङ्गतौ ?
६. मृगस्य चिरमित्रं कुत्र वसति स्म ?
७. काकस्य वचनं निशम्य मृगालेन किमुक्तम् ?
८. केन सह मैत्री नोचिता ?

२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३ सन्धिविच्छेदं कुरुत ।

नामारण्यानी। चिरान्महता । केनचिच्छृगालेन । शृगालोऽचिन्तयत् । एतन्मांसम्। तावदुत्पादयामि । इत्यालोच्य । आलोच्योपसृत्य । मृगेणोक्तम् । जम्बूकोऽहम् । अत्रारण्ये । मृतवन्निवसामि । प्रविष्टोऽस्मि । त्वयानुचरेण । पश्चादस्तङ्गते । काको मृगस्य । काकोऽवदत् । शील एव । सहैतस्य । स्नेहानुवृत्तिः । इच्छान्नागतः ।

४ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

मगधदेशे । मृगकाकौ । हृष्टपुष्टाङ्गः । क्षुद्रबुद्धिनामा । बन्धुहीनः । सबन्धुः। जीवलोकम् । मरीचिमालिनि । चम्पकवृक्षशाखायाम् । सुबुद्धिनामा । चिरमित्रम् । चित्राङ्गः । अस्मत्सख्यम् । प्रथमदर्शनदिने । अज्ञातकुलशीलः । स्नेहानुवृत्तिः । उत्तरोत्तरम् ।

५ निर्धारितपाठस्य सरलार्थं लिखत ।

६ रेखाङ्कितपदानां कारकविभक्तिनिर्देशं कुरुत ।

७ वाच्यपरिवर्तनं कुरुत ।

१. वने विचरता केनानि शृगालेन हृष्टपुष्टाङ्गो मृगो विलोकितः ।
२. तं विलोक्य तेन जम्बुकेन मृगवधोपायश्चिन्तितः ।
३. ततो मृगमुपसरन् स तं मैत्रीं याचितवान् ।
४. सरलचेतसा तेन मृगेण शृगालस्य प्रस्तावः स्वीकृतः ।
५. उभौ सायं मृगस्य वासभूमिमगच्छताम् ।
६. मृगेणोक्तम्- सर्वैः सुखमनुभवद्भिः स्थीयताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशः पाठः

चित्राङ्ग-सुबुद्धि-क्षुद्रबुद्धिकथा- २

एकदा निभृतं शृगालो ब्रूते- सखेऽस्मिन्- वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति। तदहं त्वां नीत्वा दर्शयामि । तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यं खादति । अथ क्षेत्रपतिना तद् दृष्ट्वा पाशो योजितः अनन्तरं पुनरागतो मृगः पाशबद्धोऽचिन्तयत्- 'को मामितो मित्रादन्यः कालपाशादिव व्याधपाशात्त्रातुं

११.१ **एकदा** = एकस्मिन् दिने (एक दिन) **निभृतम्** = एकान्ते (एकान्तमा) **शृगालः**= जम्बुकः (स्याल) **ब्रूते** = कथयति (भन्छ) **सखे** = भो मित्र (हे मित्र) **अस्मिन् वनैकदेशे**= एतस्मिन् वनस्य एकभागे (यस वनको एक छेउमा) **सस्यपूर्णम्** = धान्यपूर्णम् (धानले भरिएको) **क्षेत्रम्**= केदारः (खेत) **अस्ति**= वर्तते (छ) **तत्** = क्षेत्रम् (त्यो खेत) **त्वाम्**= भवन्तम् (तपाइँलाई) **नीत्वा** = प्रापय्य (लगेर) **अहम्** = शृगालः (म) **दर्शयामि** = अवलोकयामि (देखाउँछु) **तथाकृते** =जम्बुकवचनानुसारेण क्षेत्रे दृष्टे सति (स्यालको भनाइ अनुसार खेत देखेपछि) **मृगः** = चित्राङ्गः (मृग) **प्रत्यहम्** = प्रतिदिनम् (दिनदिनै) **तत्र** = क्षेत्रे (त्यस खेतमा) **गत्वा** = प्राप्य (पुगेर) **सस्यम्** = धान्यम् (धान) **खादति** = अत्ति (खान्थ्यो) **अथ** = अनन्तरम् (यसपछि) **क्षेत्रपतिना** = भूस्वामिना (किसानले) **तत्** = मृगागमनम् सस्यभक्षणञ्च (मृग आएको र धान खाएको) **दृष्ट्वा** = अवलोक्य (देखेर) **पाशः** = जालम् (पाशो) **योजितः** = स्थापितः (थाप्यो) **अनन्तरम्** = तत्पश्चात् (त्यसपछि) **पुनः** = भूयः (फेरि, अर्को दिन) **आगतः** = प्राप्तः (आएको) **मृगः** = हरिणः (मृग) **पाशैः** = जालैः (पाशाले) **बद्धः** = नियन्त्रितः (बाँधियो) **अचिन्तयत्** = विचारयामास (विचार गर्न थाल्यो) **इतः** = अस्मात् (यो) **कालपाशात् इव** = कृतान्तबन्धनात् इव (यमराजको पाशो जस्तो) **व्याधपाशात्** = लुब्धकजालात् (व्याधाको जालबाट) **माम्** = मृगम् (मलाई) **त्रातुम्** = रक्षितुम् (रक्षा गर्न) **मित्रात्** = सुहृदः (मित्रदेखि) **अन्य** = अपरः (अर्को) **कःशक्तः** = कः समर्थः (को सक्छ) **अत्रान्तरे** = अस्मिन्नेव समये (यसै बेला) **जम्बुकः** = क्षुद्रबुद्धिः (स्याल) **तत्र** = तस्मिन् स्थाने (त्यसै ठाउँमा) **आगत्य** = प्राप्य (आएर) **उपस्थितः** = स्थितः (बस्यो) र, **अचिन्तयत्** = विचारयामास (विचार गर्न थाल्यो) **अस्माकम्** = शृगालानाम् (हामी जस्ता स्यालको) **कपटप्रबन्धेन**= छलव्यवस्थया (कप्टयाइँले) **मनोरथसिद्धिः** =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थः ? अत्रान्तरे जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्-फलिता तावदस्माकं कपटप्रबन्धेन मनोरथसिद्धिः । एतस्योत्कृत्यमानस्य मांसस्यासृग्लिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि । तानि बाहुल्येन भोजनानि भविष्यन्ति। मृगस्तं दृष्ट्वोल्लसितो ब्रूते- सखे, छिन्धि तावन्मम बन्धनम् । सत्वरं मां त्रायस्व ।

अभिलाषपूर्तिः (इच्छापूर्ति) **फलिता** = सफला (सफल भयो) **उत्कृत्यमानस्य** = छिद्यमानस्य (काटिन लागेको) **एतस्य** = मृगस्य (मृगको) **मांसासृग्लिप्तानि** = मांसरुधिरपृक्तानि (मासु र रगतले पोतिएका) **अस्थीनि** = कीकसानि (हाडहरू) **मया** = जम्बुकेन (मैले) **अवश्यम्** = नूनम् (निश्चय नै) **प्राप्तव्यानि** = आसादयितव्यानि (पाउने छु) **तानि** = अस्थीनि (हाडहरू) **बाहुल्येन**= आधिक्येन (धेरै) **भोजनानि** = खाद्यान्नानि (भोजन) **भविष्यन्ति** (हुने छन्) **मृगः** = हरिणः (मृगले) **तम्** = शृगालम् (त्यस स्याललाई) **दृष्ट्वा** = विलोक्य (देखेर) **उल्लसितः**= हृष्टः (खुशी हुँदै) **ब्रूते** = कथयति (भन्छ) **सखे** = भो मित्र (हे मित्र) **मम** = शृगालस्य (मेरो) **बन्धनम्** = जालम् (बन्धनलाई) **छिन्धि** = भिन्धि (काट) **सत्वरम्** = शीघ्रम् (चाडै) **माम्**= शृगालम् (मलाई) **त्रायस्व** = रक्ष (रक्षा गर)।

११.२ विग्रहः - सस्यपूर्णम् - सस्यैः पूर्णम् (तृ.त.) । **प्रत्यहम्** - अहनि अहनि (अव्य.) । **क्षेत्रपतिना** - क्षेत्रस्य पतिः (ष.त.) तेन । **कालपाशात्** - कालस्य पाशः (ष.त.) तस्मात् । **व्याधपाशात्** - व्याधस्य पाशः (ष.त.) तस्मात् । **कपटप्रबन्धेन** - कपटस्य प्रबन्धः (ष.त.) तेन । **मांसासृग्लिप्तानि** - मांसासृग्भिः लिप्तानि (तृ.त.) ।

११.३ प्रकृतिप्रत्ययविच्छेदः - एकदा - एक + दा । **नीत्वा** = नी + क्त्वा । **दृष्ट्वा** - दृश् + क्त्वा । **योजितः** - युज् + णिच् +क्त । **बद्धः** - बध् + क्त । **त्रातुम्** - त्रै + तुमुन् । **उल्लासितः** - उत् - लस् + णिच् + क्त । **उत्कृत्यमानः** - उत्कृत्य+ लट् > शानच्। **लिप्तम्** - लिप् + क्त । **बाहुल्यम्** - बहुल + ष्यञ् । **भोजनम्** - भुज् - ल्युट् > अन। **बन्धनम्** - बध् + ल्युट् > अन ।

११.४ कोषः - शृगालः - शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः, इत्यमरः । **मित्रम्**- अथ मित्रं सखा सुहृद्, इत्यमरः । **मनोरथः** - इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः, इत्यमरः । **असृक्** - रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम्, इत्यमरः । **अस्थि**- कीकसं कुल्यमस्थि च, इत्यमरः । **सत्वरम्** - अथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् । सत्वरं चपलं तूर्णमविलम्बितमाशु च, इत्यमरः । **कपटः** - कपटोऽस्त्री व्याजदम्भोपधयश्छद्म-कैतवे, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ **उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।**

१. मृगः प्रत्यहं कुत्र गच्छति स्म ?

२. सस्यपूर्णं क्षेत्रं कुत्रासीत् ?

३. मृगः पाशैः कथं बद्धः ?

४. पाशबद्धेन मृगेण किं विचारितम् ?

५. शृगालस्य मनोरथाः कथं फलिताः ?

६. शृगालस्य प्राप्तव्यानि भोजनानि कानि ?

७. शृगालं विलोक्य मृगेण किमुक्तम् ?

२ **निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।**

३ **सविग्रहं समासनामानि लिखत ।**

सस्यपूर्णम्। प्रत्यहम् । क्षेत्रपतिना । कालपाशात् । व्याधपाशात् । कपटप्रबन्धेन। मांसासृग्लिप्तानि ।

४ **सन्धिविच्छेदं कुरुत, सूत्राणि च लिखत ।**

शृगालो ब्रूते । बद्धोऽचिन्तयत् । को माम् । कालपाशादिव । मित्रादन्यः । आगत्योपस्थितः । अत्रान्तरे । मयावश्यम् । दृष्ट्वोल्लासितः । तावन्मम ।

५ **निर्धारितपाठस्य सरलार्थं लिखत ।**

६ **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

एकदा । नीत्वा । दृष्ट्वा । योजितः । बद्धः । त्रातुम् । उल्लसितः । उत्कृत्यमानः । लिप्तम् । बाहुल्यम् । भोजनम् । बन्धनम् ।

७ **वाच्यपरिवर्तनं कुरुत ।**

१. अहं त्वां सस्यपूर्णं क्षेत्रं दर्शयामि ।

२. मृगः प्रत्यहं तत्र गत्वा सस्यं खादति ।

३. अस्थीनि मयावश्यं प्राप्यन्ते ।

४. तानि मया भोजनानि क्रियन्ते ।

५. शृगालः पाशबद्धं मृगमपश्यत् ।

८ **मृगशृगालयोः संवादमेकं रचयत ।**

९ **रेखाङ्कितपदानां कारकविभक्तिनिर्देशं कुरुत ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशः पाठः

चित्राङ्ग-सुबुद्धि-क्षुद्रबुद्धिकथा-३

ततो जम्बुको मुहुर्मुहुः पाशं विलोक्याचिन्तयत्- 'दृढस्तावदयं बन्धः ब्रूते च- सखे, स्नायुनिर्मिता एते पाशाः, तदद्य भट्टारकवासरे कथमेतन्मासं दन्तैः स्पृशामि । मित्र, यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत् त्वया वक्तव्यन्तन्मया कर्तव्यम् । इत्युक्त्वा तत्समीप आत्मानमाच्छाद्य स स्थितः । अनन्तरं स काकः प्रदोषसमये मृगमनागतमवलोक्येतस्ततोऽन्विष्य तथाविधं

१२.१ ततः = मृगवचनश्रवणानन्तरम् (मृगको वचन सुनेपछि) **जम्बुकः** = शृगालः (स्यालले) **मुहुर्मुहुः** = भूयोभूयः (बारम्बार) **पाशम्** = जालम् (पाशोलाई) **विलोक्य** = दृष्ट्वा (देखेर) **अचिन्तयत्** = विचारयामास (विचार गऱ्यो) **अयम्** = एषः (यो) **बन्धः** = जालम् (पाशो) **दृढः** = अभेद्यः (छिनाउन नसकिने छ) **ब्रूते च** = कथयति च (भन्छ पनि) **सखे** = भो मित्र (हे मित्र) **एते** = इमे (यी) **पाशाः** = जालानि (पाशाहरू) **स्नायुनिर्मिता** = नशारचिता (नशाले बनेका छन्) **तत्** = तस्मात् (त्यसैले) **अद्य** = अस्मिन् दिने (आज) **भट्टारकवासरे** = सूर्यवासरे (आइतबारका दिन) **कथम्** = केन प्रकारणेन (कसरी) **एतान्** = पाशान् (यी पाशालाई) **दन्तैः** = दशनैः (दाँतले) **स्पृशामि** = स्पृष्ट्वा पाशच्छेदनं करोमि (छोएर पाशो काटौं) **मित्र** = सखे (हे मित्र) **चेत्**= यदि (यदि) **चित्ते** = मनसि (चित्तमा) **अन्यथा** = प्रतिकूलम् (उल्टो) **न मन्यसे**= नधारयसि (ठान्दैनौ भने) **तदा** = तस्याम् अवस्थायाम् (त्यस्तो अवस्थामा) **प्रभाते** = प्रातः (बिहान) **यत् त्वया वक्तव्यम्** = यत्त्वम् कथयसि (जे तिमी भन्छौ) **तत्** (त्यो काम) **मया** = जम्बुकेन (मैले) **कर्तव्यम्** = विधातव्यम् (गर्नें छु) **इति** = इत्थम् (यस्तो) **उक्त्वा** = कथयित्वा (भनेर) **तत्समीपे** = तन्निकटे (त्यसैको नजिकमा) **आत्मानम्** = स्वशरीरम् (आफूलाई) **आच्छाद्य** = लतादिभिरावृत्य (लहराहरूले छोपेर) **सः** = जम्बुकः (त्यो स्याल) **स्थितः** = अवस्थितः (बस्यो) **अनन्तरम्** = तत्पश्चात् (त्यसपछि) **स काकः** = सुबुद्धिः (सुबुद्धि नाम गरेका काग) **प्रदोषकाले** = सायं समये (साँझको समयमा) **मृगम्** = चित्राङ्गम् (मृगलाई) **अनागतम्** = वासस्थानेऽप्राप्तम् (वासस्थानमा नआएको) **अवलोक्य** = विलोक्य (देखेर) **इतस्ततः** = यत्रतत्र (यताउति) **अन्विष्य** = गवेषणं कृत्वा (खोज्दा) **तथाविधम्** = पाशबद्धम् (पासामा बाँधिएको)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वोवाच-सखे, किमेतत् ? मृगेणोक्तम्- अवधीरितसुहृद्वाक्यस्य फलमेतत्। अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्- सखे मृग, 'त्वमात्मानं मृतवत्सन्दर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ । अहं तव चक्षुषी चञ्च्वा विलिखामि । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृगो विलोकितः । आः स्वयं मृतोऽसि, इत्युक्त्वा स मृगं बन्धनान्मोचयित्वा पाशान् ग्रहीतुं सयत्नो

दृष्ट्वा = विलोक्य (देखेर) **उवाच** = आह (भन्यो) **सखे** = मित्र (हे मित्र) **किमेतत्**= पाशबन्धनस्य किं कारणम् (पाशोमा पर्नाको कारण के हो) **मृगेण** = चित्राङ्गेन (मृगले) **उक्तम्** = कथितम् (भन्यो) **अवधीरितसुहृद्वाक्यस्य** = तिरस्कृतमित्रवचनस्य (मित्रको वचन नमान्नाको) **एतत्** = इदम् (यो) **फलमस्ति** (फल हो) **अथ** = अनन्तरम् (यसपछि) **प्रभाते** = प्रातः (बिहान) **लगुडहस्तः** = करे यष्टिं धृत्वा (हातमा लठ्ठी लिएर) **तं प्रदेशम्**= तत् क्षेत्रम् (त्यस खेतमा) **आगच्छन्** = आयान् (आइरहेको) **क्षेत्रपतिः** = भूस्वामिः (किसानलाई) **काकेन** = वायसेन (कागले) **अवलोकितः** = दृष्टः (देख्यो) **तम्** = क्षेत्रपतिम् (किसानलाई) **आलोक्य** = दृष्ट्वा (देखेर) **काकेन** = वायसेन (कागले) **उक्तम्** = कथितम् (भन्यो) **सखे मृग** = मित्र हरिण (हे मित्र मृग) **त्वम्** = भवान् (तपाइँ) **आत्मानम्** = स्वम् (आफूलाई) **मृतवत्** = हतमिव (मरेजस्तै) **संदर्श्य** = प्रदर्श्य (देखाएर) **वातेन** = वायुना (वतासले) **उदरम्** = कुक्षिम् (पेटलाई) **पूरयित्वा**= प्रपूर्य (भरेर) **पादान्** = चरणान् (पाउलाई) **स्तब्धीकृत्य** = स्थिरीकृत्य (स्थिर बनाएर) **तिष्ठ** = स्थितो भव(बस्नुहोस्) **अहम्** = **काकः** (म) **तव** = भवतः (तपाइँको) **चक्षुषी**= नेत्रे (आँखालाई) **चञ्च्वा** = त्रोट्या (चुच्चाले) **विलिखामि** = उत्किरामि (ठुँग्नेछु) **यदा** = यस्मिन् समये (जब) **अहम्** (म) **शब्दं करोमि** = उच्चैः ब्रवीमि (कराउने छु) **तदा** = तस्मिन् समये (त्यसै बेला) **उत्थाय** = उत्थितो भूत्वा (उठेर) **सत्वरम्** = शीघ्रम् (छिटै) **पलायिष्यसे** = पलायनं करिष्यसि (भाग्नु हुनेछ) **मृगः** (हरिणले) = **तथैव** = तथाविध एव (त्यस्तै नै) **काकवचनेन** = वायसवचनानुसारेण (कागको भनाइअनुसार गरेर) **स्थितः** = तस्थौ (रह्यो) **ततः** = तदनन्तरम् (त्यसपछि) **क्षेत्रपतिना** = भूस्वामिना (खेतको मालिकले) **हर्षोत्फुल्ललोचनेन** = प्रमोदोत्फुल्लनयनेन (हर्षले ठूला आँखा पार्दै, खुशी भएर) **तथाविधः** = तादृशः (त्यस अवस्थामा परेको) **मृगः** = हरिणः (मृगलाई) **आलोकितः** = अवलोकितः (हेर्यो) **आः** = आश्चर्योज्यं विषयः (बढो अचम्म भयो)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बभूव । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो हतः ।

स्वयं = आत्मनैव (आफैं नै) **मृतः** = पञ्चत्वं गतः (मरिछस्) **इत्युक्त्वा** = इत्यभिधाय (यति भनेर) **मृगं** = हरिणम् (मृगलाई) **बन्धनात्** = पाशात् (पाशाबाट) **मोचयित्वा** = मोचनम् विधाय (छुटाएर) **पाशान्** = जालान् (पाशाहरू) **ग्रहीतुं** = सङ्कलयितुम् (सङ्कलन गर्न) **सयत्नः** = उद्यतः (लाग्दो) **बभूव** = अभूत् (भयो) **ततः** = तदनन्तरम् (त्यसपछि) **काकशब्दं** = वायसरवम् (कागको शब्द) **श्रुत्वा** = आकर्ण्य (सुनेर) **मृगः** (मृग) **सत्वरम्** = शीघ्रम् (चाँडै, हतपत गरेर) **उत्थाय** = उत्थानम् विधाय (उठेर) **पलायितः**= अधावत् (दौडियो) **तं** = हरिणम् (त्यस हरिणलाई) **उद्दिश्य** = लक्ष्यीकृत्य (ताकेर) **तेन क्षेत्रपतिना** = कृषकेण (त्यस किसानले) **क्षिप्तेन** = प्रक्षिप्तेन (फ्याँकेको) **लगुडेन** = दण्डेन (लाठीले) **शृगालः** = क्षद्रबुद्धिनामा जम्बुकः (क्षुद्रबुद्धि नाम गरेको स्याल) **हतः**= मृतः (मऱ्यो) ।

१२.२ **विग्रहः - भट्टारकवासरे** - भट्टारकस्य वासरः (ष.त.) तस्मिन् । **अवधीरितसुहृद्वाक्यस्य** - अवधीरितं सुहृद्वाक्यं येन तस्य (बहु.) । **लगुडहस्तः** - लगुडः हस्ते यस्य सः (बहु.)। **क्षेत्रपतिः** - क्षेत्रस्य पतिः (ष.त.) तेन । **काकवचनेन**- काकस्य वचनम् (ष.त.) तेन । **हर्षोत्फुल्ललोचनेन** - हर्षेण उत्फुल्ले लोचने यस्य सः (बहु.) तेन ।

१२.३ **प्रकृतिप्रत्ययविच्छेदः- विलोक्य** - वि-लोक् + क्त्वा > ल्यप् । **उक्त्वा**- ब्रू (वच्) + क्त्वा । **आलोक्य** - आ-लोक्+ क्त्वा > ल्यप् । **उत्थाय** - उत् - स्था - क्त्वा> ल्यप् । **ग्रहीतुम्** - ग्रह् + तुमुन् । **पूरयित्वा** - पृ + क्त्वा । **दृष्ट्वा** - दृश् + क्त्वा। **उक्तः**- ब्रू (वच्) +क्त । **अवलोक्य** - अव-लोक् + क्त्वा > ल्यप् । **बन्धनम्** - बध् - ल्युट् > अन। **वचनम्** - वच् + ल्युट् > अन । **लोचनम्** - लोच् + ल्युट् > अन । **विलोकितः** - वि-लोक् + क्त । **श्रुत्वा** - श्रु + क्त्वा । **उद्दिश्य** - उत् -दिश् + क्त्वा > ल्यप् । **हतः** - हन्+ क्त । **आगच्छन्**- आ-गम् + लट् > शतृ । **वक्तव्यम्**- वच् + ब्रू (वच्) तव्यत्। **अन्विष्य**- अनु+ इष् + क्त्वा > ल्यप् । **आलोक्य** - आ-लोक् +क्त्वा> ल्यप् । **पलायितः** - परा + अय्+ क्त । **स्थितः** - स्था + क्त । **क्षिप्तः** - क्षिप् + क्त। **सन्दर्श्य** - सम् - दृश् + क्त्वा > ल्यप् ।

१२.४ **कोषः - लोचनम्** - लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी । दृग् दृष्टि च, इत्यमरः । **प्रदोषः** - प्रदोषो रजनीमुखम्, इत्यमरः । **शब्दः** - शब्दे निनादनिनदध्वनि- ध्वानरवस्वनाः । स्वाननिर्घोषनिर्ह्रादनादनिश्वाननिःस्वनाः, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।

१. पाशबद्धं मृगं विलोक्य शृगालेन किं चिन्तितम् ?
२. कस्य हेतोः मृगः पाशबद्धः संजातः ?
३. मृगस्यानुरोधं निशम्य जम्बूकः किमुक्तवान् ?
४. काकेन कीदृशः क्षेत्रपतिर्विलोकितः ?
५. मृगः पलायितुं कथं समर्थः ?
६. शृगालः केन घातितः ?
७. काकेन मृगः कथं रक्षितः ?
८. क्षेत्रपतिना कीदृशो मृगो विलोकितः ?
९. अनया कथया का शिक्षा लभ्यते ?

२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३ सविग्रहं समासनामानि लिखत ।

भट्टारकवासरे । अवधीरितसुहृद्वाक्यस्य । लगुडहस्तः । क्षेत्रपतिः । काक-वचनेन । हर्षोत्फुल्ललोचनेन ।

४ सन्धिविच्छेदं विधाय सूत्राणि लिखत ।

विलोक्याचिन्तयत् । जम्बूको मुहुः । तावदयम् । निर्मिता एते । तदद्य । इतस्ततः । ततोऽन्विष्य । दृष्ट्वोवाच । काकेनावलोकितः । वातेनोदरम् । सयत्नो वभूव ।

७ काकमृगयोः संवादमेकं रचयत ।

८ निर्धारितपाठस्य सरलार्थं लिखत ।

९ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

विलोक्य । उक्त्वा । आलोक्य । उत्थाय । ग्रहीतुम् । पूरयित्वा । दृष्ट्वा । उक्तः । अवलोक्य । बन्धनम् । बचनम् । लोचनम् । विलोकितः । श्रुत्वा । उद्दिश्य । हतः । आगच्छन् । वक्तव्यम् । अन्विष्य । आलोक्य । पलायितः । स्थितः । क्षिप्तः । सन्दर्श्य ।

१० रेखाङ्कितपदानां कारकविभक्तिनिर्देशं कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशः पाठः

जरद्गव-दीर्घकर्णकथा- १

अस्ति भागिरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद् गलितनखनयनो जरद्गवनामा गृध्रो निवसति । अथ कृपया तद्वृक्षवासिनः पक्षिणस्तज्जीवनाय स्वाहारात् किञ्चिदुद्धृत्य ददति। तेनासौ जीवति । अथ कदाचिद् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षितुं तत्रागतः। ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा

१३.१ **भागीरथीतीरे** = भागीरथीतटे (भागीरथीको तीरमा) **गृध्रकूटनाम्नि** = गृध्रकूटनामके (गृध्रकूट नाम गरेको) **पर्वते** = गिरौ (पहाडमा) **महान्** = विशालः (ठूलो) **पर्कटीवृक्षः** = प्लक्षतरुः (काभ्राको रुख) **अस्ति** = वर्तते (छ) **तस्य** = प्लक्षतरोः (काभ्राका रुखको) **कोटरे** = निष्कुहे (टोड्कामा) **दैवदुर्विपाकात्** = अदृष्टस्य प्रातिकूल्यात् (दैव प्रतिकूल हुनाले) **गलितनखनयनः** = पतितनखनेत्रः (नङ र आँखा कम्जोर भएको) **जरद्गव इति नाम यस्य सः, जरद्गवनामा** = जरद्गवाख्यः (जगरद्गव नाम गरेको) **गृध्रः** = दाक्षाय्यः (गिद्ध) **प्रतिवसति** = आवसति (वस्तथ्यो) **अथ** = अनन्तरम् (यसपछि) **तद्वृक्षवासिनः** = तत्तरुनिवासिनः (त्यस रुखमा बस्ने) **पक्षिणः** = खगाः (पक्षीहरूले) **कृपया** = दयया (दयाले) **तज्जीवनाय** = गृध्रस्य जीकार्थम् (गिद्धको जीविकाका निमित्त) **स्वाहारात्** = निजभोनात् (आफ्नो आहाराबाट) **किञ्चित्** = स्वल्पं स्वल्पम् (अलिअलि) **उद्धृत्य** = निष्कास्य (निकालेर) **ददति** = अर्पयन्ति (दिने गर्थे) **तेन** = आहारेण (त्यसै आहाराबाट) **असौ** = गृध्रः (यो गिद्ध) **जीवति** = प्राणान् धारयति (बाँच्थ्यो) **अथ** = अनन्तरम् (यसपछि) **कदाचित्** = जातु (कुनै समयमा) **दीर्घकर्णनामा** = दीर्घकर्णाख्यः (दीर्घकर्ण नाम गरेको) **मार्जारः** = बिडालः (बिरालो) **पक्षिशावकान्** = खगशिशून् (चराका बचेराहरू) **भक्षितुम्** = खादितुम् (खान) **तत्र** = तस्मिन् वृक्षतले (त्यस रुखमुनि) **आगतः** = आगतवान् (आयो) **ततः** = तदनन्तरम् (त्यसपछि) **तम्** = मार्जारम् (त्यस बिरालालाई) **आयान्तम्** = आगच्छन्तम् (आइरहेको) **दृष्ट्वा** = विलोक्य (देखेर) **भयार्तैः** = भयाकुलैः (डरले आत्तिएका) **पक्षिशावकैः** = खगपोतैः (पक्षीका बच्चाहरूले) **कोलाहलः** = कलकलः (कोलाहल शब्द) **कृतः** = विहितः (गरे) **तत्** = कोलाहलम् (त्यो कोलाहल शब्द) **श्रुत्वा** = आकर्ण्य (सुनेर)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जरद्गवेनोक्तम्- कोऽयमायाति ? दीर्घकर्णो गृध्रमालोक्य सभयमाह- हा ! हतोऽस्मि । अधुनास्य सन्निधाने पलायितुमक्षमः, तद्यथा भवितव्यं तद् भवतु। तावद् विश्वासमुत्पाद्यास्य समीपे गच्छामि, इत्यालोच्योपसृत्याब्रवीत्-आर्य, त्वामभिवन्दे । गृध्रोऽवदत् - कस्त्वम् ? मार्जारोऽवदत् मार्जारोऽहम् । गृध्रोऽवदत्- दूरमपसर, नो चेद् हन्तव्योऽसि मया । मार्जारोऽवदत्- श्रूयतां तावदस्मद्वचनम्। ततो यद्यहं वध्यस्तदा हन्तव्यः । गृध्रो ब्रूते- किमर्थमागतोऽसि ? सोऽवदत् -

जरद्गवेन = तदाख्यगृध्रेण (जरद्गव नामक गिद्धले) **उक्तम्** = कथितम् (भन्यो) **अयम्** = एष (यो) **क आयाति** = किन्नाम व्यक्तिविशेष आगच्छति (को आउँदै छ) **दीर्घकर्णः** = तदाख्यो बिडालः (दीर्घकर्ण नामक बिरालाले) **गृध्रम्** = जरद्गवम् (गिद्धलाई) **अवलोक्य**= दृष्ट्वा (देखेर) **सभयं** = भयेन सहितम् यथा स्यात्तथा (डराउँदै) **आह**= उवाच (भन्यो) **हा**= इति खेदे (ओ हो) **हतः** = मारितः अस्मि (मारिएँ) **अधुना**= साम्प्रतम् (अहिले) **अस्य** = जरद्गवस्य (यस गिद्धको) **सन्निधाने** = समीपे (नजीकै) **पलायितुम्** = पलायनं कर्तुम् (भाग्न) **अक्षमः** = असमर्थः (सक्तिन) **तत्** = तस्मात् कारणात् (त्यसैले) **यथा**= येन प्रकारेण (जस्तो) **भवितव्यम्** = भावि (होला) **तत्** = तथा (त्यस्तै) **भवतु** = अस्तु (होओस्) **तावत्** = प्रथमम् (पहिले) **विश्वासम्** = प्रतीतिम् (विश्वास) **समुत्पाद्य** = उत्पादनं विधाय (उत्पन्न गराएर) **अस्य** = जरद्गवस्य (गिद्धको) **समीपे** = निकटे (नजीकै) **गच्छामि** = यामि (जान्छु) **इति** = एतत् (यो कुरा) **आलोच्य** = विचार्य (सोचेर) **उपसृत्य** = गृध्रस्य समीपे गत्वा (गिद्धको नजिकै गएर) **अब्रवीत्** = उवाच (भन्यो) **आर्य** = श्रेष्ठ (हजुर) **त्वां** = भवन्तम् (यहाँलाई) **अभिवन्दे** = प्रणमामि (नमस्कार गर्दछु) **गृध्रः** = जरद्गवः (गिद्धले) **अवदत्** = अकथयत् (भन्यो) **त्वम्** = भवान् (तपाइँ) **कः** (को हुनुहुन्छ) **सः** = बिडालः (त्यस बिरालाले) **अवदत्** = अकथयत् (भन्यो) **अहं मार्जारः** = अहं बिडालः अस्मि (म बिरालो हुँ) **गृध्रः** = जरद्गवः (गिद्धले) **अवदत्** =आह (भन्यो) **दूरम्** = विप्रकृष्टम् (टाढा) **अपसर** = गच्छ (जा) **नो चेत्** = अन्यथा (होइन भने) **मया** = गृध्रेण (मबाट) **हन्तव्योऽसि** = मारणीयोऽसि (मारिने छस्) **मार्जारः** = बिडालः (बिरालाले) **अवदत्** = उवाच (भन्यो) **तावद्** = प्रथमम् (पहिले) **अस्मद्वचनम्** = मामकीनं वाक्यम् (मेरो कुरा) **श्रूयताम्** = आकर्ण्यताम् (सुन्नुहोस्) **ततः** = तदनन्तरम् (त्यसपछि) **यदि** = चेत् (यदि) **अहम्** = मार्जारः (म) **वध्यः** = हन्तुं योग्यः (मार्न लायक रहेछु भने) **तदा** = तस्याम् अवस्थायाम् (त्यस अवस्थामा) **हन्तव्यः** = मारणीयः (मार्नु हुनेछ) **गृध्रः** = जरद्गवः (गिद्ध) **ब्रूते** = कथयति (भन्छ) **ब्रूहि** = कथय (भन्) **किमर्थम्** = कस्मै प्रयोजनाय (किन) **आगतोऽसि**=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतमाचरन् तिष्ठामि । यूयञ्च धर्मज्ञानरता विश्वासभूमय इति सर्वे पक्षिणः सर्वदा ममाग्रे प्रस्तुवन्ति। अतो विद्यावयोवृद्धेभ्यो भवद्भ्यो धर्मं श्रोतुमिहागतः। भवन्तश्चैतादृशा धर्मज्ञाः मामतिथिं हन्तुमुद्यताः । गृध्रोऽवदत् मार्जारो हि मांसरुचिः । अत्र पक्षिशावकाः निवसन्ति । तेनाऽहमेवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा

प्राप्तः असि (आएको छस्) सः = मार्जारः (त्यस बिरालाले) **अवदत्** = अकथयत् (भन्यो) **अहम्** = मार्जारः (म बिरालो) **अत्र** = अस्मिन् (यो) **गङ्गातीरे** = भागीरथीतटे (गङ्गाजीको तटमा) **नित्यस्नायी** = नित्यस्नानशीलः (सँधै नुहाउने) **निरामिषाशी** = मांसभोजनरहितः (मासु नखाने) **ब्रह्मचारी** = ब्रह्मचर्यव्रतयुक्तः (ब्रह्मचर्य व्रत धारण गर्ने) **चान्द्रायणव्रतम्** = तन्नामकव्रतम् (चान्द्रायण व्रत) **आचरन्** = अनुतिष्ठन् (गर्दै) **तिष्ठामि**= निवसामि (बस्तछु) **यूयम्** = भवन्तः (हजुरहरू) **धर्मज्ञानरताः**= धर्मे ज्ञाने च निपुणाः (धर्म र ज्ञानमा निपुण हुनुहुन्छ) **विश्वासभूमयः** = विश्वासस्थानानि (विश्वासका पात्र हुनुहुन्छ) **इति** = एवम् (यस्तो कुरा) **सर्वे** = समस्ताः (सबै) **पक्षिणः**= विहगाः (चराहरू) **सर्वदा** = नित्यम् (सँधै) **मम** = बिडालस्य (मेरो) **अग्रे** = पुरः (अगाडि) **प्रस्तुवन्ति** = कथयन्ति (भन्ने गर्दछन्) **अतः** = अस्माद्धेतोः (यसैले) **विद्यावयोवृद्धेभ्यः**= विद्यया वयसा च श्रेष्ठेभ्यः (विद्या र उमेरले श्रेष्ठ भएका) **भवद्भ्यः**= युष्मत् (तपाइँबाट) **धर्मम्** = धर्मशास्त्रप्रतिपादितवचनानि (धर्मशास्त्रका कुराहरू) **श्रोतुम्**= आकर्णयितुम (सुन्न) **इह** = अत्र (यस ठाउँमा) **आगतः** = समायातोऽस्मि (आएको छु) **भवन्तश्च** = यूयं च (हजुर भने) **एतादृशाः** = ईदृशाः (यस्ता) **धर्मज्ञाः** = धर्मशास्त्रप्रवीणाः (धर्मशास्त्रको ज्ञाता भएर पनि) **अतिथिम्** = अभ्यागतम् (पाहुना भएर आएको) **माम्** = मार्जारम (मलाई) **हन्तुम्** = मारयितुम् (मार्न) **उद्यताः** = सचेष्टाः (संलग्न हुनुहुन्छ) **गृध्रः** = दाक्षाय्यः (गिद्धले) **अवदत्** = अवोचत् (भन्यो) **मार्जारः** = बिडालः (बिरालो) **हि** = निश्चयेन (निश्चय पनि) **मांसरुचिः** = आमिषप्रियः (मासुमा अभिरुचि राख्ने हुन्छ) **अत्र**= अस्मिंस्तरौ (यस रूखमा) **पक्षिशावकाः** = खगपोताः (पक्षीका बच्चाहरू) **निवसन्ति**= वासं कुर्वन्ति (बस्तछन्) **तेन** = कारणेन (त्यसैले) **अहम्** = गृध्रः (म) **एवम्** = पूर्वोक्तम् (यस्तो) **ब्रवीमि** = कथयामि (भन्दछु) **तच्छ्रुत्वा** = तदाकर्ण्य (त्यो सुनेर) **मार्जारः** = बिडालः (बिरालो) **भूमिम्** = पृथ्वीम् (भुईलाई) **स्पृष्ट्वा** = संस्पृश्य (छोएर) **कर्णौ च** = श्रवणौ च (कानलाई पनि) **स्पृशति** (छुन्छ अर्थात् किरिया खान्छ) **ब्रूते च**= कथयति च (भन्छ पनि) **मया** = माजरिण (मैले) **धर्मशास्त्रम्** = धर्मप्रतिपादकशास्त्रम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्णौ च स्पृशति । ब्रूते च मया धर्मशास्त्रं श्रुत्वा वितरागेणेदं दुष्करं व्रतमध्यवसितम् । परस्परं विवदमानानां धर्मशास्त्राणामहिंसा परमो धर्म इत्यत्र ऐकमत्यम् । एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः ।

(धर्मशास्त्र) **श्रुत्वा** = आकर्ण्य (सुनेर) **वीतरागेण** = उत्पन्नवैराग्येण (वैराग्य उत्पन्न भएपछि) **इदम्**= एतत् (यो) **दुष्करम्** = दुःखेन साध्यम् (कष्टले मात्र सिद्ध हुने) **व्रतम्**= चान्द्रायणम् (चान्द्रायण व्रत) **अध्यवसितम्** = अनुष्ठितम् (गरें) **परम्परम्** = मिथः (आपसमा) **विवदमानानाम्** = विरोधवताम् (भिन्न मत राख्ने) **धर्मशास्त्राणाम्**= धर्मग्रन्थानाम् अपि (धर्मशास्त्रहरूको पनि) **अहिंसा परमो धर्मः** (अहिंसा नै सबैभन्दा ठूलो धर्म हो) **इत्यत्र** = अस्मिन् विषये (यस विषयमा) **ऐकमत्यम्** = एका सम्मतिर्वर्तते (एक मत छ) **एवम्** = अनेन प्रकारेण (यसरी) **विश्वास्य** = विश्वासम् उत्पाद्य (विश्वास दिलाएर) **सः मार्जारः** = सः बिडालः (त्यो बिरालो) **तरुकोटरे** = वृक्षनिष्कुटे (रूखको टोड्कामा) **स्थितः** = निवसति स्म (बस्न थाल्यो) ।

१३.२ विग्रहः - **भागिरथीतीरे**- भागिरथ्याः तीरम् (ष.त.) तस्मिन्। **गृध्रकूटनाम्नि**- गृध्रकूटः नाम यस्य (बहु.) तस्मिन् । **पर्कटीवृक्षः** - पर्कटी चासौ वृक्ष (कर्म.) । **दैवदुर्विपाकात्** - दैवस्य दुर्विपाकः (ष.त.) तस्मात् । **गलितनखनयनः** - गलितं नखनयनं यस्य (बहु.) सः । **तद्वृक्षवासिनः** - स चासौ वृक्षः (कर्म.) तस्मिन् वसन्तीति (उपप.) । **तज्जीवनाय** - तस्य जीवनम् (ष.त.) तस्मै । **स्वाहाराद्** - स्वस्य आहारः (ष.त.) तस्मात् । **दीर्घकर्णनामा** - दीर्घकर्णः नाम यस्य सः (बहु.) । **पक्षिशावकान्** - पक्षिणां शावकाः (ष.त.) तान् । **पक्षिशावकैः** - पक्षिणां शावकाः (ष.त.) तैः । **भयार्तैः**- भयेन आर्ताः (तृ.त.) तैः । **दीर्घकर्णः** - दीर्घौ कर्णौ यस्य सः (बहु.) । **सभयम्** - भयेन सहितम् (बहु.) । **अस्मद्वचनम्**- अस्माकं वचनम् (ष.त.) । **तरुकोटरे** - तरोः कोटरम् (ष.त.) तस्मिन् ।

१३.३ प्रकृतिप्रत्ययविच्छेदः - **गलितः** - गल् + क्त । **उद्धृत्य** - उत् + धृ + क्त्वा > ल्यप् । **भक्षितुम्** - भक्ष + तुमुन् । **श्रुत्वा** - श्रु + क्त्वा । **अवलोक्य** - अव- लोक् + क्त्वा > ल्यप् । **उक्तम्** - ब्रू (वच्) + क्त । **हतः** - हन् + क्त । **उत्पाद्य** - उद्- पद् + णिच् + क्त्वा > ल्यप् । **हन्तव्यः** - हन् + तव्यत् । **वध्यः** - हन् + यत् ।

१३.४ कोषः - **अतिथिः** - स्युरावेशिक आगन्तुरतिथिर्ना गृहागते, इत्यमरः । **धर्मः** - स्याद् धर्ममस्त्रियां पुण्यश्रेयसीसुकृतं वृषः, इत्यमरः । **मार्जारः** - ओतुर्विडालो मार्जारो वृषकदंशक आखुभुक्, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनगद्यभागमधीत्य प्रश्नानामुत्तरं लिखत ।

१. पर्कटीवृक्षः कुत्र वर्तते ?

२. जरद्गवः कीदृशोऽस्ति ?

३. गृध्रः कुत्र निवसति ?

४. जरद्गवः कथं जीवति ?

५. मार्जारः किमर्थमागतः ?

६. किमर्थं पक्षिशावकाः कोलाहलं कृतवन्तः ?

७. मार्जारः कस्य हेतोर्जरद्गवमुपसृतवान् ?

८. जरद्गवः कुत्र वसति स्म ?

९. पक्षिशावकाः किमर्थं भयमुपगताः ?

२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३ सविग्रहं समासनामानि लिखत ।

भागीरथीतीरे । गृध्रकूटनाम्नि । पर्कटीवृक्षः । दैवदुर्विपाकात् । गलित-नखनयनः। तद्वृक्षवासिनः । तज्जीवनाय । स्वाहाराद् । दीर्घकर्णनामा । पक्षिशावकान्। पक्षिशावकैः । भयार्तैः । दीर्घकर्णः । सभयम् । अस्मद्वचनम् । तरुकोटरे ।

४ सन्धिं कुरुत ।

गृध्रस्+निवसति । तत्+जीवनाय । स्व+आहारात् । किञ्चित्+उद्धृत्य । तेन+असौ । कस्–अयम् । हतस्+अस्मि । अधुना+अस्य । तत्+यथा । उत्पाद्य+अस्य। इति+आलोच्य । उपसृत्य+अब्रवीत् । मार्जारस्+अहम् । हन्तव्यस्+असि । यदि+अहम्। वध्यस्+तदा ।

५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

गलितः । उद्धृत्य । भक्षितुम् । श्रुत्वा । अवलोक्य । उक्तम् । हतः । उत्पाद्य । हन्तव्यः । वध्यः ।

६ वाच्यपरिवर्तनं कुरुत ।

१. पक्षिणो जरद्गवाय स्वाहारादुद्धृतमंशं ददति ।

२. पक्षिशावकैरागच्छन् मार्जारोऽवलोकितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. मार्जारः गृध्रमपश्यत् ।

४. जरद्गवमुपसर्पता तेन विश्वास उत्पादितः ।

५. ततः स तत्रैवाऽतिष्ठत् ।

७ वाक्यविश्लेषणं कुरुत ।

१. गोदावरीतीरे गृध्रकूटनाम्नि पर्वते स्थितस्य पर्कटीवृक्षस्य कोटरे दैवदुर्विपाकाद् गलितनखनयनो गरद्गवनामा गृध्रो निवसति ।

२. तद्वृक्षवासिभिः पक्षिभिः स्वाहारादुद्धृत्य दत्तेनाहारेण स जीवनं यापयति।

३. अथ कदाचित् पक्षिशावकान् भक्षयितुं तत्रागतं मार्जारं विलोक्य भयार्तैः तत्रस्थैः खगपोतैः कोलाहलः कृतः ।

८ निर्धारितपाठस्य सरलार्थं लिखत ।

९ कमपि कथानकं प्रकल्प्य संवादमेकं रचयत ।

१० रेखाङ्कितपदानां कारकविभक्तिनिर्देशं कुरुत ।

११ अधोलिखितपदानां वर्गं निर्धारयत-

भागीरथी । तीरम् । पर्वतः । महान् । वृक्षः । तस्य । गलितनखनयनः । कृपा । पक्षिणः । जीवनाय । किञ्चिद् । उद्धृत्य । तेन । असौ । जीवति । अथ । कदाचित्। मार्जारः । भक्षितुम् । तत्र । ततः । तम् । आयान्तम् । दृष्ट्वा । भयार्तैः । शावकैः कोलाहलः । उक्तम् । कः । आलोक्य । सभयम् । नो चेत् । मया । अवदत्। धर्मज्ञाः । तेन । अहम् । विश्वास्य । परमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशः पाठः

जरद्गव-दीर्घकर्णकथा-२

ततो दिनेषु गच्छत्स्वसौ पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। अथ येषामपत्यानि खादितानि, तैः शोकार्त्तैर्विलद्भिरितस्ततो जिज्ञासा प्रारब्धा। तत्परिज्ञाय मार्जारः कोटरान्निस्सृत्य बहिः पलायितः । पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं त ऊचुः- अनेनैव जरद्गवेनास्माकं शावकाः खादिताः । इति सर्वैः पक्षिभिर्निश्चित्य

१४.१ ततः = तदनन्तरम् (त्यसपछि) दिनेषु = दिवसेषु (दिनहरू) गच्छत्सु = व्यतीतेषु (बित्दै गएपछि) असौ = दीर्घकर्णः (यस बिरालाले) पक्षिशावकान् = खगपोतान् (पक्षीका बच्चाहरूलाई) आक्रम्य = आक्रमणं कृत्वा (झम्टिएर) कोटरम् = निष्कुहम् (टोड्कामा) आनीय = प्रापय्य (ल्याएर) प्रत्यहम् = प्रतिदिनम् (दिनदिनै) खादति = भक्षयति (खान थाल्यो) येषाम् = पक्षिणाम् (जुन पक्षीका) अपत्यानि = सन्ततयः (बच्चाहरू) खादितानि = भक्षितानि (खाइए) तैः = पक्षिभिः (ती पक्षीहरूले) शोकार्त्तैः= पीडितैः (शोकाकुल भएर) विलपद्भिः = विलापं कुर्वद्भिः (विलाप गर्दै) इतस्ततः = यत्र तत्र (यताउति) जिज्ञासा = अन्वेषणम् (खोज्ने काम) समारब्धा = प्रारब्धा (सुरु गरे) तत् = शावकान्वेषणम् (बच्चा खोजी गर्न थालेको) परिज्ञाय = ज्ञात्वा (थाहा पाएर) मार्जारः = बिडालः (बिरालो) कोटरात् = निष्कुहात् (टोड्काबाट) निःसृत्य = निर्गत्य (निक्लिएर) बहिः पालयितः = बहिर्ययौ (बाहिर भाग्यो) पश्चात् = तदनन्तरम् (बिरालो भागेपछि) पक्षिभिः = विहगैः (चराहरूले) इतस्ततः = यत्रतत्र (यताउति) निरूपयद्भिः = शिशूनन्वेषयद्भिः (बच्चा खोज्दा) तत्र = तस्मिन् (त्यो) तरुकोटरे = वृक्षनिष्कूहे (रुखको टोड्कामा) शावकास्थनि= पोतकीकसानि (बच्चाका हड्डीहरू) प्राप्तानि= समासादितानि (भेटे) अनन्तरम् = पश्चात् (त्यसपछि) ते = पक्षिणः (ती चराहरूले) ऊचुः = जगदुः (भने) अनेनैव = एतेनैव (यसै) जरद्गवेन = गृध्रेण (गिद्धले) अस्माकम्= पक्षिणाम् (हाम्रा) शावकाः = पोताः (बच्चाहरू) खादिताः = भक्षिताः (खायो) इति= इत्थम् (यस्तो) सर्वैः = समस्तैः (सबै) पक्षिभिः = खगैः (चराहरूले) निश्चित्य = स्थिरीकृत्य (निश्चय गरेर) गृध्रः = दाक्षाय्यः (गिद्ध) व्यापादितः = मारितः (मारियो)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृध्रो व्यापादितः।

१४.२ विग्रहः - पक्षिशावकान् - पक्षिणां शावकाः (ष.त.) तान् । **शोकार्तैः** - शोकेन आर्ताः (तृ.त.) तैः । **तरुकोटरे** - तरोः कोटरम् (ष.त.) तस्मिन् । **शावकास्थीनि**- शावकानाम् अस्थीनि (ष.त.) । **प्रत्यहम्** - अहनि अहनि इति (अव्य.) ।

१४.३ प्रकृतिप्रत्ययविच्छेदः - आक्रमम्य - आ-क्रम् + क्त्वा > ल्यप् । **आनीय** - आ-नी + क्त्वा > ल्यप् । **खादितम्** - खाद् + क्त । **विलपन्** - वि-लप् + लट् > शतृ । **प्रारब्धः** - प्रा-रभ्+क्त । **परिज्ञाय** - परि - ज्ञा + क्त्वा > ल्यप् । **निश्चितः**- निस् - चि + क्त । **निरूपयन्** - नि - रूप् + लट् > शतृ । **खादितुम्** - खाद् + तुमुन्। **निश्चित्य** - निस् - चि + क्त्वा > ल्यप् । **व्यापादितः** - वि-आ- पद् + णिच् + क्त ।

१४.४ कोषः - दिनम् - घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ, इत्यमरः । **शावकः** - पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः इत्यमरः । **शोकः** - मन्युशोकौ तु शुक् स्त्रियाम्, इत्यमरः। **पक्षी** - शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः, इत्यमरः । **तरुः**- वृक्षो महीरुहः शाखी विटपी पादपस्तरुः, इत्यमरः । **अस्थि**- कीकसं कुल्यमस्थि च, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ **उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत।**

१. जरद्गवः प्रत्यहं किं करोति ?
२. खगैः का जिज्ञासा प्रारब्धा ?
३. पक्षिभिः शावकास्थीनि कुत्र प्राप्तानि ?
४. मार्जारः किमर्थं पलायितः ?
५. गृध्रः कथं मृतः ?
६. अनया कथया का शिक्षा लभ्यते ?

२ **निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।**

३ **सविग्रहं समासनामानि लिखत ।**

पक्षिशावकान् । शोकार्तैः । तरुकोटरे । शावकास्थीनि । प्रत्यहम् ।

४ **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

आक्रम्य। आनीय । खादितम् । विलपन् । प्रारब्धः । परिज्ञाय । निश्चितः। निरूपयन् । खादितुम् । निश्चित्य । व्यापादितः ।

५ **निर्धारितपाठस्य सरलार्थं लिखत ।**

६ **वाक्यविश्लेषणं कुरुत ।**

१. ततो दिनेषु गच्छत्सु मार्जारः पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति।
२. ततोऽपत्यवियोगेन दुःखितैर्विलपद्भिः पक्षिभिः प्रारब्धां जिज्ञासां परिज्ञाय मार्जारस्तरुकोटरान्निस्सृत्य पलायितः ।
३. इतस्ततो निरूपयन्तः पक्षिणस्तरुकोटरे शावकास्थीनि प्राप्य गृध्रमेव शावकभक्षकं निश्चित्य तं व्यापादितवन्तः ।

७ **वाच्यपरिवर्तनं कुरुत ।**

१. प्रत्यहं मार्जारः पक्षिशावकानाक्रमति, खादति च ।
२. दीर्घकर्णेन येषामपत्यानि खादितानि तैः शोकार्तैरितस्ततो जिज्ञासा प्रारब्धा।
३. अनैनैव जरद्गवेनास्माकं शावकाः खादिता इति निश्चित्य सर्वैः पक्षिभिः गृध्रो व्यापादितः ।

८ **सन्धिं कुरुत ।**

प्रति+ अहम् । कोटरात्+निस्सृत्य ते+ऊचु । अनेन+एव । जरद्गवेन+ अस्माकम् । गृध्रस्+व्यापादितः । पक्षिभिः+तत्र। शावकान्+आक्रम्य ।

९ **रेखाङ्कितपदानां कारकविभक्तिनिर्देशं कुरुत ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशः पाठः

चूडाकर्ण-वीणाकर्णकथा

अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः । तत्र चूडाकर्णो नाम परिव्राट् प्रतिवसति । स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहञ्च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रियसुहृद् वीणाकर्णो नाम परिव्राजकः समायातः । तेन सह कथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत् ।

१५.१ **चम्पकाभिधानायाम्** = चम्पकनाम्न्याम् (चम्पक नाम गरेको) **नगर्याम्**= पुर्याम् (शहरमा) **परिव्रजाकावसथः** = भिक्षुकनिवासस्थानम् (भिक्षुहरूको बस्ने ठाउँ) **अस्ति** = वर्तते (छ) **तत्र** = तस्मिन् स्थाने (त्यसै बस्तीमा) **चूडाकर्णो नाम** = तदाख्यः (चूडाकर्ण नाम गरेको) **परिब्राट्** = सन्यासी (जोगी) **प्रतिवसति** = निवसति (बस्तथ्यो) **सः**= चूडाकर्ण (त्यो चूडाकर्ण) **भोजनावशिष्टभिक्षान्नसहितम्** = भुक्तशेषान्नयुक्तम् (खाएर बचेको अन्न भएको) **भिक्षापात्रम्** = भिक्षाभाजनम् (भिख माग्ने भाँडो) **नागदन्तके** = काष्ठनिर्मितभित्तिस्थकीलके (सिंगौरामा) **अवस्थाप्य** = निधाय (राखेर) **स्वपिति** = शयनं करोति (सुत्तथ्यो) **अहम् च** = हिरण्यकश्च (म पनि) **उत्प्लुत्य** = उत्प्लवनं विधाय (उफ्रेर) **तदन्नम्**= भोजनावशिष्टान्नम् (खाएर बचेको अन्न) **प्रतिदिनम्** = प्रत्यहम् (दिनदिनै) **भक्षयामि** = खादामि (खाने गर्थें) **अनन्तरम्** = कतिचिद्दिवसानन्तरम् (केही दिनपछि) **तस्य** = चूडाकर्णस्य (चूडाकर्णको) **प्रियसुहृद्** = प्रियमित्रम् (प्यारो मित्र) **वीणाकर्णः**= तन्नामकः (विणाकर्ण नामको) **परिव्राजकः** = सन्यासी (जोगी) **समायातः** = उपस्थितः (आयो) **तेन** = वीणाकर्णेन सह (त्यस वीणाकर्णका साथ) **कथाप्रसङ्गावस्थितः** = वार्तालापासक्तः (कुराकानी गर्दागर्दै) **चूडाकर्णः** = तन्नामा सन्यासी (चूडाकर्णले) **मम**= हिरण्यकस्य (मलाई) **त्रासार्थम्** = भयार्थम् (डर देखाउन) **जर्जरवंशखण्डेन** = जीर्णवंशशकलेन (थोत्रो बाँसको टुत्राले) **भूमिम्** = पृथिवीम् (भुई) **अताडयत्** = ताडयाञ्चकार (हिर्कायो) **वीणाकर्णः** = तदाख्यः सन्यासी (वीणाकर्णले) **उवाच** = जगाद (भन्यो) **सखे** = मित्र (हे मित्र) **भवान्** = त्वम् (तपाइँ) **किमिति** = किमर्थम् (किन) **मम** = मे (मेरो) **कथायाम्** = वार्तालापे (कुराकानीमा) **विरक्तः** = निस्पृहः (वास्ता गर्नु हुन्न) **अन्यासक्तः** = अन्यदत्तचित्तः (अन्तै चित्त दिनु हुन्छ) **चूडाकर्णेन** =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीणाकर्ण उवाच-

सखे, किमिति भवान् मम कथायां विरक्तोऽन्यासक्तः । चूडाकर्णेनोक्तम् - सखे, नाहं विरक्तः, किन्तु पश्यायं मूषिको ममापकारी सदा पात्रस्थमन्नमुत्प्लुत्य भक्षयति । वीणाकर्णो नागदन्तकं विलोक्याह- कथमसौ मूषिकः स्वल्पबलोऽपि, एतावद् दूरमुत्पतति ? तदत्र केनापि कारणेन भवितव्यम् । क्षणं विचार्य परिव्राजकेनोक्तम्- कारणञ्चात्र धनबाहुल्यमेव भविष्यति ।

तदाख्यसन्यासिना (चूडाकर्णले) **उक्तम्** = कथितम् (भन्यो) **मित्र!** = भो सखे (हे मित्र) **अहम्** = चूडाकर्णः (म) **न विरक्तः** = न निस्पृहः (विरक्त बनेको होइन) **किन्तु** = परन्तु (तर) **पश्य** = विलोकय (हेर्नुहोस्) **मम** = मे (मेरो) **अपकारी** = हानिकर्ता (अपकार गर्ने) **अयम्** = एषः (यो) **मूषिकः** = आखुः (मूसाले) **सदा** = नित्यम् (सँधै) **पात्रस्थम्**= भाजनस्थम् (भाँडोमा रहेको) **भिक्षान्नम्** = भिक्षया प्राप्तमन्नम् (भिक्षाबाट ल्याएको अन्न) **उत्प्लुत्य** = उत्प्लवनं विधाय (उफ्रिएर) **भक्षयति** = खादति (खान्छ) **वीणाकर्णः** = तदाख्यसन्यासी (वीणाकर्णले) **नागदन्तकम्** = दारुरचितकीलकम् (सिंगौरीलाई) **विलोक्य**= दृष्ट्वा (हेरेर) **आह** = उवाच (भन्यो) **कथम्** = केन प्रकारेण (कसरी) **असौ** = एषः (यो) **मूषिकः** = आखुः (मूसो) **स्वल्पबलोऽपि** = स्वल्पशक्तिरपि (थोरै बल भएर पनि) **एतावद्दूरम्** = ईयद्विप्रकृष्टम् (यति टाढा) **उत्पतति** = उत्प्लवते (उफ्रन्छ) **तत्**= तस्मात् (त्यसैले) **अत्र** = अस्मिन्नुत्पतने (यस उफ्राइमा) **केनापि** = केनचित् (कुनै) **कारणेन** = हेतुना (कारण) **भवितव्यम्** = स्यात् (हुनुपर्छ) **क्षणम्** = किञ्चित् कालम् (केही समय) **विचार्य** = विचिन्त्य (सोचेर) **परिव्राजकेन** = वीणाकर्णेन (वीणाकर्णले) **उक्तम्** = कथितम् (भन्यो) **अत्र** = अस्मिन् मूषिकोत्प्लवने (यो मूसाको उफ्राइमा) **धनबाहुल्यम्** = द्रव्याधिक्यम् (धेरै सम्पत्ति हुनु नै) **कारणम्** = निदानम् (कारण) **भविष्यति** = भवेत् (होला) **ततः** = तदनन्तरम् (त्यसपछि) **खनित्रम्** = भूखननास्त्रम् (खन्ती) **आदाय** = गृहीत्वा (लिएर) **तेन** = वीणाकर्णेन (त्यस वीणाकर्णले) **विवरम्** = बिलम् (प्वाल) **खनित्वा** = अवदार्य (खनेर) **चिरसञ्चितम्** = बहुकालात् एकत्रीकृतम् (धेरै समयदेखि बटुलेको) **मम** = हिरण्यकस्य (मेरो) **धनम्** = वित्तम् (सम्पत्ति) **गृहीतम्**= धृतम् (लियो) **ततः प्रभृति** = तस्माद् दिनात् आरभ्य (त्यसै दिनदेखि) **निजशक्तिहीनः**= निजपुरुषार्थशून्यः (पुरुषार्थले रहित भएर) **सत्त्वोत्साहरहितः** = पराक्रमोत्साहशून्यः (पराक्रम र उत्साहले शून्य भई) **स्वाहारमपि** = निजभोज्यद्रव्यमपि (आफूले खाने अन्न पनि) **उत्पादयितुम्** = अर्जयतुम् (कमाउन) **अक्षमः** = असमर्थः (नसकेर) **सत्रासम्**= सभयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः खनित्रमादाय तेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम् । ततः प्रभृति निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दमन्दमुपसर्पन् चूडाकर्णेनावलोकितो जर्जरवंशखण्डेन ताडितश्च । ततोऽहं निर्जनवनमागतः ।

(डरका साथ) **मन्दं मन्दम्** = शनैः शनैः (विस्तार-विस्तारै) **उपसर्पन्** = गच्छन् (हिंड्दा) **चूडाकर्णेन** = तन्नामकेन परिव्राजकेन (चूडाकर्णले) **अवलोकितः** = दृष्टः (देख्यो र) **जर्जरवंशखण्डेन** = जीर्णकीचकशकलेन (थोत्रो बाँसको कुड्काले) **ताडितश्च**= आहतश्च (हिर्कायो पनि) **ततः**= तदनन्तरम् (त्यसपछि) **निर्जनवनम्**= जनशून्यं विपिनम् (मान्छे नभएको जङ्गलमा) **आगतः** = प्राप्तः (आएँ)।

१५.२ विग्रहः - **चम्पकाभिधानायाम्**- चम्पकः अभिधानं यस्याः तस्याम् (बहु.)। **परिव्राजकावसथः**- परिव्राजकानामावसथः (ष.त.)। **भोजनावशिष्टभिक्षान्नसहितम्**- भोजनात् अवशिष्टम् (प. त.) तच्च तद् भिक्षान्नं (कर्म.) तेन सहितम् (तृ.त.)। **भिक्षापात्रम्**- भिक्षायै पात्रम् (च.त.) । **प्रत्यहम्** - अहनि अहनि (अव्य.) । **कथाप्रसङ्गावस्थितः** - कथायाः प्रसङ्गः (ष.त.) तेन अवस्थितः (तृ.त.)। **जर्जरवंशखण्डेन**- जर्जरश्चासौ वंशखण्डः (कर्म.) तेन । **कथाविरक्तः** - कथायां विरक्तः (स.त.)। **अन्यासक्तः** - अन्यस्मिन् आसक्तः (स.त.) । **पात्रस्थम्** - पात्रे तिष्ठतीति (उपप.) । **अवलः** - न विद्यते बलं यस्य सः (बहु.) । **धनबाहुल्यम्** - धनानां बहुल्यम् (ष.त.) । **चिरसञ्चितम्** - चिरात् सञ्चितम् (प.त.) । **निजशक्तिहीनः** - निजा चासौ शक्तिः (कर्म.) तया हीनः (तृ.त.)। **सत्त्वोत्साहरहितः** - सत्त्वञ्च उत्साहश्च (द्वन्द्व.) ताभ्यां रहितः (तृ.त.)। **निर्जनवनम्** - निर्जनञ्च च तद् वनम् (कर्म.) तत् ।

१५.३ **प्रकृतिप्रत्ययविच्छेदः** - **अवस्थाय** - अव- स्था + क्त्वा > ल्यप् । **समायातः** - सम् - आ- या + क्त । **अवस्थितः** - अव- स्था+क्त । **अपकारी** - अप- कृ + णिनि । **कारणम्** - कृ + ल्युट् > अन । **भवितव्यम्** - भू + तव्यत् । **खनित्रम्**- खन् + इत्र । **आदाय** - आ-दा+ क्त्वा > ल्यप् । **खनित्वा** - खन् + क्त्वा । **सञ्चितम्**- सम् - चि + क्त । **गृहीतम्** - ग्रह + क्त । **हीनः** - हा + क्त । **उपसर्पन्** - उप-सृप् + लट्> शतृ । **अवलोकितः** - अव-लोक्+क्त । **ताडितः** - ताड्+क्त । **आगतः** - आ-गम्+क्त।

१५.४ **कोषः** - **नगरी** - पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम्, इत्यमरः। **भूमिः**- भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा । धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा । गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही, इत्यमरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनगद्यभागमधीत्य निम्नप्रश्नानामुत्तराणि लिखत ।

१. परिव्राजकानां वसतिः कुत्रासीत् ?

२. चूडाकर्णः किं कृत्वा अशेत ?

३. मूषकः प्रत्यहं किं खादति स्म ?

४. चूडाकर्णस्य गृहे कः समागतः ?

५. चूडाकर्णः किमर्थं भूमिमताडयत् ?

६. वीणाकर्णस्य कथायां कस्य विरक्तिरासीत् ?

७. परिव्राजकेन किं कृत्वा मूषकस्य धनं हृतम् ?

८. चूडाकर्णेन मूषकः केन ताडितः ?

९. धने हृते मूषकस्य का दशा सञ्जाता ?

१०. मूषकः किमर्थं निर्जनवनमागतः ?

२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३ सन्धिं कुरुत-

चूडाकर्णस्+नाम। नागदन्तके+अवस्थाप्य। अहम्+च । विरक्तस्+अन्याशक्तः। चूडाकर्णेन+उक्तम् । मम+अपकारी । विलोक्य+आह । अबलस्+अपि । ताडितस्+च।

४ सविग्रहं समासनामानि लिखत ।

चम्पकाभिधानायाम् । परिव्राजकावसथः । भोजनावशिष्टभिक्षान्नसहितम् । भिक्षापात्रम् । प्रत्यहम् । कथाप्रसङ्गावस्थितः । जर्जरवंशखण्डेन । कथाविरक्तः । अन्यासक्तः । पात्रस्थम् । अबलः । धनबाहुल्यम् । चिरसञ्चितम् । निजशक्तिहीनः। सत्त्वोत्साहरहितः । निर्जनवनम्।

५ वाच्यपरिवर्तनं कुरुत ।

१. मूषका उत्पतन्तोऽन्नानि भक्षयन्ति ।

२. चूडाकर्णो जर्जरवंशखण्डेन भूमिमताडयत् ।

३. वीणाकर्णेनान्यकथाशक्तश्चचूडाकर्ण उक्तः ।

४. अयं मूषिको ममापकारी पात्रस्थमन्नं भक्षयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५. क्षणं विचार्य परिव्राजकेनोक्तम् ।

६. खनित्रमादाय वीणाकर्णेन विवरं खनितम्, धनञ्च गृहीतम् ।

७. ततः शक्तिहीनः सत्त्वोत्साहरहितो मन्दमुपसर्पन्नहं वीणाकर्णेनावलोकितस्ताडितश्च।

६ निर्धारितपाठस्य सरलार्थं लिखत ।

७ परस्परं वदतोः परिव्राजकयोः संवादं रचयत ।

८ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

अवस्थाय । समायातः । अवस्थितः । अपकारी । कारणम् । भवितव्यम् । खनित्रम् । आदाय । खनित्वा । सञ्चितम् । गृहीतम् । हीनः । उपसर्पन् । अवलोकितः। ताडितः । आगतः ।

९ पाठान्तर्गतान्यव्ययपदानि कर्तृकर्मकरणापदानि चान्विष्य लिखत ।

१० निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

प्रतिवसति । उत्प्लुत्य । अवस्थाप्य । पश्य । आदाय । खनित्वा । उत्पादयितुम्। अवलोकितः । ताडितः । विचार्य ।

११ रेखाङ्कितपदानां कारकविभक्तिनिर्देशं कुरुत ।

१२ कमपि विषयमवलम्ब्य स्वल्पमनुच्छेदं रचयत ।

१३. अधोनिर्दिष्टपदानि प्रयुज्य विभक्तीश्च विपरिणमय्य संकथनं पूरयत–

चम्पकनाम्नी नगरी । तत्र । परिव्राजकाः । आवसथः । चूडाकर्णो नाम । परिव्राट्। निवसति । स च । भिक्षान्नपात्रम् । नागदन्तकम् । संस्थाप्य । स्वपिति । मूषिकः । उत्प्लुत्य । तद् । भिक्षान्नम् । खादति । स च । मूषिकः । त्रासः । जर्जरवंशखण्डः। भूमिः । ताडयति । एकदा । तद् । मित्रम् । वीणाकर्णः । चूडाकर्णः। गृहम् । प्रत्यागतः । कथाप्रसङ्गः । अन्यासक्तः । तम् । सः । आह । किमर्थम् । त्वम् । मम। कथाः । विरक्तः । चूडाकर्णः । उक्तम् । अहम् । न । विरक्तः । किन्तु। अहम्। अपकारी । भिक्षापात्रम् । स्थापितम् । अन्नम् । उत्प्लुत्य । खादति । अतः। सः । ताडयामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशः पाठः

भैरवव्याध-दीर्घरावजम्बूककथा

आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मृगमन्विष्यमाणो विन्ध्याटवीं गतवान् । ततस्तेन व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः । तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेणाहतः । शूकरेणापि घनघोरगर्जनं कृत्वा स व्याधो मुष्कदेशे हतः । ततोऽसौ संछिन्नद्रुम इव भूमौ निपपात । अथ तयोः पादास्फालनेन एकः सर्पोऽपि मृतः । अनन्तरं

१६.१ **कल्याणकटकवास्तव्यः** = कल्याणकटकाख्ये नगरे निवासकर्ता (कल्याणंकटक नाम गरेको शहरमा बस्ने) **भैरवो नाम** = भैरवाभिधः (भैरव नाम गरेको) **व्याधः** = लुब्धकः (व्याधा) **आसीत्** = अभूत् (थियो) **सः** = भैरवः (त्यो भैरव) **एकदा** = एकस्मिन्दिने (एक दिन) **मृगम्** = हरिणम् (मृगलाई) **अन्विष्यमाणः**= मार्गमाणः (खोज्दै) **विन्ध्याटवीम्** = विन्ध्यवनम् (विन्ध्याचलको वनमा) **गतवान्** = जगाम (गयो) **ततः** = तदनन्तरम् (त्यसपछि) **तेन** = भैरवेण (त्यस भैरव नामक व्याधाले) **व्यापादितम्** = हतम् (मारेको) **मृगम्** = हरिणम् (मृगलाई) **आदाय**= गृहीत्वा (लिएर) **गच्छता** = भ्रमता (जाँदा) **घोराकृतिः** = भयंकराकारः (डर लाग्दो आकार भएको) **शूकरः** = वराहः (बँदेल) **दृष्टः** = अवलोकितः (देख्यो) **तेन व्याधेन** (त्यस व्याधाले) **मृगम्** = हरिणम् (मृगलाई) **भूमौ** = पृथिव्याम् (भूमिमा) **निधाय** = स्थापयित्वा (राखेर) **शूकरः** = वराहः (बँदेललाई) **शरेण** = वाणेन (वाणले) **आहतः**= विद्धः (हिर्कायो) **शूकरेणापि** = वराहेण च (बँदेलले पनि) **घनघोरगर्जनम्** = भयानकशब्दम् (डरलाग्दो शब्द) **कृत्वा** = विधाय (गरेर) **स व्याधः** = स लुब्धकः (त्यस व्याधालाई) **मुष्कदेशे**= अण्डकोशे (अण्डकोशमा) **हतः** = ताडितः (हान्यो) **ततः** = तदनन्तरम् (त्यसपछि) **असौ** = व्याधः (यो व्याधा) **संछिन्नः** = भिन्नः (काटिएको) **द्रुम इव** = वृक्ष इव (रूख झैं) **भूमौ** = पृथिव्याम् (पृथ्वीमा) **निपपात** = अपतत् (लड्यो, पछारियो) **अथ** = अनन्तरम् (यसपछि) **तयोः** = शूकरव्याधयोः (बँदेल र व्याधाको) **पादास्फालनेन**= चरणताडनेन (गोडाको हिर्काइले) **एकः सर्पोऽपि** = एको भुजगश्च (एउटा सर्प पनि) **मृतः** = हतः (मर्‍यो) **अथ** = अनन्तरम् (यसपछि) **आहारार्थी** = भोजनार्थी (खानेकुराको खोजी गर्ने) **दीर्घरावो नाम** = दीर्घरावाभिधः (दीर्घराव नाम गरेको) **जम्बुकः** = श्रृगालः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान् मृतान् मृगव्याधसर्पशूकरानपश्यत्, अचिन्तयच्च-अहो, महद् भोज्यं मे समुपस्थितम् । तद्भवतु, एषां मांसैर्मासत्रयं मे सुखेन गमिष्यति। ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि । इत्युक्त्वा तथा कृते सति छिन्ने स्नायुबन्धने समुत्पतितेन धनुषा

(स्यालले) **परिभ्रमन्** = यत्र तत्र गच्छन् (यताउति हिंड्दा) **तान्** = पूर्वोक्तान् (अघि भनिएका) **मृतान्** = निष्प्राणान् (मरेका) **मृगव्याधसर्पशूकरान्** = हरिणलुब्धकभुजगवराहान् (मृग, व्याधा, सर्प र बँदेललाई) **अपश्यत्** = दृष्टवान् (देख्यो) **अहो** = हर्षस्यायं विषयः (यो बडो खुशीको विषय छ) **अद्य** = अस्मिन्दिने (आज) **मे** = मम जम्बुकस्य (मेरो निम्ति) **महद्भोज्यम्** = बहुभोजनपदार्थः (धेरै खाने कुरा) **समुपस्थितम्** = लब्धम् (प्राप्त भयो) **तद्भवतु**= अस्तु (भैगयो) **एषाम्** = चतुर्णाम् (यी चार जनावरको) **मांसैः**= पिशितैः (मासुले) **मे** = मम शृगालस्य (मेरो) **सुखेन** = अक्लेशेन (कुनै दुःख नगरीकन) **मासत्रयम्** = त्रयो मासाः (तीन महिना) **गमिष्यति** = यास्यति (जानेछ) **ततः** = तस्मात् (त्यसैले) **प्रथमबुभुक्षायाम्** = पूर्वक्षुधायाम् (पहिलो भोकमा) **इदम्** = पुरोगतम् (अगाडि रहेको) **निःस्वादु** = स्वादुरहितम् (स्वाद नभएको) **कोदण्डलग्नम्** = धनुषि संलग्नम् (धनुषमा लागेको) **स्नायुबन्धनम्** = अन्त्रम् (नशाको डोरी) **खादामि** = भक्षयामि (खान्छु) **इत्युक्त्वा** = इत्यभिधाय (यति भनेर) **तथा कृते सति** = भक्षिते सति (खाँदा) **स्नायुबन्धने** = अन्त्रे (नशाको डोरी) **छिन्ने** = भिन्ने (टुटेपछि) **उत्पतितेन** = ऊर्ध्वं गच्छता (माथितिर उफ्रिएको) **धनुषा** = चापेन (वाणले) **हृदि** = उरसि (छातीमा) **निर्भिन्नः** = निहतः (छेडिएको) **स दीर्घरावः** = सः शृगालः (त्यो स्याल) **पञ्चत्वम् गतः** = मृतः (मऱ्यो) **अत एव** = अस्मादेव कारणात् (यसैकारणले) **उक्तम्** = कथितम् (भनिएको छ) **सञ्चयः** = संग्रहः (जम्मा गर्ने काम) **नित्यम्** = सदा (सँधै) **कर्तव्यः** = विधातव्यः (गर्नुपर्छ) तर **अतिसञ्चयः** = अधिकसंग्रहः (धेरै सञ्चय भने) **न** = न कर्तव्यः (गर्नु हुँदैन) ।

१६.२ **विग्रहः – कल्याणकटकवास्तव्यः** – कल्याणकटकस्य वास्तव्यः (ष.त.)। **घोराकृतिः** – घोरा आकृतिः यस्य सः (बहु.)। **घनघोरगर्जनम्** – घनघोरं च तद् गर्जनम् (कर्म.) । **मुष्कदेशे** – मुष्कश्चासौ देशः (कर्म.) तस्मिन् । **संछिन्नद्रुमः** – संछिन्नश्चासौ द्रुमः (कर्म.) । **पादास्फालनेन** – पादयोः आस्फालनम् (ष.त.) तेन । **मृगव्याधसर्पशूकरान्**– मृगश्च व्याधश्च सर्पश्च शूकरश्च (द्वन्द्व.) तान् । **मासत्रयम्** – मासानां त्रयम् (ष.त.) । **प्रथमबुभुक्षायाम्**– प्रथमा चासौ बुभुक्षा (कर्म.) तस्याम् । **कोदण्डलग्नम्**– कोदण्डे लग्नः (स.त.) तत्। **स्नायुबन्धनम्** – स्नायोः बन्धनम् (ष.त.) तत् । **अतिसञ्चयः**–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्भिन्नः स दीर्घरावः पञ्चत्वङ्गतः अत एवोक्तम्- कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसञ्चयः ।

अतिशयश्चासौ सञ्चयः (कर्म.) ।

१६.३ प्रकृतिप्रत्ययविच्छेदः - वास्तव्यः - वस् + तव्यत् । **अन्विष्यमाणः** - अनु - इष् + लट् > शानच् । **गतवान्** - गत + मतुप् > वतुप् । **व्यापादितवान्** - व्यापादित + मतुप् > वतुप् । **आदाय** - आ-दा+क्त्वा >ल्यप् । दृष्टः - दृश् + क्त । **निधाय** - नि-धा+क्त्वा > ल्यप् । **आहतः** - आ-हन् +क्त । **गर्जनम्** - गर्ज् + ल्युट् > अन । **मृतः** - मृ + क्त । **परिभ्रमन्** - परि-भ्रम् + लट् > शतृ । **उत्पतितः** - उत् - पत्+ क्त । **निर्भिन्नः** - निर्-भिद् + क्त । **कर्तव्यम्** - कृ + तव्यत्। **छिन्नः** - छिद् + क्त । **समुपस्थितः**- सम् - उप- स्था + क्त । **सञ्चयः**- सम् - चि + अच्।

१६.४ कोषः – मृगः – मृगे कुरङ्गवातायुहरिणाजिनयोनयः, इत्यमरः । **शूकरः** - वराहः शूकरो घृष्टिः कोलः पोत्री किरः कीटी । दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यापि, इत्यमरः । **सर्पः** - सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः । आशीविषो विषधरश्चक्री व्यालः सरीसृपः । कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी । दर्वीकरो दीर्घपृष्ठो दन्तशूको विलेशयः । उरगः पन्नगो भोगी जिह्मगः पवनाशनः, इत्यमरः । **कोदण्डः** – धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् । इष्वासोऽपि, इत्यमरः । **स्नायुः** – अथ वस्नशा । स्नायुः स्त्रियम्, इत्यमरः । **धनुः** – पृषत्कवाणवशिखा अजिह्मगखगाशुगाः । कलम्ब मार्गणशराः पत्री रोप इषुर्द्वयोः । **द्रुमः** - वृक्षो महीरूहः शाखी विटपी पादपस्तरुः, अनोकहः कुटः सालः पलाशी द्रद्रुमागमाः, इत्यमरः । **पादः** - पादः पदङ्घ्रिचरणोऽस्त्रियाम्, इत्यमरः । **मांसम्**- पिशितं तरसं मांसं पललं क्रव्यमामिषम्, इत्यमरः । **मुष्कः**- मुष्कोऽण्डकोशो वृषणः, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।

१. भैरवो नाम व्याधः कुत्र वसति स्म ?
२. व्याधः किमर्थं विन्ध्याटवीं गतवान् ?
३. शूकरः केन दृष्टः ?
४. व्याधः क इव भूमौ पपात ?
५. दीर्घरावः कथं पञ्चत्वमगच्छत् ?

२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३ सन्धिं कुरुत ।

भैरवस्+नाम । घोरा+आकृतिः । शूकरस्+दृष्टः । द्रुमस्+इव । शूकरेण+अपि। सर्पस्+अपि । परिभ्रमन्+आहारार्थी । इति+उक्त्वा । सम्+चयः । तत्+भवतु । न+अतिसञ्चयः।

४ सविग्रहं समासनामानि लिखत ।

कल्याणकटकवास्तव्यः । घोराकृतिः । घनघोरगर्जनम् । मुष्कदेशे । संछिन्नद्रुमः पदास्फालनेन । मृगव्याधसर्पशूकरान् । महद्भोज्यम् । मासत्रयम् । प्रथमबुभुक्षायाम्। कोदण्डलग्नम् । स्नायुबन्धनम् । अतिसञ्चयः ।

५ निर्धारितपाठस्य सरलार्थं लिखत ।

६ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

वास्तव्यः । अन्विष्यमाणः । गतवान् । व्यापादितवान् । आदाय । दृष्टः । निधाय । आहतः । गर्जनम् । मृतः । परिभ्रमन् । भोज्यम् । उत्पतितः । निर्भिन्नः । कर्तव्यम् । छिन्नः । समुपस्थितः । सञ्चयः ।

७ वाच्यपरिवर्तनं कुरुत ।

१. कल्याणकटकवास्तव्यो भैरवो नाम व्याधो मृगमन्विष्यमाणो विन्ध्याटवीमगच्छत्।
२. मृगमादाय गच्छाता व्याधेन घोराकृतिः शूकरो दृष्टः ।
३. तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेणाहतः ।
४. शूकरेणापि घनघोरगर्जनं कृत्वा मुष्कदेशे हतो व्याधः संछिन्नद्रुम इव भूमावपतत्।
५. अथ दीर्घरावनामा जम्बूकः परिभ्रमन्नाहारार्थी मृगव्याधसर्पशूकरानपश्यत्।

९ विशेषणपदान्यन्विष्य लिखत ।

१० कमप्येकं विषयमवलम्ब्य मनोवादं रचयत ।

११ रेखाङ्कितपदानां विभक्तिकारकनिर्देशं कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशः पाठः

कर्पूरतिलक-जम्बूककथा

आसीद् ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म-यद्ययं केनाप्युपायेन म्रियते तदास्माकमेतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति । तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम्- मया बुद्धिप्रभावादस्य मरणं साधयितव्यम् । अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच-देव, दृष्टिप्रसादं कुरु । हस्ती अवदत् - कुतः समायातः ? सोऽवदत् - जम्बुकोऽहम् । सर्वैर्वनवासिभिः पशुभिर्मिलित्वा

१७.१ ब्रह्मारण्ये = तदाख्ये विपिने (ब्रह्मरण्यमा) **कर्पूरतिलको नाम** = तदाख्यः (कर्पूरतिलक नाम गरेको) **हस्ती** = करी (हात्ती) **आसीत्** = अवर्तत (थियो) **तम्** = हस्तिनम् (त्यस हात्तीलाई) **अवलोक्य** = विलोक्य (देखेर) **सर्वे** = निखिलाः (सबै) **शृगालाः** = जम्बुकाः (स्यालहरूले) **चिन्तयन्ति स्म** = विचारयन्ति स्म (विचार गरे) **यदि** = चेत् (यदि) **अयम्** = एषः (यो हात्ती) **केनाप्युपायेन** = केनापि उद्यमेन (कुनै उपायद्वारा) **म्रियते** = हतो भवति (मर्छ भने) **तदा** = तस्याम् अवस्थायाम् (त्यस अवस्थामा) **अस्माकम्** = शृगालानाम् (हामीहरूको निमित्त) **एतद्देहेन** = हस्तिशरीरेण (यस हात्तीको शरीरले) **मासचतुष्टयस्य** = चतुर्णाम् मासानाम् कृते (चार महिनाका लागि) **भोजनम्** = खाद्यवस्तु (खाने कुरा) **भविष्यति** = प्राप्स्यति (हुनेछ) **तत्र** = तेषु शृगालेषु मध्ये (ती स्यालहरूमध्ये) **एकेन** (एउटा) **वृद्धशृगालेन** = वृद्धजम्बुकेन (बूढो स्यालले) **प्रतिज्ञातम्**= निर्णीतम् (प्रतिज्ञा गऱ्यो) **मया** = वृद्धशृगालेन (मैले) **बुद्धिप्रभावात्** = प्रज्ञासामर्थ्यात् (बुद्धिको प्रभावले) **अस्य** = हस्तिनः (यस हात्तीको) **मरणम्** = मृत्युः (मरणलाई) **साधयितव्यम्** = सम्पादयितव्यम् (सम्पन्न तुल्याउने छु) अनन्तरम् = तत्पश्चात् (त्यसपछि) **सः वञ्चकः** = सः शृगालः (त्यो ठग स्यालले) **कर्पूरतिलकसमीपम्** = हस्तिनिकटम् (हात्तीको नजिकै) **गत्वा** = प्राप्य (गएर) **साष्टाङ्गपातम्** = साष्टाङ्गम् (आठै अङ्ग झुकाएर) **प्रणम्य** = नत्वा (ढोगेर) **उवाच** = अवोचत् (भन्यो) **देव** = आर्य (हजुर) **दृष्टिप्रसादम्**= अवलोकनप्रसादम् (हेर्ने कृपा) **कुरु** = विधेहि (गर्नुहोस्) **हस्ती** = करी (हात्तीले) **अवदत्** = अकथयत् (भन्यो) **त्वम्** = भवान् (तपाइँ) **कः** (को हुनुहुन्छ) **कुतः** = कस्मात् स्थानात् (कुन ठाउँबाट) **समायातः** = आगतः (आउनु भएको छ) **सः** =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवत्सकाशं प्रस्थापितः । तदत्राटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः । तद् यथा लग्नवेला न विचलति तथा कृत्वा सत्वरमागम्यतां देवेन इत्युक्त्वोत्थाय चलितः । ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन् महापङ्के निमग्नः । ततस्तेन हस्तिनोक्तम्- सखे शृगाल, किमधुना विधेयम् ? पङ्के निपतितोऽहं म्रिये । परावृत्य पश्य । शृगालेन

जम्बुकः (त्यस स्यालले) **अवदत्** = अकथयत् (भन्यो) **अहम्** (म) **जम्बुकः** = शृगालोऽस्मि (स्याल हुँ) **सर्वैः** = निखिलैः (सम्पूर्ण) **वनवासिभिः** = अरण्यवासिभिः (जङ्गलमा बस्ने) **पशुभिः** = जन्तुभिः (पशुहरूले) **मिलित्वा** = सम्भूय (मिलेर) **भवत्सकाशम्** = त्वत्समीपम् (हजुरको नजिकै) **प्रस्थापितः** = प्रेषितः (पठाए) **तत्** = तस्मात् (त्यसैले) **अत्र** = अस्मिन् (यो) **अटवीराज्ये** = विपिनाधिपत्ये (जङ्गलको राज्यमा) **अभिषेक्तुम्** = अभिषेकं कर्तुम् (अभिषेक गर्न) **भवान्** = त्वम् (हजुर) **सर्वस्वामिगुणोपेतः** = निखिलस्वामिगुणयुक्तः (सम्पूर्ण स्वामीमा हुनुपर्ने गुणले युक्त भएको हुनुहुन्छ भन्ने) **निरूपितः** = निर्णीतः (ठहर भएको छ) **तत्** = तस्मात् (त्यसैले) **यथा** = येन प्रकारेण (जसरी) **लग्नवेला** = राज्याभिषेकशुभमुहूर्तः (राज्याभिषेकको लगनको समय) **न विचलति** = न याति (जाँदैन) **तथा कृत्वा** = तेनैव प्रकारेण विधाय (त्यसै गरेर) **सत्वरम्** = शीघ्रम् (छिट्टै) **देवेन** = भवता (हजुरले) **आगम्यताम्** = आगमनं विधीयताम् (आउनु पर्‍यो) **इत्युक्त्वा** = इत्यभिधाय (यति भनी) **उत्थाय** = उद्गत्य (उठेर) **चलितः** = प्रस्थितः (हिंड्यो) **ततः** = तदनन्तरम् (त्यसपछि) **असौ** = एषः (यो) **राज्यलोभाकृष्टः** = राज्याभिषेकलोलुपः (राज्यको लोभले खिचिएको) **कर्पूरतिलकः** = तदाख्यो हस्ती (कर्पूरतिलक नामक हात्ती) **शृगालवर्त्मना** = जम्बुकमार्गेण (स्याल हिंडेको बाटोद्वारा) **धावन्** = शीघ्रं गच्छन् (दौडदै जाँदा) **महापङ्के** = विशालकर्दमे (ठूलो हिलामा) **निमग्नः** = पतितः (डुब्यो) **ततः** = तदनन्तरम् (त्यसपछि) **तेन हस्तिना**= कर्पूरतिलकेन (त्यस हात्तीले) **उक्तम्** = कथितम् (भन्यो) **सखे शृगाल** = मित्र जम्बुक! (हे मित्र स्याल) **अधुना** = अस्मिन् समये (यस वेला) **किम् विधेयम्** = किम् कर्तव्यम् (के गर्नुपर्छ) **पङ्के** = कर्दमे (हिलामा) **निपतितः** = निमग्नः (डुबेको) **अहम्** = हस्ती (म) **म्रिये** = म्रियमाणोऽस्मि (मर्दै छु) **परावृत्य** (पछाडि फर्किएर) **पश्य** = विलोकय (हेर) **शृगालेन** = जम्बुकेन (स्यालले) **विहस्य** = किञ्चित् स्मितं कृत्वा (केही हाँसेर) **उक्तम्** = कथितम् (भन्यो) **देव** = आर्य (हे हजुर) **मम** = शृगालस्य (मेरो) **पुच्छकालम्बनं कृत्वा** = पुच्छम् अवलम्ब्य (पुच्छर समातेर) **उत्तिष्ठ** = आगच्छ (उठ्नुहोस्) **यत्** (जुन) **मद्विधस्य** = मादृशस्य (मजस्ताको) **वचसि** = वचने (बोलीमा) **त्वया** =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहस्योक्तम्- देव, मम पुच्छकावलम्बनं कृत्वोत्तिष्ठ । यन्मद्विधस्य वचसि त्वया प्रत्ययः कृतस्तदनुभूयतामशरणं दुःखम् । ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः।

भवता (तपाइँले) **प्रत्ययः** = विश्वासः (विश्वास) **कृतः** = विहितः (गर्नु भयो) **तत्** (त्यसैले) **अशरणम्** = शरणरहितम् (शरण दिन नसकिने) **दुःखम्** = कष्टम् (दुःख) **अनुभूयताम्** = आस्वाद्यताम् (अनुभव गर्नुहोस्) **ततः** = तदनन्तरम् (त्यसपछि) **महापङ्के**= विशालकर्दमे (ठूलो हिलोमा) **निमग्नः** = निपतितः (डुबेको) **हस्ती** = करी (हात्ती) **शृगालैः** = जम्बुकैः (स्यालहरूद्वारा) **भक्षितः** = खादितः (खाइयो) ।

१७.२ विग्रहः - मासचतुष्टयस्य- मासानां चतुष्टयम् (ष.त.) तस्य । **वृद्धशृगालेन-** वृद्धश्चासौ शृगालः (कर्म.) तेन । **बुद्धिप्रभावात्** - बुद्धेः प्रभावः (ष.त.) तस्मात् । **कर्पूरतिलकसमीपम्** - कर्पूरतिलकस्य समीपम् (ष.त.) । **साष्टाङ्गपातम्** - अष्टानां अङ्गानां समाहारः अष्टाङ्गम् (समा.द्वन्द्व) अष्टाङ्गस्य पातः (ष.त.) तेन सहितम् (बहु.) । **वनवासिभिः** - वने वसन्तीति (उपप.) तैः । **भवत्सकाशम्** - भवतां सकाशम् (ष.त.)। **अटवीराज्ये** - अटव्याः राज्यम् (ष.त.) । **सर्वस्वामिगुणोपेतः** - सर्वे ते च स्वामिगुणाः (कर्म.) तैः उपेतः (तृ.त.) । **लग्नवेला** - लग्नस्य वेला (ष.त.) । **राज्यलोभाकृष्टः** - राज्यस्य लोभः (ष.त.) तेन आकृष्टः (तृ.त.) । **शृगालवर्त्मना** - शृगालस्य वर्त्म (ष.त.) तेन । **महापङ्के** - महान् चासौ पङ्कः (कर्म.) तस्मिन् ।

१७.३ प्रकृतिप्रत्ययविच्छेदः - हस्ती - हस्त + इनि । **अवलोक्य** - अव-लोक्+ क्त्वा > ल्यप् । **भोजनम्** - भुज् + ल्युट् > अन । **प्रतिज्ञातम्** - प्रति-ज्ञा + क्त। **साधयितव्यम्** - साध् + णिच् + तव्यत् । **गत्वा** - गम् + क्त्वा । **प्रणम्य** - प्र-नम् + क्त्वा > ल्यप् । **मिलित्वा** - मिल् + क्त्वा । **प्रस्थापितः** - प्र-स्था+णिच् + क्त । **अभिषेक्तुम्** - अभि - सिच् + तुमुन् । **उपेतः** - उप - इ + क्त । **निरूपितः** - नि-रूप्+ क्त । **उक्त्वा** - ब्रू (वच्) + क्त्वा । **उत्थाय** - उत् -स्था + क्त्वा > ल्यप् । **चलितः** - चल् + क्त । **आकृष्टः** - आ- कृष् + क्त । **धावन्** - धाव् + लट् > शतृ । **निमग्नः** - नि-मस्ज् + क्त। **विधेयम्** - वि-धा+यत् । **निपतितः** - नि-पत् + क्त । **परावृत्य** - परा - वृत् + क्त्वा > ल्यप् । **विहस्य** - वि-हस् + क्त्वा > ल्यप् । **उक्तम्** - ब्रू (वच्) + क्त। **कृत्वा** - कृ + क्त्वा । **शरणम्** - शृ+ ल्युट् > अन ।

१७.४ कोषः - बुद्धिः - बुद्धिर्मनीषा धीषणा धीः प्रज्ञा शेमुषी मतिः, इत्यमरः । **वञ्चकः** - धूर्तस्तु वञ्चकः, इत्यमरः । **हस्ती** - दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः। मतङ्गजो गजो नागः कुञ्जरो वारणः करी, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ **उपरितनगद्यभागमधीत्य प्रश्नानामुत्तराणि लिखत ।**

१. कर्पूरलितकः कुत्र वर्तते ?

२. हस्तिनं विलोक्य शृगालाः किमचिन्तयन् ?

३. वृद्धशृगालः किं प्रतिज्ञातवान् ?

४. कर्पूरलितकः पङ्के कथं निमग्नः ?

५. हस्ती शृगालं किमुक्तवान् ?

६. शृगालेन हस्तिवचनं निशम्य किमुक्तम् ?

२ **निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।**

३ **सन्धिं कुरुत–**

कर्पूरतिलकस्+नाम । केन+अपि । तदा+अस्माकम् । तत्र+एकेन । प्रणम्य+उवाच । कस्+त्वम् । उक्त्वा+उत्थाय । ततस्+असौ । निपतितस्+अहम्। विहस्य+उक्तम् । कृत्वा+उत्तिष्ठ । कृतम्+तत् । निमग्नस्+हस्ती।

४ **सविग्रहं समासनामानि लिखत ।**

मासचुष्टयस्य। स्वेच्छया । वृद्धशृगालेन । बुद्धिप्रभावात् । कर्पूरतिलकसमीपम्। साष्टाङ्गपातम् । वनवासिभिः । भवत्सकाशम् । अटवीराज्ये । सर्वस्वामिगुणोपेतः । लग्नवेला । राज्यलोभाकृष्टः । शृगालवर्त्मना । मद्विधस्य । महापङ्के ।

५ **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

हस्ती । अवलोक्य । भोजनम् । प्रतिज्ञातम् । मरणम् । साधयितव्यम् । गत्वा । प्रणम्य । मिलित्वा । प्रस्थापितः । अभिषेक्तुम् । उपेतः । निरूपितः । उक्त्वा। उत्थाय । चलितः । आकृष्टः । धावन् । निमग्नः । विधेयम् । निपतितः । परावृत्य । विहस्य । उक्तम् । कृत्वा । शरणम् ।

६ **वाच्यपरिवर्तनं कुरुत ।**

१. शृगालैः कर्पूरतिलको विलोकितः ।

२. हस्तिनं विलोक्य केनापि शृगालेन तद्वधोपायश्चिन्तितः ।

३. सर्वे वनवासिनस्तं शृगालं हस्तिसमीपे प्रेषितवन्तः ।

४. भवान् सत्वरमागच्छतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५. लोभाकृष्टो हस्ती शृगालवर्त्मना धावन् पङ्केऽपतत् ।

६. महापङ्के निमग्नः कर्पूरतिलकः शृगालैर्भक्षितः ।

७ वाक्यसंश्लेषणं कुरुत ।

१. ब्रह्मारण्ये हस्ती अस्ति । तस्य नाम कर्पूरतिलको वर्तते । स शृगालैर्विलोकितः । ततस्तेऽचिन्तयन् । तस्य देहेन मासचतुष्टयस्य भोजनं भविष्यति ।

२. शृगालेष्वेको वृद्धः शृगाल आसीत् । स च हस्तिवधोपायमचिन्तयत् । ततः स हस्तिसकाशं गतवान् । स च तं प्रणतवान् । स तमकथयत् ।

३. भवान् अटवीराज्येऽभिषेक्तुं योग्योऽस्ति । त्वयि सर्वे गुणाः सन्ति । अतो भवान् सत्वरमागच्छतु ।

४. ततो हस्ती लोभाकृष्टोऽवर्तत । शृगालोऽधावत् । मार्गे महापङ्क आसीत् । तेनैव मार्गेण हस्ती चागच्छत् । तत्र स निमग्नः । तं सर्वे शृगाला भक्षितवन्तः ।

८ वाक्यविश्लेषणं कुरुत ।

सर्वे वनौकसो राज्यलोभाकृष्टं शृगालवर्त्मना धावन्तं कर्पूरतिलकनामानं हस्तिनं महापङ्के निपतितं प्राप्य सहर्षं भक्षितवन्तः ।

९ निर्धारितपाठान्तर्गतानि विशेषणपदानि क्रियाविशेषणानि चान्विष्य लिखत।

१० कर्मवाच्यस्य प्रयोगं विधाय दशभिर्वाक्यैर्हिमालयं वर्णयत ।

११ कमपि विषयमवलम्ब्य स्वल्पं मनोवादं रचयत ।

१२ रेखाङ्कितपदानां कारकविभक्तिनिर्देशं कुरुत ।

१३. अधोनिर्दिष्टपदानि प्रयुज्य विभक्तीश्च विपरिणमय्य संकथनं पूरयत-

ब्रह्मारण्यम् । कर्पूरतिलकः । हस्ती । सः । अवलोक्य । सर्वे । शृगालः । चिन्तयति। यदि । अयम् । कोऽपि । उपायः । म्रियते । तदा । एतद् । देहः । मासचतुष्टयम् । भोजनम् । भविष्यति । तत्र । एकः शृगालः । प्रतिज्ञातः । अहम् । बुद्धिप्रभावः । मरणम् । साधयितव्यः । अनन्तरम् । तेन । वञ्चकः । हस्ती । समीपे। गत्वा प्रणम्य। उक्तः । देव । दृष्टिप्रसादः । कुरु । हस्तिना । उक्तः । कुतः । समायातः । सर्वः । वनवासी । मिलित्वा । भवत्सकाशम् । प्रेषितम् । वनम् । राज्यम् । अभिषेक्तुम् । अर्हः। ततः । राज्यलोभः । आकृष्टः । शृगालवर्त्म । धावन्। पङ्कः। मग्नः । शृगालाः । खादितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशः पाठः

पद्यगद्यलक्षणं तद्भेदाश्च

पद्यं चतुष्पदि तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ।।१।।

सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा ।
समं समचतुष्पादं भवत्यर्धसमं पुनः ।।२।।

आदिस्तृतीयवद् यस्य पादस्तूर्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम् ।।३।।

१८.१ **चतुष्पदि** = यत्र चत्वारः पादा भवन्ति (जहाँ चार पाउ हुन्छन् त्यसलाई) **पद्यम्** (पद्य भनिन्छ) **तच्च** = पद्यम् (त्यो पद्य) **वृत्तं जातिः**, **इति** = वृत्तभेदेन जातिभेदेन च (वृत्त र जातिका भेदले) **द्विधा**= द्विप्रकारकं भवति (दुई किसिमको हुन्छ) **अक्षर-संख्यातम्**= यत्र अक्षराणां गणना भवति (जहाँ अक्षरको गणना हुन्छ) **तत्** (त्यसलाई) **वृत्तम्** (वृत्त भनिन्छ) **मात्राकृता** = यत्र ह्रस्वदीर्घादिमात्राणां गणना भवति (जहाँ ह्रस्व, दीर्घ आदि मात्राको गणना हुन्छ) **सा** (त्यसलाई) **जातिः भवेत्** = जातिरिति कथ्यते (जाति भनिन्छ)। **तद्** = वृत्ताख्यपद्यम् (वृत्त नामक पद्य) **समम् अर्धसमम् विषमम् च** (सम, अर्धसम र विषमका भेदले) **त्रिधा** = त्रिप्रकारकं भवति (तीन किसिमको हुन्छ)।

समम् = तदाख्यं वृत्तभेदम् (सम नामक वृत्त) **समचतुष्पादम्** = यत्र चत्वारः पादाः समाना भवन्ति तादृशम् (चारै पाउमा बराबर अक्षर भएको) **भवति** = जायते (हुन्छ) **पुनः** = भूयः (फेरि) **यस्य** = पद्यस्य (जुन पद्यको) **आदिः** = प्रथम पादः (पहिलो पाउ) **तृतीयवद्** = तृतीयपादवत् (तेस्रो पाउजस्तो हुन्छ) **तूर्यः** = चतुर्थपादः (चौथो पाउ) **द्वितीयवत्** = द्वितीयपादवत् (दोस्रो पाउजस्तो हुन्छ) **तत्** (त्यसलाई) **अर्धसमम्** = तदाख्यं वृत्तम् (अर्धसम वृत्त भनिन्छ) **भिन्नचिह्नचतुष्पादम्** = यत्र चत्वार एव पादा भिन्ना भवन्ति (जहाँ चारै पाउ अलग-अलग हुन्छन्) **तत्** (त्यसलाई) **विषमम्**= विषमवृत्तम् (विषम नामक वृत्त) **परिकीर्तितम्** = कथितम् (भनिएको छ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
वर्णसंयोगपूर्वश्च तथा पादान्तगोऽपि वा ।
सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।।४।।
आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ।।५।।
यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।

एकमात्रः = एकया मात्रया युतः (एक मात्रा भएको वर्णलाई) **ह्रस्वो भवेत्** = ह्रस्वःस्यात् (ह्रस्व भनिन्छ) **द्विमात्रः** = द्वाभ्यां मात्राभ्यां युतः (दुई मात्राले युक्त भएको वर्णलाई) **दीर्घ उच्यते** = दीर्घ इति कथ्यते (दीर्घ भनिन्छ) **तथा** = तेनैव प्रकारेण (त्यसरी नै) **वर्णसंयोगपूर्वः** = संयुक्तवर्णात् पूर्ववर्ती वर्णः (संयुक्त वर्णदेखि अगाडि रहेको वर्ण) **दीर्घ इति उच्यते** (दीर्घ भनिन्छ) **पादान्तगोऽपि** = पादान्तस्थः (पाउको अन्त्यमा रहेको वर्ण) **वा** = विकल्पेन भवति (ह्रस्व र दीर्घ दुवै विकल्पले हुन सक्छ) । **सानुस्वारः** = अनुस्वारसहितः (अनुस्वारले सहित भएको वर्ण) **दीर्घः** = दीर्घमात्रायुतः (दीर्घ मात्राले युक्त भएको वर्ण) **विसर्गी** = विसर्गयुक्तो वर्णश्च (विसर्ग भएको वर्ण पनि) **गुरुर्भवेत्** (गुरु मानिन्छ) ।

आदिमध्यावसानेषु = प्रथममध्यमान्तिमवर्णेषु (पहिलो, माझको र अन्त्यको वर्णमा) **भजसा** = भगणजगणसगणाः (भगण, जगण र सगण) **क्रमेण** (क्रमैले) **गौरवम्**= गुरुभावम् (गुरु हुन) यान्ति = प्राप्नुवन्ति (पुग्दछन् अर्थात् **आदिगुरु** भगण हुन्छ, **मध्यगुरु** जगण हुन्छ र **अन्त्यगुरु** सगण हुन्छ) **यरताः** = यगणरगणतगणाः (यगण, रगण र तगण) **आदिमध्यावसानेषु** (आदि, मध्य र अन्त्यमा) **क्रमशः** (क्रमैले) **लाघवम्** = लघुभावम् (लघु हुन) **यान्ति** = प्राप्नुवन्ति (पुग्दछन् अर्थात् **आदिलघु** यगण हुन्छ, **मध्यलघु** रगण हुन्छ र **अन्त्यलघु** तगण हुन्छ) **मनौ तु** = मगणनगणौ तु (मगण र नगण त) **क्रमेण** (क्रमैले) **गुरुलाघवम्** = गुरुभावं लघुभावञ्च (गुरु र लघु बन्न) **यान्ति** = प्राप्नुवन्ति (पुग्दछन् अर्थात् **सर्वगुरु** मगण हुन्छ भने **सर्वलघु** नगण हुन्छ) ।

कविभिः = काव्यप्रणेतृभिः (काव्यका रचयिताहरूद्वारा) **जिह्वेष्टविश्रामस्थानम्**= जिह्वया विधीयमानं विरामस्थलम् (जिब्राले विश्राम गर्ने ठाउँलाई) **यतिः** = विश्राम इति उच्यते (यति भनिन्छ) **सा** = यति (त्यो यतिलाई) **निजेच्छया** = स्वेच्छया (आफू खुशी) **विच्छेदविरामाद्यैः** = तदाख्यैः (विच्छेद, विराम आदि) **पदैः** = शब्दैः (शब्दले) **वाच्या** = वक्तुं शक्या (व्यवहार गर्न सकिन्छ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥६॥
अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम् ।
चूर्णिकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥७॥

अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः ।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥८॥

अपादः = पादरहितः (पाउले रहित भएको) **पदसन्तानः** = पदसमूहः (पदको समूहलाई) **गद्यम्** = तदाख्यम् (गद्य) कथ्यते (भनिन्छ) **तत्तु** = गद्यन्तु (त्यो गद्य त) **चूर्णिकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः** = चूर्णिका उत्कलिकाप्रायं वृत्तगन्धि चेति भेदात् (चूर्णिका, उत्कलिकाप्राय र वृत्तगन्धीका भेदले) **त्रिधा** = त्रिप्रकारकम् (तीन किसिमको) **मतम्** = कथितम् (मानिएको छ) ।

अकठोराक्षरम् = मृदुलवर्णम् (कठोर अक्षर नभएको) **स्वल्पसमासम्** = अल्पसमासयुक्तपदम् (थोरै समास भएका पदहरूले युक्त भएको) **तत्** = गद्यम् (गद्यलाई) **चूर्णकं विदुः** = चूर्णकमिति कथयन्ति (चूर्णक भनिन्छ) **तद् गद्यम्** = चूर्णकम् (त्यो गद्य) **वैदर्भरीतिस्थम्** = वैदर्भरीतिगुणोपेतम् (वैदर्भरीतिमा छ भने) **हृद्यतरं भवेत्** = सुन्दरं भवेत् (राम्रो हुन्छ) **समासाढ्यम्** = समासयुक्तपदान्वितम् (समासले भरिएका पदहरू भएको) **दृढाक्षरम्** = कठोराक्षरम् (ट, ठ जस्ता कठोर अक्षरले युक्त गद्यलाई) **उत्कलिकाप्रायं भवेत्** = उत्कलिकाप्रायमिति कथ्यते (उत्कलिकाप्राय भनिन्छ) **पुनः** = भूयः (फेरि) **तत्** = गद्यम् (त्यो गद्य) **वृत्तैकदेशसम्बन्धात्** = वृत्तैकक्षेत्रसम्बन्धात् (छन्दको कुनै अंशसँग मिल्ने हुँदा अर्थात् कुनै पद्यको आभास पाइने हुँदा) **वृत्तगन्धि स्मृतम्** = वृत्तगन्धि, इति कथितम् (वृत्तगन्धी भनिएको छ) ।

१८.२ विग्रहः – **चतुष्पदि** – चत्वारः पादाः यत्र (बहु.) तत् । **समचतुष्पादम्** – समाः चत्वारः पादाः यत्र (बहु.) तत् । **भिन्नचिह्नचतुष्पादम्** – भिन्नचिह्नाः चत्वारः पादाः यत्र (बहु.) तत् । **एकमात्रो** – एका मात्रा यत्र सः (बहु.) । **द्विमात्रः** – द्वे मात्रे यत्र सः (बहु.) । **वर्णसंयोगपूर्वः** – वर्णस्य संयोगः (ष.त.) सः पूर्वे यस्य सः (बहु.) । **पादान्तगः** – पादानामन्तः (ष.त.) पादान्तं गच्छतीति (उपप.) । **सानुस्वारः** – अनुस्वारेण सहितः (बहु.)। **आदिमध्यावसानेषु** – आदि च मध्यञ्च अवसानञ्च (द्वन्द्व.) तेषु । **जिह्वेष्टविश्रामस्थानम्** – जिह्वाया इष्टम् (ष.त.) तच्च तद् विश्रामस्थानम् (कर्म.) । **विच्छेदविरामाद्यैः**– विच्छेदश्च विरामश्च विच्छेदविरामौ (द्वन्द्व) तौ आद्यौ एषां तैः (बहु.)। **निजेच्छया** – निजस्य इच्छा (ष.त.) तया । **अपादः** – न विद्यन्ते पादाः यत्र (बहु.) सः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
वृत्तैकदेशसंबन्धात् वृत्तगन्धि पुनः स्मृतम् ।।९।।

पदसन्तानो - पदानां सन्तानः (ष.त.) । **चूर्णिकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः** - चूर्णिका च उत्कलिकाप्रायञ्च वृत्तगन्धि च (द्वन्द्व.) ते च ते प्रभेदाः (कर्म.) तेभ्यः । **अकठोराक्षरम्** - न कठोराणि अक्षराणि यत्र तत् (बहु.) । **स्वल्पसमासम्** - स्वल्पः समासः यत्र तत् (बहु.) । **वैदर्भरीतिस्थम्** - वैदर्भरीतौ तिष्ठतीति (उप स.) । **समासाढ्यम्**- समासैः आढ्यम् (तृ.त.) । **दृढाक्षरम्** - दृढानि अक्षराणि यत्र तत् (बहु.) । **वृत्तैकदेशसंबन्धात्** - वृत्तस्य एकदेशः (ष.त.) तेन सम्बन्धः (तृ.त.) तस्मात् । **वृत्तगन्धि**- वृत्तस्य गन्धः यत्र तत् (बहु.) ।

१८.३ निष्कर्षः -

१. यत्र चत्वारः पादा भवन्ति तत्पद्यम् ।

२. पद्यं द्विविधम् – जातिः, वृत्तञ्च ।

३. वृत्तं त्रिविधम्– समपादम्, अर्धसमपादम्, विषमपादञ्च ।

४. जातौ मात्राणां वृत्ते चाक्षराणां गणना भवति ।

५. पद्ये विश्रामस्थानं यतिः । सा च विच्छेदविरामाद्यैः शब्दैरपि निगद्यते।

६. वृत्त लक्षणनिरूपणाय विद्वद्भिरष्टौ गणाः कल्पिताः-
भगणः (ऽ।।) जगणः (।ऽ।) सगणः (।।ऽ)
यगणः (।ऽऽ) रगणः (ऽ।ऽ) तगणः (ऽऽ।)
मगणः (ऽऽऽ) नगणः (।।।)

७. अपादः पदसन्तानो गद्यम् ।

८. तच्च त्रिविधम् – चूर्णकम्, उत्कलिकाप्रायम्, वृत्तगन्धि च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ निम्नश्नानामुत्तराणि लिखत ।

१. पद्यस्य किं लक्षणम् ? के च तद्भेदाः ?
२. जातिवृत्तयोर्लक्षणे के ?
३. वृत्तस्य कति भेदाः, कानि च तेषां लक्षणानि ?
४. के वर्णाः गुरवः, के च लघवः ?
५. कति गणाः, के च ते ? कानि च तेषां लक्षणानि ?
६. गद्यस्य किं लक्षणम् ? के च तद्भेदाः ? किञ्च तेषां स्वरूपम् ?
८. भजसाः कुत्र गौरवं यान्ति ?
९. यरताः कुत्र लाघवं प्राप्नुवन्ति ।
१०. यतेर्लक्षणं किम् ? के च तद्वाचका अन्ये शब्दाः ?
११. ह्रस्वस्य दीर्घस्य च किं स्वरुपम् ?

३ गणसङ्केतान् लिखत ।

भ ( ) य ( ) म ( )
ज ( ) र ( ) न ( )
स ( ) त ( )

४ परस्परं मेलयत

(क)	(ख)
भ	सर्वलघुः (।।।)
ज	सर्वगुरुः (ऽऽऽ)
स	आदिगुरुः (ऽ।।)
य	मध्यगुरुः (।ऽ।)
	अन्तगुरुः (।।ऽ)
त	आदिलघुः (।ऽऽ)
म	मध्यलघुः (ऽ।ऽ)
न	अन्त्यलघुः (ऽऽ।)

४ निम्नगणानां प्रत्येकं विंशतिशब्दान् लिखत ।

भगणः । जगणः । सगणः । यगणः । रमणः । तगणः । मगणः । नगणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊनविंशः पाठः

आर्यावृत्तम्

पथ्या विपुला चपला मुखचपला जघनचपला च ।
गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधार्या ।।
यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ।।१।।

×× ×× ×× ××

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ।।२।।

दानं भोगो नाशतिस्त्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।।३।।

१९.१.१ आर्या = आर्याख्यो वृत्तभेदः (आर्या नामक छन्द) **नवधा** = नवप्रकारा भवति (नौ किसिमको हुन्छ) **पथ्या, विपुला, चपला, मुखचपला, जघनचपला, गीतिः, उपगीतिः, उद्गीतिः र आर्यागीतिः । यस्याः** = आर्यायाः (जुन आर्या छन्दको) **प्रथमे** = आद्ये (पहिलो) **पादे**= चरणे (पाउमा) तथा (त्यस्तै) **तृतीयेऽपि** (तेस्रो पाउमा पनि) **द्वादशमात्राः** = द्व्यधिकदशमात्राः भवन्ति (बाह्र मात्रा हुन्छन्) **द्वितीये** = द्वितीयचरणे (दोस्रो चरणमा) **अष्टादशः** = अष्टाधिका दशमात्राः भवन्ति (अठार मात्रा हुन्छन् र) **चतुर्थके**= चतुर्थचरणे (चौथो पाउमा) **पञ्चदश** = पञ्चाधिका दशमात्राः भवन्ति (पन्ध्र मात्रा हुन्छन्) **सा** (त्यसलाई) **आर्या** = तन्नामकवृत्तम् (आर्या छन्द भनिन्छ) ।

१९.१.२ अज्ञः = अपठितो जनः (नपढेको मानिसलाई) **सुखम्** = अनायासम् (सजिलै) **आराध्यः** = सेव्यः (अनुकूल बनाउन सकिन्छ) **विशेषज्ञः** = सुपठितः (विद्वान्लाई) **सुखतरम्** = अनायासतरम् (अझ सजिलोसित) **आराध्यते** = सेव्यते (अनुकूल तुल्याउन सकिन्छ) **ज्ञानलवदुर्विदग्धम्** = ज्ञानलेशज्वलितम् (ज्ञानको छिटाले डढेको) **नरम्** = मनुष्यम् (मानिसलाई) **ब्रह्मापि** = विधातापि (ब्रह्माले पनि) **न रञ्जयति**= न तोषयति (खुशी तुल्याउन सक्दैनन्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित् क्वचिन्मण्डिता वसुधा ।।४।।

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ।।५।।

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।

१९.१.३ **दानम्** = परस्मै प्रदानम् (अर्कालाई दिनु) **भोगः** = उपभोगः (आफूले भोग गर्नु) **नाशः** = विनाशः (नाश हुनु) **वित्तस्य** = सम्पदः (सम्पत्तिका) **तिस्रः** = त्रिविधाः (तीन किसिमका) **गतयः** = अवस्थाः (गतिहरू) **भवन्ति** (हुन्छन्) **यः** = पुरुषः (जसले) **न ददाति** = परस्मै न प्रयच्छति (अरूलाई दिंदैन) **न भुङ्क्ते** = न भोगं करोति (आफू पनि भोग गर्दैन) **तस्य** = सम्पदः (त्यो सम्पत्तिको) **तृतीया गतिः** = नाशः (नाश) **भवति** = जायते (हुन्छ) ।

१९.१.४ **अप्रियवचनदरिद्रैः** = अप्रियवाक्यशून्यैः (अप्रिय वचन कहिल्यै नबोल्ने) **प्रियवचनाढ्यैः** = इष्टवाक्यपरिपूर्णैः (प्यारो वचनले परिपूर्ण) **स्वदारपरितुष्टैः** = निजपत्नीसन्तुष्टैः (आफ्नी पत्नीमा सन्तुष्ट हुने) **परपरिवादनिवृत्तैः** = लोकापवादशून्यैः (अर्काको भनाइले शून्य व्यक्तिहरूले) **क्वचित् क्वचित्** (कतैकतै) **वसुधा** = पृथिवी (पृथ्वी) **मण्डिता** = शोभिता (शोभायमान भएकी छिन्) ।

१९.१.५ **अचेतनोऽपि** = चैतन्यरहितोऽपि (अचेतन भएर पनि) **इनकान्तः** = चन्द्रकान्तः (चन्द्रकान्तमणि) **सवितुः** = सूर्यस्य (सूर्यका) **पादैः** = किरणैः (किरणद्वारा) **स्पृष्टः** = जातस्पर्शः (छोइदा) **प्रज्वलति** = अतिशयेन दहति (अत्यन्त बल्दछ) **तत्** = तथा (त्यस्तै) **तेजस्वी** = ओजस्वी (पराक्रमशाली) **पुरुषः** = जनः (मानिस) **परकृतनिकृतिम्** = अन्यैः कृतम् अपमानम् (अर्काले गरेको अपमानलाई) **कथम्** = केन प्रकारेण (कसरी) **सहते** = क्षमते (सहन्छ) ।

१९.१.६ **शिशुः** = बालोऽपि (बालक भएर पनि) **सिंहः** = केशरी (सिंह) **मदमलिनकपोलभित्तिषु** = मदकलुषितगण्डस्थलेषु (मदले मलिन गाला भएका) **गजेषु**= करिषु (हात्तीमाथि) **निपतति** = आक्रामति (जाइ लाग्छ) **इयम्** = एषा (यो) **सत्त्ववताम्**= बलवताम् (बलियाहरूको) **प्रकृतिः** = स्वभावः (स्वभाव हो) **वयः** = अवस्था (उमेर) **तेजसः** = पराक्रमस्य (पराक्रमको) **हेतुः** = कारणम् (कारण) **न भवति** = न जायते (हुँदैन) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ।।६।।

१९.२ विग्रहः - **ज्ञानलवदुर्विदग्धम्** - ज्ञानस्य लवः (ष.त.) तेन दुर्विदग्धम् (तृ.त.) । **अप्रियवचनदरिद्रैः** - न प्रियाणि अप्रियाणि (नञ्स.) अप्रियाणि च तानि वचनानि (कर्मधा.) तैः दरिद्राः (तृ.त.) तैः । **प्रियवचनाढ्यैः** - प्रियाणि च तानि वचनानि (कर्मधा.) तैः आढ्याः (तृ.त.) तैः । **स्वदारपरितुष्टैः** - स्वदारेषु परितुष्टाः (स.त.) तैः । **परपरिवादनिवृत्तैः** - परेषां परिवादाः (ष.त.) तेभ्यः निवृत्ताः (प.त.) तैः । **अचेतनः** - न विद्यते चेतना यस्य सः (बहु.) । **परकृतनिकृतिम्** - परैः कृता (तृ.त.) सा चासौ निकृतिः (कर्मधा.) तान् । **मदमलिनकपोलभित्तिषु** - मदेन मलिनाः (तृ.त.) ताश्च कपोलभित्तयः (कर्मधा.) तासु ।

१९.३ **निष्कर्षः** -

१. आर्या नाम जातिर्विद्यते, सा चाष्टविधा- पथ्या, विपुला, चपला, मुखचपला, जघनचपला, गीतिः, उपगीतिः, उद्गीतिः, आर्यागीतिश्चेति।

२. आर्यायां मात्राया गणना भवति ।

३. ह्रस्ववर्णः एकमात्रिको भवति । दीर्घश्च द्विमात्रिकः कथ्यते ।

४. सानुस्वारो विसर्गी संयुक्तवर्णपूर्वाक्षरश्च वर्णो द्विमात्रिको जायते ।

५. पादान्तस्थस्तु वर्णो विकल्पेनैकमात्रिको द्विमात्रिको वा भवितुं शक्नोति।

६. अनयैव रीत्या कृतायां गणनायां आर्यायाः प्रथमे तृतीये च पादे प्रत्येकं द्वादशमात्राः भवन्ति ।

७. द्वितीये पादे अष्टादशमात्राः, चतुर्थे च पादे पञ्चदशमात्राः समुपलभ्यन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ **उपरितनपद्यानि सस्वरं पठत ।**

२ **निम्नप्रश्नानामुत्तराणि लिखत ।**

१. एषु प्रतिपादं काः का मात्राः सन्ति प्रयुक्ताः ?

२. उक्तपद्यानि कस्य छन्दस उदाहरणानि ? कथञ्च तेषु लक्षणसङ्गतिः ?

३. आर्याछन्दसो लक्षणं विलिख्योदाहरणे सङ्गमयत ।

४. आर्याछन्दसः प्रथमे, द्वितीये, तृतीये, चर्तुर्थे च पादे कति मात्रा भवन्ति ?

३ **निम्नप्रश्नाः समाधेयाः ।**

१. ब्रह्मा कं रञ्जयितुं न शक्नोति ?

२. वित्तस्य कति गतयो भवन्ति ?

३. वसुधा क्वचिदेव कैर्मण्डिता भवति ?

४. तेजस्वी किं न सहते, कश्चात्र दृष्टान्तः ?

५. सत्त्ववतां प्रकृतिः का ? तेजसो हेतुश्च कः ?

६. कस्य तृतीया गतिर्भवति ?

४ **सविग्रहं समासनामानि लिखत ।**

ज्ञानलवदुर्विदग्धम् । अप्रियवचनदरिद्रैः । प्रियवचनाढ्यैः । स्वदारपरितुष्टैः। परपरिवादनिवृत्तैः । अचेतनः । परकृतनिकृतिम् । मदमलिनकपोलभित्तिषु । सत्त्ववताम्।

५ **निर्धारितपाठान्तर्गतपद्यानां सरलार्थं लिखत ।**

६ **उक्तपद्यानामन्वयं लिखत ।**

७ **निर्धारितपद्यानां व्याख्यानङ्कुरुत ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशः पाठः

अनुष्टब्वृत्तम् - १

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयात् शेषेषु नियमो नहि ।।१।।

×× ×× ×× ××

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ।।२।।

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।।
साधवो नहि सर्वत्र चन्दनं न वने वने ।।३।।

२०.१.१ **सर्वत्र** = चतुर्ष्वेव पादेषु (चारै पाउमा) **पञ्चमम्** = पञ्चमाक्षरम् (पाँचौं अक्षर) **लघु** = ह्रस्वं भवति (ह्रस्व हुन्छ) **द्विचतुर्थयोः** = द्वितीयचतुर्थपादयोः (दोस्रो र चौथो पाउमा) **सप्तमम्** = सप्तमाक्षरम् (सातौं अक्षर) लघु भवति (ह्रस्व हुन्छ) **षष्ठम्** = षष्ठाक्षरम् (छैटौं वर्ण) **गुरु** = दीर्घम् (दीर्घ) **विजानीयात्** = जानीयात् (हुन्छ भनेर जानोस्) **शेषेषु** = अन्याक्षरेषु (अरू अक्षरको हकमा) **नियमो नहि** = ह्रस्वदीर्घयोर्यस्य कस्यापि प्रयोगे नास्ति नियमः (ह्रस्व वा दीर्घ जुन प्रयोग गरे पनि हुन्छ कुनै नियम छैन)।

२०.१.२ **दुष्टा** = दुश्चरित्रा (खराब आचरण भएकी) **भार्या** = पत्नी (पत्नी) **शठम्** = दुर्जनम् (दुष्ट) **मित्रम्** = सुहृद् (मित्र) **उत्तरदायकः** = झटित्युत्तरदाता (तुरुन्तै जवाफ फर्काउने) **भृत्यः** = सेवकः (नोकर) **ससर्पे** = सर्पसहिते (सर्पले सहित भएको) **गृहे** = भवने (घरमा) **वासः** = निवासश्च (बस्नु पनि) **मृत्युरेव** = मरणमेव (मृत्यु नै हो अर्थात् यी सबै मृत्युका कारण हुन्) **न संशयः** = सन्देहो नास्ति (यसमा कुनै शंका छैन)।

२०.१.३ **शैले शैले** = प्रतिशैलम् (प्रत्येक पहाडमा) **माणिक्यम्** = हीरकादि (मणि, हीरा आदि रत्न) **न** = न लभ्यते (पाइँदैन) **गजे गजे** = प्रतिहस्ति (प्रत्येक हात्तीमा) **मौक्तिकम्**= मुक्ता (मोती) **न** = न लभ्यते (पाइँदैन) **सर्वत्र** = सर्वेषु स्थलेषु (सबै ठाउँमा) **साधवः**= सज्जनाः (सज्जन मानिसहरू) **नहि** = न लभ्यन्ते (पाइँदैनन्) **वने वने** = प्रतिविपिनम् (प्रत्येक जङ्गलमा) **चन्दनम्** = मलयजम् (चन्दन) **न** = न लभ्यते (पाइँदैन)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधमा धनमिच्छन्ति धनं मानञ्च मध्यमाः ।।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ।।४।।

रङ्कं करोति राजानं राजानं रङ्कमेव च ।।
धनिनं निर्धनञ्चैव निर्धनं धनिनं विधिः ।।५।।

क्षीयन्ते सर्वदानानि यज्ञहोमवलिक्रियाः ।
न क्षीयते पात्रदानमभयं सर्वदेहिनाम् ।।६।।

२०.१.४ अधमाः = अधमपुरुषाः (तल्लो खालका मानिसहरू) **धनम्** = द्रव्यम् (सम्पत्ति) **इच्छन्ति** = वाञ्छन्ति (चाहन्छन्) **मध्यमाः** = मध्यमपुरुषाः (मध्यम खालका मानिसहरू) **धनम्**= द्रव्यम् (सम्पत्ति र) **मानञ्च**= सम्मानञ्च (सम्मान पनि) **इच्छन्ति** = वाञ्छन्ति (चाहन्छन्) **उत्तमाः**= श्रेष्ठजनाः (ठूला मानिसहरू) **मानम्** = सम्मानम् (सम्मान) **इच्छन्ति**= वाञ्छन्ति (चाहन्छन्) **हि**= यतः (किनभने) **मानः**= सम्मान एव(सम्मान नै) **महताम्**= उत्तमजनानाम्(उत्तम खालका मानिसहरूका निमित्त) **धनम्**= द्रव्यम्(सम्पत्ति हो)।

२०.१.५ विधिः = दैवम् (अदृष्टले) **रङ्कम्** = कृपणम् (कंगाललाई) **राजानम्** = नृपम् (राजा) **करोति** = विदधाति (तुल्याइदिन्छ) **राजानञ्च** = नृपञ्च (राजालाई) **रङ्कम्**= कृपणम् (कंगाल) **करोति** = विदधाति (तुल्याइदिन्छ) **धनिनम्** = धनधान्यपूर्णं जनम् (धनीलाई) **निर्धनम्** = दरिद्रम् (दरिद्र) **करोति** = विदधाति (तुल्याइदिन्छ) **निर्धनम्** = दरिद्रम् (दरिद्रलाई) **धनिनम्** = धनधान्यपूर्णम् (धनी) **करोति** = विदधाति (तुल्याइदिन्छ)।

२०.१.६ सर्वदेहिनाम् = निखिलप्राणिनाम् (सबै प्राणीहरूका अर्थात् उनीहरूले गरेका) **सर्वदानानि** = सकलदानानि (सम्पूर्ण दानहरू) **यज्ञहोमबलिक्रियाः** = यागहवनबलिकर्माणि (यज्ञ, होम, वलिवैश्वदेव आदि कर्महरू) **क्षीयन्ते** = नश्यन्ति (नाश हुन्छन् अर्थात् निश्चित समयपछि यिनीहरूको नाश हुन्छ) **पात्रदानम्** = पात्रे दत्तम् (पात्रमा परेको) **अभयम्** = अभयदानम् (अभय दान) **न क्षीयते** = न कदापि नश्यति (कहिल्यै नाश हुँदैन) ।

२०.२ विग्रहः - उत्तरदायकः - उत्तरस्य दायकः (ष.त.)। **ससर्पे**- सर्पेण सहितः (बहु.) तस्मिन् । **सर्वदानानि** - सर्वाणि च तानि दानानि (कर्मधा.) । **यज्ञहोमबलिक्रियाः**- यज्ञश्च होमश्च बलिश्च क्रियाश्च (द्वन्द्व) ताः । **पात्रदानम्** - पात्रेषु दानम् (स.त.) तत् । **अभयम्** - न भयम् (नञ्) । **सर्वदेहिनाम्** - सर्वे च ते देहिनः (कर्मधा.) तेषाम् ।

२०.३ प्रकृतिप्रत्ययविच्छेदः - दुष्टः - दुष् + क्त । **सर्वत्र**- सर्व + त्रल् । **माणिक्यम्** - मणिक + ष्यञ् । **धनी** - धन + इनि । **दानम्** - दा + ल्युट् > अन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ निम्नाप्रश्नाः समाधेयाः ।

१. के मृत्युदायकाः ?
२. प्रतिवनं किं न प्राप्यते ?
३. के धनमिच्छन्ति ?
४. के मानधने वाञ्छन्ति ?
५. अधमाः किमिच्छन्ति ?
६. महतां धनं किमस्ति ?
७. कानि क्षीयन्ते ? किञ्चाक्षय्यम् ?
८. इमानि पद्यानि कस्य छन्दस उदाहरणानि ?

३ पाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

४ सविग्रहं समासनामानि लिखत ।

उत्तरदायकः । ससर्पे । सर्वदानानि । यज्ञहोमबलिक्रियाः । पात्रदानम् । अभयम् । सर्वदेहिनाम् ।

५ पाठान्तर्गतपद्यानां सान्वयं व्याख्यां कुरुत ।

६ कर्तृकर्मसंबन्धाधिकरणपदान्यन्विष्य लिखत ।

८ सन्धिं कुरुत ।

मृत्युस्+च । मानम्+च । मानस्+हि । साधवस्+नहि । निर्धनम्+च । च+एव। अधमास्+धनम् । उत्तमास्+मानम् । मृत्युस्+एव ।

९ अनुष्टुब्वृत्तस्य लक्षणं विलिख्योदाहरणे संगमयत ।

१० प्रकृतिप्रत्ययविच्छेदं कुरुत ।

दुष्टः । सर्वत्र । माणिक्यम् । धनी । दानम् ।

११ सविग्रहं समासनामानि लिखत ।

सर्वदानानि । यज्ञहोमबलिक्रियाः । पात्रदानम् । अभयम् । सर्वदेहिनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकविंशः पाठः

अनुष्टब्वृत्तम् - २

अजरामरवत्प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ।।१।।

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ।।२।।

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मस्ततः सुखम् ।।३।।

२१.१.१ **प्राज्ञः** = बुद्धिमान् (बुद्धिमान् पुरुषले) **अजरामरवत्** = जरामरणरहित इव (कहिले बूढो हुन्न र मर्दिन भनेझैं गरी) **विद्याम्**= शास्त्रकलादिज्ञानम् (विद्या) **अर्थम्**= धनञ्च (सम्पत्ति पनि) **चिन्तयेत्** = विचारयेत् (विद्याको अभ्यास गरोस् र धन कमाओस्) **मृत्युना** = यमेन (यमराजले) **केशेषु** = मूर्धजेषु (कपालमा) **गृहीत इव** = आकृष्ट इव (समात्यो कि भनेझैं गरी) **धर्मम्** = पुण्यम् (धर्म) **आचरेत्** = अनुतिष्ठेत् (गरोस्)

२१.१.२ **विद्वांसः** (विद्वान्हरूले) **सर्वदा** = सदा (सँधै) **अहार्यत्त्वात्** = हर्तुमशक्यत्त्वात् (चोर्न नसकिने भएकाले) **अनर्घत्वात्** = मूल्येनापि लब्धुमशक्यत्वात् (पैसा तिरेर पनि प्राप्त गर्न नसकिने भएकाले) **अक्षयत्वात्** = नाशरहितत्वाच्च (नाश नहुने भएकाले पनि) **सर्वद्रव्येषु** = सकलवस्तुषु (सबै पदार्थहरूमा) **विद्यैव** = शास्त्रज्ञानमेव (विद्या नै) नास्ति उत्तमं यस्मात् तत् - **अनुत्तमम्** = श्रेष्ठम् (सबैभन्दा ठूलो) **द्रव्यम्** = धनम् (धन हो भनेर) **आहुः** = कथयन्ति (भन्दछन्) ।

२१.१.३ **विद्या** = शास्त्रादिज्ञानम् (विद्याले) **विनयम्** = नम्रताम् (नम्रता) **ददाति**= यच्छति (दिन्छ) **विनयात्** = नम्रतायाः (नम्रताबाट) **पात्रताम्** = सज्जनताम् (सज्जनभाव) **याति** = प्राप्नोति (प्राप्त गर्छ) **पात्रत्वात्** = योग्यत्वात् (योग्यताले) **धनम्** = द्रव्यम् (सम्पत्ति) **आप्नोति** = लभते (प्राप्त गर्छ) **धनात्** = द्रव्यात् (सम्पत्तिबाट) **धर्मम्** = पुण्यम् (धर्म) **आप्नोति**= प्राप्नोति (प्राप्त गर्न सक्छ) **ततः** = धर्मात् (धर्मबाट) **सुखम्**= आनन्दम् (आनन्द) **आप्नोति** = प्राप्नोति (पाउँछ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ।।४।।

यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ।।५।।

अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः ।
सकृद् दुःखकरावाद्यावन्तिमस्तु पदे पदे ।।६।।

२१.१.४ अनेकान् संशयान् उच्छिनत्ति तच्छीलमिति **अनेकसंशयोच्छेदि** = नानाभिधसंदेहनिवर्तकम् (अनेक किसिमको सन्देहलाई हटाउने) **परोक्षार्थस्य** = भूतभविष्यार्थस्य (भूत र भविष्यत् कालको अर्थलाई) **दर्शकम्** = ज्ञापकम् (बुझाउन सक्ने) **शास्त्रम्** = वेद-व्याकरणादिकम् (शास्त्र) **सर्वस्य** = अखिललोकस्य (सबै प्राणीहरूको) **लोचनम्** = चक्षुः (आँखा हो) **तत्** = शास्त्रम् (त्यो शास्त्र) **यस्य** = पुरुषस्य (जुन पुरुषको अगाडि) **नास्ति** = न विद्यते (छैन) **सः** = पुरुषः (त्यो मान्छे) **अन्ध एव** = दृष्टिरहित एव (अन्धो नै हो) ।

२१.१.५ **यौवनम्** = युवावस्था (युवक हुनु) **धनसम्पत्तिः** = धनप्राचुर्यम् (धेरै धन हुनु) **प्रभुत्वम्** = स्वामित्वम् (मालिक बन्न पाउनु) **अविवेकिता** = विचारशून्यता (विवेक नहुनु) **एषां वस्तूनाम् मध्ये** (यी वस्तुहरूमध्ये) **एकैकम् अपि** = प्रत्येकमपि (एक एक पनि) **अनर्थाय** = विपत्तये (विपत्तिका निमित्त) **भवति** = जायते (हुन्छ) **यत्र**= यस्मिन् पुरुषे (जुन मानिसमा) **चतुष्टयम्** = उक्तचतुष्कं भवति (उक्त चारै कुराहरू रहन्छन्) **तत्र किमु** = तत्र का कथा (त्यहाँ के भन्ने) ।

२१.१.६ नजातः अजातः, अजातश्च, मृतश्च, मूर्खश्च तेषाम्, **अजातमृतमूर्खाणाम्**= अनुत्पन्न-दिवङ्गत-मूढानां मध्ये (नजन्मेका, मरेका र मूर्ख छोराहरूमध्ये) **आद्यौ** = अजातमृतौ (नजन्मिएका र मरेका छोराहरू) **वरम्** = प्रियौ (बरू उपयुक्त हुन्छन्) **च** = पुनः (फेरि) **अन्तिमः** = मूर्खः (मूर्ख छोरो त) **न वरम्** = नेष्टम् (उपयुक्त हुँदैन) **कुतः** (किनभने) **आद्यौ** = अजातमृतौ (नजन्मिएका र मरेका छोराहरू) **सकृद्** = एकवारमेव (एक पटक मात्रै) **दुःखकरौ** = दुःखदायकौ (दुःख दिने हुन्छन्) **अन्तिमस्तु**= मूर्खस्तु (मूर्ख छोरो त) **पदे पदे** = सर्वदैव (सँधैभरि) **दुःखकरः** = दुःखदायकः (दुःख दिने हुन्छ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् ।
तस्य पुत्रो भवेद् वश्यः समृद्धो धार्मिकः सुधीः ।।७।।

को धन्यो बहुभिः पुत्रैः कुशूलापूरणाढकैः ।
वरमेकः कुलालम्बी यत्र विश्रूयते पिता ।।८।।

ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ।।९।।

यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ।।१०।।

२१.१.७ **येन** = पुरुषेण (जसले) **क्वाऽपि** = कुत्रापि (कुनै) **पुण्यतीर्थे** = पवित्रक्षेत्रे (पुण्य तीर्थमा) **अतिदुष्करम्** = अतिशयकठिनम् (ज्यादै कठिन) **तपः** = धर्मानुष्ठानम् (तपस्या) **कृतम्**= अनुष्ठितम् (गऱ्यो) **तस्य** = पुरुषस्य (त्यस मानिसको) **पुत्रः**= तनयः (छोरो) **समृद्धः** = धनादियुक्तः (धनी) **धार्मिकः** = पुण्यवान् (धर्मात्मा) **सुधीः**= विद्वान् (विद्या पढेको) **वश्यः** = आज्ञाकारी च (आज्ञा पालक पनि) **भवेत्** = स्यात् (होला) ।

२१.१.८ **कुशूलापूराणाढकैः** = तुषपूर्णाढकधान्यपात्रैः (भूषले भरिएका भकारी जस्ता) **बहुभिः** = अनेकैः (धेरै) **पुत्रैः** = सुतैः (छोराहरूले) **को धन्यः** = कः कृतकृत्यः (को मक्ख पर्ला) **किन्तु** = परन्तु (तर) **कुलालम्बी** = वंशप्रकाशकः (आफ्नो कुललाई उज्यालो तुल्याउने) **एकः** = एकाकी पुत्रः (एउटै छोरो भए पनि) **वरम्** = श्रेष्ठो भवति (राम्रो हुन्छ) **यत्र** = यस्मिन् पुत्रे (जुन पुत्रले गर्दा) **पिता** = जनकः (बाबु) **विश्रूयते** = प्रसिद्धो भवति (प्रसिद्ध हुन पुग्छ) ।

२१.१.९ **ऋणकर्ता** = धनिकेभ्यो धनं ग्रहीता (ऋण गर्ने) **पिता** = जनकः (बाबु) **शत्रुः**= रिपुः (शत्रु हो) **व्यभिचारिणी** = दुश्चरित्रा (खराब चरित्र भएकी) **माता च** = जननी च (आमा पनि) **शत्रुः**(शत्रु हो) **रूपवती** = सौन्दर्यवती(राम्री) **भार्या** = पत्नी (पत्नी पनि) **शत्रुः** (शत्रु हो) **अपण्डितः** = मूर्खः (नपढेको) **पुत्रः** = सुतः (छोरो पनि) **शत्रुः** (शत्रु हो) ।

२१.१.१० **यथा**= येन प्रकारेण(जसरी) **एकेन**= असहायेन(एउटा) **चक्रेण**= पाङ्ग्रा इति लोके प्रसिद्धेन (पाङ्ग्राले) **रथस्य**= स्यन्दनस्य (रथको) **गतिः** = गमनम् (हिंडाइ) **न भवेत्** = न स्यात् (हुँदैन) **एवम्** = तद्वत् (त्यस्तै) **पुरुषकारेण विना** = उद्योगं विना (उद्योग नगरीकन) **दैवम्** = भाग्यम् (भाग्य) **न सिध्यति** = न फलति (फलदायी हुँदैन) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काकतालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः ।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ।।११।।

मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ।।१२।।

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये वको यथा ।।१३।।

२१.१.११ **काकतालीयवत्**= काकतालीयन्यायेन (काकतालीय न्यायले) **प्राप्तम्**= लब्धम् (प्राप्त भएको) **निधिम्** = रत्नादिपूर्णभाण्डम् (खानीलाई) **अग्रतः** = पुरः (अगाडि) **दृष्ट्वाऽपि** = विलोक्यापि (देखेर पनि) **दैवम्** = अदृष्टम् (दैवले) **स्वयं न आदत्ते** = आत्मना न गृह्णाति (आफैं दिंदैन) **तत्रापि** (त्यहाँ पनि) **पुरुषार्थम्** = पौरुषम् (पुरुषार्थ) **अपेक्षते** = अभिलषति (चाहिन्छ) ।

२१.१.१२ **सभायाम्** = विदुषां सदसि (विद्वान्हरूको सभामा) **वस्त्रवेष्टितः** = शोभनवस्त्रयुक्तः (राम्रो लुगा लगाएको) **मूर्खः** = मूढः (मूर्ख) **तावत्** = तत्कालपर्यन्तम् एव (त्यहाँसम्म मात्रै) **शोभते** = विलसति (राम्रो देखिन्छ) **यावत्** = यावत् कालपर्यन्तम् (जहाँसम्म) **किञ्चित्** = किमपि (केही कुरा) **न भाषते** = न वदति (बोल्दैन) ।

२१.१.१३ **येन** = पुरुषेण (जुन मानिसले) **बालः** = बालकः (बच्चालाई) **न पाठितः** = न अध्यापितः (पढाएन) **तस्य** (त्यसका) **पिता** = जनकः (बाबु) **वैरी** = रिपुः (वैरी हुन्) **माता**= जननी (आमा) **शत्रुः**= रिपुः (शत्रु हुन्) **सः**(त्यस्तो बालक) **सभामध्ये**= सभायाम् (सभामा) **हंसमध्ये** (हाँसको माझमा) **वको यथा** (बकुल्ला झैं) **न शोभते** (सुहाउँदैन)।

२१.२ **विग्रहः - अजरामरवत्** - अजरश्च अमरश्च (द्वन्द्व.) तौ इव । **अनर्थाय** - न अर्थः (नञ्स.) तस्मै । **पुण्यतीर्थे** - पुण्यं च तत् तीर्थम् (कर्मधा.) तस्मिन् । **कुशूलापूरणाढकैः** - कुशूलैः पूरणाणि आढकानि इव ये तैः (बहु.) । **कुलालम्बी** - कुलम् आलम्बते (उपप.) । **काकतालीयवत्** - काकतालम् इव काकतालीयवत् (उप. त.)। **वस्त्रवेष्टितः** - वस्त्रेण वेष्टितः (तृ.त.) । **सभामध्ये** - सभायाः मध्ये (ष.त.) । **हंसमध्ये**- हंसानां मध्ये (ष.त.) ।

२१.३ **प्रकृतिप्रत्ययविच्छेदः - पात्रत्वम्** - पात्र + त्व । **चतुष्टयम्** - चतुस् + तय । **प्रभुत्वम्** - प्रभु + त्व । **अविवेकिता** - अविवेकिन् + तल् । **कृतम्** - कृ + क्त । **गतिः** - गम् + क्तिन् । **दृष्ट्वा** - दृश् + त्त्वा । **पठितः** - पठ् + क्त । **गृहीतः** - ग्रह + क्त। **धार्मिकः** - धर्म + ठक् । **पण्डितः** - पण्डा + इत । **प्राप्तः** - प्र - आप् +क्त ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ निम्नप्रश्नामुत्तराणि लिखत ।

१. विद्यया कथं सुखं लभ्यते ?

२. अनर्थकारिणः के सन्ति ?

३. कस्य पुत्रः सुधीर्वश्यो धार्मिकश्च भवति ?

४. केन पिता विश्रूयते ?

५. दैवपुरुषार्थयोः केन कार्यं सिध्यति ?

६. वस्त्रवेष्टितो मूर्खः कीयत्कालं शोभते ?

७. कीदृशी माता शत्रुः, किदृक् पिता च वैरी ?

८. मूर्खः सभायां क इव न शोभते ?

३ निर्धारितपाठान्तर्गतपद्यानामन्वयं विलिख्य पर्यायशब्दान् लिखत ।

४ सविग्रहं समासनामानि लिखत ।

अजरामरवत् । अनर्थाय । पुण्यतीर्थे । अतिदुष्करम् । कुशूलापूरणाढकैः । कुलालम्बी । काकतालीयवत् । वस्त्रवेष्टितः । सभामध्ये । हंसमध्ये ।

५ सन्धिं कुरुत ।

गृहीतस्+इव । एक+एकम् । अपि+अनर्थाय । क्व+अपि । अपि+अति । हि+एकेन । गतिस्+भवेत् । शत्रुस्+अपण्डितः । दृष्ट्वा+अपि । मूर्खस्+अपि ।

६ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

पात्रत्वम् । चतुष्टयम् । प्रभुत्वम् । अविवेकिता । कृतम् । गतिः । दृष्ट्वा । पठितः । गृहीतः । धार्मिकः । पण्डितः । प्राप्तः ।

७ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

८ उक्तपद्यानि कस्य छन्दस उदाहरणानि ? सलक्षणं प्रकाशयत ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाविंशः पाठः

अनुष्टब्वृत्तम् - ३

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।१।।

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ।।२।।

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ।।३।।

२२.१.१ **धीमताम्** = विदुषाम् (विद्वान्हरूको) **कालः** = समयः (काल) **काव्यशास्त्रविनोदेन** = काव्यशास्त्राध्यनेन (काव्य र शास्त्रको अध्ययनद्वारा) **गच्छति** = याति (बित्छ) **च** = पुनः (फेरि) **मूर्खाणाम्** = अनधीतशास्त्राणाम् (नपढेका मूर्खहरूको) **कालः** = समयः (समय) **व्यसनेन** = सुरापानद्यूतक्रीडादिना (रक्सी र जुवा खेलेर) **निद्रया** = अधिकशयनेन (ज्यादा सुतेर) **वा** (अथवा) **कलहेन** = परस्परविवादेन (झगडाले) **गच्छति** = याति (जान्छ) ।

२२.१.२ **इज्या** = यज्ञः (यज्ञ) **अध्ययनम्** = शास्त्राध्ययनम् (शास्त्रको अध्ययन गर्नु) **दानम्** = सत्पात्रे त्यागः (दान गर्नु) **तपः** = व्रताद्यनुष्ठानम् (तपस्या गर्नु) **सत्यम्** = तथ्यम् (साँचो बोल्नु) **धृतिः** = धैर्यम् (धैर्य लिनु) **क्षमा** = सहनशीलता (सहनशील हुनु) **अलोभः** = लोभराहित्यम् (लोभ नगर्नु) **अयम्** = एषः (यो) **धर्मस्य** = पुण्यस्य (धर्मको) **अष्टविधः** = अष्टप्रकारः (आठ किसिमको) **मार्गः** = पन्थाः (बाटो हो भनेर) **स्मृतः** = प्रतिपादितः (प्रतिपादन गरिएको छ) ।

२२.१.३ **हे कौन्तेय** = हे युधिष्ठिर (हे युधिष्ठिर) **दरिद्रान्** = धनशून्यान् (धन नभएका मानिसलाई) **भर** = पालय (पालन पोषण गर) **ईश्वरे** = धनवति (धनीमा) **धनम्** = द्रविणम् (सम्पत्ति) **मा प्रयच्छ** = न देहि (न देऊ) **व्याधितस्य** = रोगिणः (रोगीका निम्ति) **औषधम्** = भेषजम् (औषधि) **पथ्यम्** = हितकरम् भवति (हितकारक हुन्छ) **नीरुजस्य** = व्याधिरहितस्य (निरोगीका निमित्त) **औषधैः** = भेषजैः (औषधिले) **किम्**= को लाभः (के फाइदा हुन्छ र) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदीनां शस्त्रपाणिनां नखिनां शृङ्गिणान्तथा ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ।।४।।

ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ।।५।।

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोधमालस्यं दीर्घसूत्रता ।।६।।

आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ।।७।।

२२.१.४ **नदीनाम्** = निम्नगानाम् (नदीहरूको) **शस्त्रपाणिनाम्** = शस्त्रधारिणाम् (हातमा हतियार लिनेहरूको) **नखिनाम्** = नखधारिणाम् (नङ्ग्रा हुनेहरूको) **शृङ्गिणाम्**= विषाणधारिणाम् (सिङ हुनेहरूको र) **स्त्रीषु** = वनिताषु (स्त्री जातिमा) **राजकुलेषु** = राजपुरुषेषु (राजकुलमा) **विश्वासः** = प्रत्ययः (विश्वास) **न कर्तव्यः** = न कार्यः (गर्नु हुँदैन) ।

२२.१.५ **ईर्ष्यी** = परोत्कर्षासहिष्णु (अर्काको उन्नतिलाई सहन नसक्ने) **घृणी** = घृणाशीलः (हरेक चीजमा घृणा गर्ने) **असन्तुष्टः** = सर्वदा सन्तोषरहितः (सँधै असन्तोष लिने) **क्रोधनः**= क्रोधशीलः (रिसाहा) **नित्यशङ्कितः** = नित्यं शङ्कायुक्तः (सँधै शङ्का गर्ने) **परभाग्योपजीवी**= अन्यभाग्याधीनजीविकः (अर्काको भाग्यमा बाँच्ने) **एते** = इमे (यी) **षट्** (छवटा) **दुःखभागिनः**= दुःखं भजन्ते (दुःखीहरू हुन्) ।

२२.१.६ **इह** = अस्मिन् संसारे (यस संसारमा) **भूतिमिच्छता** = ऐश्वर्यमभिलषता (सम्पत्ति कमाउन चाहने) **पुरुषेण** = जनेन (मानिसले) **निद्रा** = स्वापः (निद्रा) **तन्द्रा** = अर्धनिद्रा (तन्द्रा) **भयम्** = भीतिः (डर) **क्रोधः** = कोपः (रिस) **आलस्यम्** = परिश्रमविरागः (अल्छिपना) **दीर्घसूत्रता** = चिरक्रियता (जुम्सोपन) **षड् दोषाः** = षट् अवगुणाः (छवटा अवगुणहरूलाई) **हातव्याः** = त्याज्याः (छोड्नु पर्दछ) ।

२२.१.७ **आपदर्थे** = विपत्तिनाशाय (विपत्तिलाई हटाउन) **धनम्** = द्रविणम् (सम्पत्ति) **रक्षेत्** = गोपायेत् (रक्षा गरोस्) **धनैरपि** = वित्तैरपि (धन खर्च गरेर भए पनि) **दारान्** = स्त्रियः (स्त्री जातिलाई) **रक्षेत्** = पालयेत् (रक्षा गरोस्) **दारैरपि धनैरपि** = सर्वस्वव्ययेनापि (पत्नी, धन आदि सर्वस्व खर्च गरेर भए पनि) **सततम्** = निरन्तरम् (सँधै) **आत्मानम्** = स्वम् (आफूलाई) **रक्षेत्** = पालयेत् (रक्षा गरोस्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ।।८।।

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्युचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ।।९।।

२२.१.८ **साधवः** = सज्जनाः (सज्जन मानिसले) **निर्गुणेष्वपि** = गुणहीनेष्वपि (गुण नभएका भएतापनि) **सत्त्वेषु** = प्राणिषु (प्रणीहरूमा) **दयाम्** = कृपाम् (कृपा) **कुर्वन्ति**= विदधति (गर्दछन्) **हि** = यतः (किनभने) **चन्द्रः** = इन्दुः (चन्द्रमाले) **चाण्डालवेश्मनः**:= चाण्डालस्य गृहात् (चाण्डालको घरबाट) **ज्योत्स्नाम्** = कौमुदीम् (किरणलाई) **न संहरते**= न संकोचयति (संकुचित गर्दैनन्) ।

२२.१.९ **कश्चित्** = जनः (कुनै पनि मानिस) **कस्यचित्** = पुरुषविशेषस्य (कुनै पुरुषको) **मित्रम्** = सुहृत् (मित्र) **न** = न जायते (हुँदैन) **कश्चित्** = पुरुषः (कुनै मानिस) **कस्यचित्** = कस्यचन जनस्य (कुनै मानिसको) **रिपुः** = शत्रुः (शत्रु) **न** = न जायते (हुँदैन) **मित्राणि** = सुहृदः (मित्रहरू) **तथा** (त्यस्तै) **रिपवः** = शत्रवः (शत्रुहरू) **व्यवहारेण** = कार्यकलापेन (व्यवहारद्वारा) **जायन्ते** = भवन्ति (हुन्छन्) ।

२२.२ **विग्रहः - काव्यशास्त्रविनोदेन** - काव्यञ्च शास्त्रञ्च काव्यशास्त्रे (द्वन्द्व.) तयो विनोदः (ष.त.) तेन । **इज्याध्ययनदानानि** - इज्या च अध्ययनञ्च दानञ्च (द्वन्द्व.) तानि । **अष्टविधः** - अष्टौ विधा यत्र (बहु.) सः । **शस्त्रपाणिनाम्** - शस्त्रं पाणौ एषान्ते (बहु.) तेषाम् । **निर्गुणेषु** - निर्गताः गुणाः येभ्यः (बहु.) तेषु । **चाण्डलवेश्मनः** - चाण्डालस्य वेशम (ष.त.) तस्य ।

२२.३ **प्रकृतिप्रत्ययविच्छेदः - धीमान्** - धी + मतुप् > वतुप् । **दानम्** - दा + ल्युट् > अन । **अध्ययनम्** - अधि + इ + ल्युट् > अन । **कौन्तेयः** - कुन्ति + ढक् > एय्। **काव्यम्** - कवि + यत् । **शास्त्रम्** - शास् + ष्ट्रन् । **नखिनाम्** - नख + इनि, **शृङ्गिणाम्** - शृङ्ग + इनि । **भूतिम्** - भू + क्तिन् ।

२२.४ **कोषः - मूर्खः** - अज्ञो मूढयथाजातमूर्खवैधेयवालिशाः, इत्यमरः । **औषधम्**- भेषजौषधभैषज्यान्यगदो जायुरित्यपि, इत्यमरः । **नदी**- अथ नदी सरित् । तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी । स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा, इत्यमरः । **दाराः** - पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी । भार्या जायाऽथ पुंभूम्नि दाराः, इत्यमरः । **दया**- कृपा दयानुकम्पा स्यात्, इत्यमरः । **ज्योत्स्ना**- चन्द्रिका कौमुदी ज्योत्स्ना, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ अधोलिखितपंश्नामुत्तराणि लिखत ।

१. धीमतां मूर्खाणाञ्च कालः कथं गच्छति ?

२. धर्मस्याष्टौ मार्गाः के सन्ति ?

३. कस्मै धनं न देयम् ?

४. औषधं कस्य पथ्यं भवति ?

६. किमर्थं धनं रक्षेत् ?

७. निर्गुणेषु प्राणिषु के दयां कुर्वन्ति ?

८. मित्राणि रिपवश्च कथं जायन्ते ?

९. के दुःखभागिनः ?

१०. भूतिमिच्छता जनेन के हातव्याः ?

३ पाठान्तर्गतपद्यानां सान्वयं पर्यायशब्दान् लिखत ।

४ निम्नलिखतपदानां विग्रहं प्रदर्शयत ।

काव्यशास्त्रविनोदेन । इज्याध्ययनदानानि । अष्टविधः । शस्त्रपाणिनाम् । निर्गुणेषु । चाण्डलवेश्मनः ।

६ सन्धिं विधाय सूत्राणि च लिखत ।

कालस्+गच्छति । अलोभस्+इति । मार्गस्+अयम् । धर्मस्य+अष्टविधः । प्रयच्छ+ईश्वरे । निर्गुणेषु+अपि । दारैस्+अपि । रिपवः+तथा । विश्वासस्+नैव । व्याधितस्य+औषधम् ।

७ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

धीमान् । दानम् । व्याधितम् । अध्ययनम् । कौन्तेयः ।

८ उक्तपद्यानि कस्मिन् छन्दसि लिखितानि सन्ति ? किञ्च तस्य लक्षणम्? सोदाहरणं प्रकाशयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोविंशः पाठः

अनुष्टब्वृत्तम् - ४

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न च नौर्गच्छति स्थले ।।१।।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे ह्येरण्डोऽपि द्रुमायते ।।२।।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।३।।

२३.१.१ **यत्** = कार्यम् (जुन कार्य) **अशक्यम्** = सर्वथा सम्पादनायोग्यम् (गर्न सकिदैन) **तत्** = कार्यम् (त्यो कार्य) **शक्यम्** = साध्यम् (गर्न सकिने) **न** = नास्त्येव (हुँदैन नै) **यत्** = यत्कार्यम् (जुन कार्य) **शक्यम्** = साध्यम् (गर्न सकिने हुन्छ) **तत्** = कार्यम् (त्यो कार्य) **शक्यमेव** = सम्पादनयोग्यमेव (सकिने हुन्छ नै) **उदके** = जले (पानीमा) **शकटम्** = गन्त्री (गाडी) **न याति** = न गच्छति (हिड्दैन) **स्थले** = भूमौ (भुईंमा) **नौका** = नौः (डुङ्गा) **न गच्छति** = न याति (हिंड्दैन) ।

२३.१.२ **यत्र** = यस्मिन् स्थाने (जुन ठाउँमा) **विद्वज्जनः** = विद्वान् (विद्वान्) **नास्ति** = न तिष्ठति (रहँदैन) **तत्र** = तस्मिन् देशे (त्यस ठाउँमा) **अल्पधीः** = स्वल्पबुद्धिः (थोरै बुद्धि भएको अर्थात् कम विद्या भएको मानिस पनि) **श्लाघ्यः** = प्रशंसनीयः (प्रशंसाको पात्र हुन्छ) **निरस्तपादपे** = वृक्षरहिते (रुख नभएको) **देशे** = स्थाने (ठाउँमा) **एरण्डोऽपि** = उरुबूकोऽपि (अडिर पनि) **द्रुमायते** = वृक्षायते (रूख बन्न पुग्छ) ।

२३.१.३ **अयम्** = एषः (यो) **निजः** = स्वकीयः (आफ्नो हो) **वा** (अथवा) **परः** = अन्यः (अर्काको हो) **इति** (यस्तो) **लघुचेतसाम्** = तुच्छहृदयानाम् (तुच्छ हृदय भएका अर्थात् सानो चित्त भएका मानिसहरूको) **गणना** = धारणा (धारणा हो) **उदारचरितानान्तु** = महाशयानान्तु (उदार चरित्र भएकाको त) **वसुधा** = पृथिवी एव (सम्पूर्ण पृथ्वी नै) **कुटुम्बकम्** = बन्धुः (दाजुभाइ हो) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारिकेलसमाकारा दृश्यन्ते हि सुहृज्जनाः ।
अन्ये बदरीकाकारा बहिरेव मनोहराः ।।४।।

दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ।।५।।

मनस्यन्यद् वचस्यन्यत् कर्मण्यद् दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।।६।।

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ।।७।।

२३.१.४ **सुहृज्जनाः** = सज्जनाः (असल मानिसहरू) **नारिकेलसमाकाराः** = नारिकेलफलतुल्याः (नरिवलको फलजस्ता) **दृश्यन्ते** = विलोक्यन्ते (देखिन्छन्) **अन्ये**= दुर्जनास्तु (दुष्टहरू त) **बदरीकाकाराः** = बदरीकफलतुल्याः (बयरका फल जस्ता) **बहिरेव** (बाहिर मात्रै) **मनोहराः** = रमणीयाः (राम्रा) **दृश्यन्ते** (देखिन्छन्) ।

२३.१.५ **विद्यया** = शास्त्रज्ञानेन (विद्याले) **अलङ्कृतः** = भूषितः सन् अपि (अलङ्कृत भएतापनि) **दुर्जनः** = दुष्टो जनः (दुर्जनलाई) **परिहर्तव्यः** = त्याज्यः (त्याग्नुपर्छ) **मणिना**= रत्नेन (रत्नले) **भूषितः** = अलङ्कृतः (सजिएको) **असौ** = **सर्पः** (यो सर्प) **किं न भयङ्करः** = किं न भीतिदः (के डर लाग्दो हुँदैन र ?) ।

२३.१.६ **दुरात्मनाम्** = दुष्टानाम् (दुष्टहरूको) **मनसि** = चित्ते (चित्तमा) **अन्यत्**= अन्यथा भवति (अर्कै हुन्छ) **वचसि** = वाण्याम् (बोलीमा) **अन्यत्** = अन्यथा भवति (अर्कै हुन्छ) **कार्यम्** = कर्तव्यम् (काम गराइ) **अन्यत्** = अन्यथा भवति (अर्कै हुन्छ) **महात्मनाम्**= महापुरुषाणम् (ठूला मानिसहरूको) **मनसि** = हृदये (चित्तमा) **एकं भवति** (एउटै हुन्छ) **वचसि** = वाचि (बोलीमा पनि) **एकं भवति** (एउटै हुन्छ) **कर्मणि** = कार्ये (काममा पनि) **एकं भवति** (एउटै हुन्छ अर्थात् फरक हुँदैन) ।

२३.१.७ **सर्वेषाम्** = समेषाम् (सबै) **नृणाम्** = मनुष्याणाम् (मानिसहरूका लागि) **परोपदेशे**= अन्योपदेशे (अरूलाई शिक्षा दिने काममा) **पाण्डित्यम्** = चातुर्यम् (विद्वत्ता) **सुकरम्** = सुलभम् अस्ति (सुलभ हुन्छ) **धर्मे** = धर्मकार्ये (असल कार्यमा) **स्वीयम्** = स्वकीयम् (आफ्नो) **अनुष्ठानम्** = आचरणम् (आचरण भने) **कस्यचित्** = विरलस्यैव (कुनै) **महात्मनः** = महापुरुषस्य भवति (महापुरुषको मात्र हुन्छ । अर्कालाई उपदेश दिन सबै सिपालु हुन्छन्, आफू असल आचरण गर्ने मानिस त विरलै पाइन्छन्)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ।।८।।

तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ।।९।।

२३.१.८ **लोके** = संसारे (संसरमा) **यस्य** = पुंसः (जुन मानिसका) **अर्थाः** = धनानि (सम्पत्तिहरू हुन्छन्) **तस्य** = पुरुषस्य (त्यसै मानिसका) **मित्राणि** = सुहृदः (मित्रहरू हुन्छन्) **यस्य** = पुरुषस्य (जुन मानिसका) **अर्थाः** = सम्पदः (सम्पत्तिहरू हुन्छन्) **तस्य**= पुरुषस्य (त्यसै मानिसका) **बान्धवाः** = सम्बन्धिनः (दाजुभाइहरू हुन्छन्) **सः** = पुरुषः (त्यही मानिस) **लोके** = संसारे (संसारमा) **पुमान्** = पुरुषः (मर्द गनिन्छ) **हि** = निश्चयेन (निश्चय नै) **यस्य** = पुरुषस्य (जसका) **अर्थाः** = सम्पदः (सम्पत्तिहरू हुन्छन्) **सः** = पुरुषः एव (त्यो मानिस नै) **पण्डितः** = विद्वान् भवति (विद्वान् हुन्छ) ।

२३.१.९ **येन** = पुरुषेण (जुन मानिसले) **आशाः** = मनोरथान् (इच्छालाई) **पृष्टतः कृत्वा**= पश्चाद् विधाय (पछाडि राखेर) **नैराश्यम्** = **तृष्णात्यागः** (तृष्णालाई त्याग्ने काम) **अवलम्बितम्** = आश्रितम् (लियो) **तेन** = पुरुषेण (त्यही मानिसले) **अधीतम्** = अध्ययनम् कृतम् (पढ्यो) **तेन** = पुरुषेण (त्यसै मानिसले) **श्रुतम्** = श्रवणं कृतम् (सम्पूर्ण कुरा थाहा पायो) **तेन** = पुरुषेण (त्यसै पुरुषले) **सर्वम्** = समस्तम् (सम्पूर्ण कुरा) **अनुष्ठितम्** = सम्पादितम् (सम्पन्न गऱ्यो) ।

२३.१.१० **जनः** = नरः (मानिसले) **वृत्यर्थम्** = जीविकार्थम् (जीविका प्राप्तिका निमित्त) **न अतिचेष्टेत** = नातियतेत (ज्यादै हुरुक्क हुने गरी संलग्न हुनुहुँदैन) **हि** = यतः (किनभने) **सा** = वृत्ति (त्यो वृत्ति, जीविकाको बाटो) **धात्रा** = ब्रह्मणा एव (ब्रह्माले नै) **निर्मिता** = कल्पिता (बनाइ दिएका छन्) **जन्तौ** = प्राणिनि (प्राणी) **गर्भात्** = उल्बात् (गर्भबाट) **उत्पतिते** = बहिरागते सति (बाहिर निस्कने बित्तिकै) **मातुः** = जनन्याः (आमाका) **स्तनौ**= कुचौ (स्तनहरू) **प्रस्त्रवतः** = क्षरतः (दूध चुहाउन थाल्छन्) ।

२३.२ **विग्रहः - लघुचेतसाम्** - लघु चेतः येषां तेषाम् (बहु.) । **उदारचरितानाम्**- उदारं चरितम् येषां तेषाम् (बहु.) । **महात्माम्** - महान् आत्मा येषां तेषाम् (बहु.) । **परोपदेशे** - परेषाम् उपदेशः (ष.त.) तस्मिन् । **दुरात्मनाम्** - दुष्टः आत्मा येषां तेषाम् (बहु.) । **नारिकेलसमाकाराः** - नारिकेलैः समः आकारः येषान्ते (बहु.)। **बदरीकाकाराः**- बदरीकाणाम् आकारः इव आकारः येषान्ते (बहु.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता: ।
गर्भादुत्पतिते जन्तौ मातुः प्रसवतः स्तनौ ।।१०।।

२३.३ **प्रकृतिप्रत्ययविच्छेदः** - **शक्यम्** - शक् + यत् । **परिहर्तव्यः** - परि-हृ+ तव्यत् । **अलङ्कृतः** - अलम् - कृ + क्त । **अनुष्ठानम्**- अनु-स्था+ल्युट् > अन । **अधीतम्** - अधि - इ + क्त । **अनुष्ठितम्** - अनु-स्था + क्त । **श्रुतम्** - श्रु+क्त । **कृत्वा**-कृ+ क्त्वा । **निर्मितः** - निर् - मा+क्त । **अवलम्बितम्** - अव - लवि + क्त । **उत्पतितम्**-उत्- पत् + क्त । **पण्डितः** - पण्डा + इतच् । **सुकरम्** - सु - कृ + ट ।

२३.४ **कोषः** - **शकटम्** – क्लीवेऽनः शकटोऽस्त्री स्यात्, इत्यमरः । **एरण्डः** - एरण्ड उरुवूकश्च रुचकश्चित्रकश्च सः, इत्यमरः । **वसुधा** – भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा । धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः । सर्वसहा वसुमती वसुधोर्वी वसुन्धरा । गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही, इत्यमरः । **मणिः** – रत्नं मणिर्द्वयो-रश्मजातौ भक्तादिकेऽपि च, इत्यमरः । **मनः** – चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः । **गर्भः** - गर्भो भ्रूण इमौ समौ, इत्यमरः । **जन्तुः** - जन्तुजन्युशरीरिणः, इत्यमरः । **स्तनः**-स्तनौ कुचौ, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ अधोलिखितप्रश्नानामुत्तराणि लिखत ।

१. शक्यम् किम् ? किञ्चाशक्यम् ?

२. अयं निजः परो वेति चिन्तकाः के ?

३. वसुधैव केषां कटुम्बकं भवति ?

४. दुर्जनः क इव परिहर्तव्यः ?

५. दुरात्मनां महात्मनाञ्च लक्षणानि कानि ?

६. जनानां किं सुकुरम् ? किञ्च काठिन्यम् ?

७. अर्थस्य किं महत्त्वमस्ति ?

८. वृत्त्यर्थं नातिचेष्टेत इति यदुक्तन्तस्य कारणं किम् ?

९. एरण्डोऽपि कुत्र द्रुमायते ?

१०. दुर्जनसुहृज्जनयोः को भेदः ?

३ उक्तपद्यानि कस्य छन्दस उदाहरणानि ? किञ्च तस्य लक्षणम् ?

४ सन्धिं कुरुत ।

यत्+अशक्यम् । तत्+शक्यम् । यत्+शक्यम् । न+उदके । वा+इति । उदारचरितानाम्+तु । वसुधा+एव । विद्या+अलङ्कृतः । अलङ्कृतस्+अपि । मनसि+अन्यत् । वचसि+एकम् । कर्मणि+एकम् । तेन+अधीतम् । वृत्ति+अर्थम् । न+अति । धात्रा+एव । गर्भात्+उत्पतिते ।

५ सविग्रहं समासनामानि लिखत ।

लघुचेतसाम् । उदारचरितानाम् । महात्मनाम् । परोपदेशे । दुरात्मनाम् । नारिकेलसमाकाराः । बदरीकाकाराः ।

६ निर्धारितपद्यान्तर्गतपदानां दण्डान्वयं विधाय पर्यायशब्दान् लिखत ।

७ निर्धारितपद्यानां सरलार्थं लिखत ।

८ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

शक्यम् । परिहर्तव्यः । अलङ्कृतः । अनुष्ठानम् । अधीतम् । अनुष्ठितम् । श्रुतम् । कृत्वा । पृष्टतः । निर्मितः । नैराश्यम् । अवलम्बितम् । उत्पतितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पण्डितः । सुकरम् ।

१० कमपि विषयमवलम्ब्य स्वल्पं मनोवादं रचयत ।

११ कर्मपदानि क्रियापदानि तद्धातवश्चान्विष्य लिखत ।

१२ वाच्यपरिवर्तनं कुरुत ।

१. तेन सर्वमधीतं येन नैराश्यमवलम्बितम् ।

२. वृत्तिर्धात्रैव निर्मिता ।

३. लघुचेतसो जना अयं निजः परो वेति गणयन्ति ।

४. उदके शकटं न गच्छति ।

५. मया वहवश्छात्राः पाठ्यन्ते ।

१३. निम्नलिखितपदानां वर्गं निर्धारयत–

अशक्यम् । न । तत् । उदके । शकटम् । नौ । गच्छति । स्थले । यत्र । विद्वज्जनः। नास्ति । श्लाघ्यः । तत्र । अल्पधीः । निरस्तपादपे । देशे । एरण्डः । द्रुमायते । अयम् । निजः । परः । वा । गणना । लघुचेतसाम् । उदारचरितानाम् । वसुधा । कुटुम्बकम् । सुहृज्जनाः । नारिकेलसमाकाराः । दृश्यन्ते । अन्ये । बदरीकाकाराः । मनोहराः । बहिः । दुर्जनः । विद्यया । अलङ्कृतः । मणिना । भूषितः । सर्पः । भयङ्करः । असौ । मनसि । वचसि । कर्मणि । दुरात्मनाम् । महात्मनाम् । परोपदेशे । पाण्डित्यम् । नृणाम् । सुकरम् । अनुष्ठानम् । कस्यचित्। यस्य । तस्य। मित्राणि । बान्धवाः । पुमान् । लोके । पण्डितः । अधीतम् । श्रुतम्। अनुष्ठितम् । आशाः । पृष्ठतः। कृत्वा । नैराश्यम् । अवलम्बितम् । धात्रा । निर्मिताः। गर्भात् । जन्तौ । स्तनौ । प्रस्रवतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशः पाठः

अनुष्टब्वृत्तम् - ५

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ।।१।।

एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्यात् राज्यं सराजकम् ।।२।।

षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः ।।३।।

२४.१.१ **यः** = पुरुषः (जुन मानिस) **अमित्रम्** = शत्रुम् (शत्रुलाई) **मित्रम्** = सुहृदम् (मित्र) **कुरुते** = करोति (बनाउँछ) **मित्रम्** = सुहृदम् (मित्रलाई) **द्वेष्टि** = ईर्ष्यति (ईर्ष्या गर्छ) **हिनस्ति च** = घातयति च (मार्छ पनि) **दुष्टम्** = दुषितम् (खराब) **कर्म** = कार्यञ्च (काम पनि) **आरभते** = करोति (गर्छ) **तम्** = पुरुषम् (त्यस्तो मानिसलाई) **विद्वासः** (विद्वान्हरू) **मूढचेतसम्** = मूर्खहृदयम् (मूर्ख हृदय भएको भनेर) **आहुः** = कथयन्ति (भन्दछन्) ।

२४.१.२ **धनुष्मता** = धानुष्केन (धनुर्धारी पुरुषले) **मुक्तः** = त्यक्तः (छोडिएको) **इषुः** = वाणः (वाणले) **एकम्** = पुरुषम् (एउटा मानिसलाई) **हन्यात्** = मारयेत् (मार्ला) वा (अथवा) **न हन्यात्** = न मारयेत् (न मार्ला) **किन्तु** (तर) **बुद्धिमता** = प्रज्ञावता (बुद्धि भएको मानिसले) **उत्सृष्टा** = त्यक्ता (छोडेको) **बुद्धिः** = प्रज्ञा (बुद्धिले) **सराजकम्**= नृपसहितम् (राजासहित) **राज्यम्** = आधिपत्यम् (राज्यलाई नै) **हन्यात्** = नाशयेत् (नाश गर्ला) ।

२४.१.३ **आत्मनि** = स्वस्मिन् (आफूमा) **नित्यानाम्** = नित्यरूपेण अवस्थितानाम् (स्थिर रूपले रहने) **षण्णाम्** = क्रोधलोभादीनाम् (क्रोध, लोभ, मद, मोह, मात्सर्य र कामको) **ऐश्वर्यम्** = स्वामित्वम् (वशमा गर्न सक्ने क्षमता) **यः** = पुरुषः (जसले) **अधिगच्छति**= प्राप्नोति (प्राप्त गर्छ) **सः**= तादृशः (त्यस्तो) **विजितेन्द्रियः**= वशीकृतसकलेन्द्रियः (सबै इन्द्रियलाई वशमा गर्न सक्ने पुरुष) **अनर्थैः** = अनर्थकारिभिः (अनर्थ पैदा गर्ने) **पापैः** = दुराचारैः (दुष्ट आचरणबाट) **कुतः** = कस्मात् (कसरी)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीलं प्रधानं पुरुषे तद् यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ।।४।।

सुवर्णपुष्पां पृथ्वीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।५।।

सुलभाः पुरुषा राजन् ! सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ।।६।।

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति ।।७।।

युज्यते = लिप्यते (मुछिन्छ) ।

२४.१.४ **पुरुषे** = नरे (मानिसमा) **शीलम्** = सु-स्वभावः (असल स्वभाव नै) **प्रधानम्**= मुख्यम् (मुख्य हुन्छ) **तत्** = शीलम् (त्यो शील) **इह** = अस्मिन् संसारे (यस संसारमा) **यस्य** = पुरुषस्य (जुन मानिसको) **प्रणश्यति** = नश्यति (नाश हुन्छ) **तस्य**= पुरुषस्य (त्यस मानिसको) **जीवितेन** = प्राणितेन (बाँच्नुको) **न अर्थः** = न प्रयोजनम् (प्रयोजन रहँदैन) **धनेन** = द्रव्येण (सम्पत्तिको पनि) **न** = प्रयोजनं नास्ति (प्रयोजन हुँदैन) **बन्धुभिः**= बान्धवैः (दाजुभाइको पनि) **न** = प्रयोजनम् नास्ति (प्रयोजन हुँदैन) ।

२४.१.५ **शूरः** = वीरः (वीर) **कृतविद्यः** = अधीतशास्त्रः (विद्वान् र) **यः** = पुरुषः (जुन मानिस) **सेवितुम्** = सेवाम् कर्तुम् (रिझाउन) **जानाति** = वेत्ति (जान्दछ) **एते** (यी) **त्रयः**= त्रिविधाः (तीन किसिमका) **पुरुषाः**= जनाः(मानिसहरूले) **सुवर्णपुष्पाम्**= हेमकुसुमाम् (सुनको फूलले भरिएकी) **पृथ्वीम्** = धरित्रीम् (पृथ्वीलाई) **चिन्वन्ति** = चेतुं शक्नुवन्ति (टिप्न सक्छन् अर्थात् पृथ्वीको सम्पत्तिलाई प्राप्त गर्न सक्छन्) ।

२४.१.६ **हे राजन्** = हे युधिष्ठिर (हे युधिष्ठिर) **सततम्** = निरन्तरम् (सँधै) **प्रियवादिनः**= प्रियवक्तारः (प्यारो बोल्ने) **पुरुषाः** = जनाः (मानिसहरू) **सुलभाः** = सुखेन लब्धुं शक्याः (सजिलैसित भेटिन्छन्) **अप्रियस्य** = अरुचिकरस्य (अप्रिय) **तु** = किन्तु (तर) **पथ्यस्य**= हितकरस्य (हितकारी वचन) **वक्ता**= कथयिता (भन्ने र) **श्रोता**= आकर्णयिता च (सुन्ने पनि) **दुर्लभः** = दुःखेनैव लब्धुं शक्यः (बडो मुस्किलले फेला पर्छ)।

२४.१.७. **अविश्वस्ते** = विश्वासानर्हे (विश्वास गर्न लायक नभएको व्यक्तिमा) **न विश्वसेत्**= विश्वासं न कुर्यात् (विश्वास नगरोस्) **विश्वस्ते** = प्रत्यययोग्येऽपि पुरुषे (विश्वास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धृतिः शमो दमः शौचं करुण्यं वागनिष्ठुरा ।
मित्राणाञ्चानभिद्रोहः सप्तैताः समिधः स्मृताः ।।८।।

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ।।९।।

न स्वप्नेन जयेन्निद्रां न कामेन जयेत् स्त्रियः ।
नेन्धनेन जयेदग्निं न पानेन सुरां जयेत् ।।१०।।

गर्न लायक पुरुषमा पनि) **न अतिविश्वसेत्** = अत्यन्तमेव विश्वासं न कुर्यात् (ज्यादै विश्वास नगरोस्) **विश्वासाद्** = प्रत्ययात् (त्यस्तो विश्वासबाट) **उत्पन्नम्** = प्रादुर्भूतम् (उत्पन्न भएको) **भयम्** = भीतिः (डरले) **मूलान्यपि** = सकलमेव (सबै कुरालाई) **निकृन्तति** = विनाशयति (नाश गर्दछ) ।

२४.१.८ **धृतिः** = धैर्यम् (धैर्य) **शमः** = शान्तिः (शान्ति) **दमः** = इन्द्रियनिग्रहः (इन्द्रियलाई वशमा गर्ने काम) **शौचम्** = स्नानादि (शुद्धता) **कारुण्यम्** = दया (दया) **अनिष्ठुरा वाक्** = प्रियवचनम् (निष्ठुरी नभएको बोली) **मित्राणाम्** = सुहृदाम् (मितहरू–सँगको) **अनभिद्रोहः** = द्रोहाभावश्च (द्रोह नराख्नु पनि) **एताः** = इमाः (यी) **सप्त** = सप्तसंख्यकाः (सात कुरालाई) **समिधः** (समिधा) **स्मृताः** = कथिताः (भनिएको छ) ।

२४.१.९ **विनयः** = नम्रता (नम्रताले) **अकीर्तिम्** = अपयशः (अपकीर्तिलाई) **हन्ति** = नाशयति (नाश गर्छ) **पराक्रमः** = विक्रमः (पराक्रमले) **अनर्थम्** = अकल्याणम् (अकल्याणलाई) **हन्ति** = नाशयति (नाश गर्छ) **क्षमा** = सहनशीलता (सहनशीलताले) **नित्यम्** = निरन्तरम् (सँधै) **क्रोधम्** = कोपम् (रिसलाई) **हन्ति** = नाशयति (नाश गर्छ) **आचारः** = सद्व्यवहारः (असल व्यवहारले) **अलक्षणम्** = कुलक्षणम् (खराब कुराहरूलाई) **हन्ति** = नाशयति (नाश गर्छ) ।

२४.१.१० **स्वप्नेन** = स्वापेन (सुतेर) निद्राम् (निद्रालाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) **कामेन** = मदनेन (कामद्वारा) **स्त्रियः** = नारीः (स्त्रीजातिहरूलाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) **इन्धनेन** = दारुणा (दाउराले) **अग्निम्** = वह्निम् (आगालाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) **पानेन** (पिएर) **सुराम्**= मदिराम् (रक्सीलाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीलं प्रधानं पुरुषे तद् यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ।।४।।

सुवर्णपुष्पां पृथ्वीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।५।।

सुलभाः पुरुषा राजन् ! सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ।।६।।

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति ।।७।।

युज्यते = लिप्यते (मुछिन्छ) ।

२४.१.४ **पुरुषे** = नरे (मानिसमा) **शीलम्** = सु-स्वभावः (असल स्वभाव नै) **प्रधानम्**= मुख्यम् (मुख्य हुन्छ) **तत्** = शीलम् (त्यो शील) **इह** = अस्मिन् संसारे (यस संसारमा) **यस्य** = पुरुषस्य (जुन मानिसको) **प्रणश्यति** = नश्यति (नाश हुन्छ) **तस्य**= पुरुषस्य (त्यस मानिसको) **जीवितेन** = प्राणितेन (बाँच्नुको) **न अर्थः** = न प्रयोजनम् (प्रयोजन रहँदैन) **धनेन** = द्रव्येण (सम्पत्तिको पनि) **न** = प्रयोजनं नास्ति (प्रयोजन हुँदैन) **बन्धुभिः**= बान्धवैः (दाजुभाइको पनि) **न** = प्रयोजनम् नास्ति (प्रयोजन हुँदैन) ।

२४.१.५ **शूरः** = वीरः (वीर) **कृतविद्यः** = अधीतशास्त्रः (विद्वान् र) **यः** = पुरुषः (जुन मानिस) **सेवितुम्** = सेवाम् कर्तुम् (रिझाउन) **जानाति** = वेत्ति (जान्दछ) **एते** (यी) **त्रयः**= त्रिविधाः (तीन किसिमका) **पुरुषाः**= जनाः(मानिसहरूले) **सुवर्णपुष्पाम्**= हेमकुसुमाम् (सुनको फूलले भरिएकी) **पृथ्वीम्** = धरित्रीम् (पृथ्वीलाई) **चिन्वन्ति** = चेतुं शक्नुवन्ति (टिप्न सक्छन् अर्थात् पृथ्वीको सम्पत्तिलाई प्राप्त गर्न सक्छन्) ।

२४.१.६ **हे राजन्** = हे युधिष्ठिर (हे युधिष्ठिर) **सततम्** = निरन्तरम् (सँधै) **प्रियवादिनः**= प्रियवक्तारः (प्यारो बोल्ने) **पुरुषाः** = जनाः (मानिसहरू) **सुलभाः** = सुखेन लब्धुं शक्याः (सजिलैसित भेटिन्छन्) **अप्रियस्य** = अरुचिकरस्य (अप्रिय) **तु** = किन्तु (तर) **पथ्यस्य**= हितकरस्य (हितकारी वचन) **वक्ता**= कथयिता (भन्ने र) **श्रोता**= आकर्णयिता च (सुन्ने पनि) **दुर्लभः** = दुःखेनैव लब्धुं शक्यः (बडो मुस्किलले फेला पर्छ)।

२४.१.७. **अविश्वस्ते** = विश्वासानर्हे (विश्वास गर्न लायक नभएको व्यक्तिमा) **न विश्वसेत्**= विश्वासं न कुर्यात् (विश्वास नगरोस्) **विश्वस्ते** = प्रत्यययोग्येऽपि पुरुषे (विश्वास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धृतिः शमो दमः शौचं करुण्यं वागनिष्ठुरा ।
मित्राणाञ्चानभिद्रोहः सप्तैताः समिधः स्मृताः ।।८।।

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ।।९।।

न स्वप्नेन जयेन्निद्रां न कामेन जयेत् स्त्रियः ।
नेन्धनेन जयेदग्निं न पानेन सुरां जयेत् ।।१०।।

गर्न लायक पुरुषमा पनि) **न अतिविश्वसेत्** = अत्यन्तमेव विश्वासं न कुर्यात् (ज्यादै विश्वास नगरोस्) **विश्वासाद्** = प्रत्ययात् (त्यस्तो विश्वासबाट) **उत्पन्नम्** = प्रादुर्भूतम् (उत्पन्न भएको) **भयम्** = भीतिः (डरले) **मूलान्यपि** = सकलमेव (सबै कुरालाई) **निकृन्तति** = विनाशयति (नाश गर्दछ) ।

२४.१.८ **धृतिः** = धैर्यम् (धैर्य) **शमः** = शान्तिः (शान्ति) **दमः** = इन्द्रियनिग्रहः (इन्द्रियलाई वशमा गर्ने काम) **शौचम्** = स्नानादि (शुद्धता) **कारुण्यम्** = दया (दया) **अनिष्ठुरा वाक्** = प्रियवचनम् (निष्ठुरी नभएको बोली) **मित्राणाम्** = सुहृदाम् (मितहरू-सँगको) **अनभिद्रोहः** = द्रोहाभावश्च (द्रोह नराख्नु पनि) **एताः** = इमाः (यी) **सप्त** = सप्तसंख्यकाः (सात कुरालाई) समिधः (समिधा) **स्मृताः** = कथिताः (भनिएको छ) ।

२४.१.९ **विनयः** = नम्रता (नम्रताले) **अकीर्तिम्** = अपयशः (अपकीर्तिलाई) **हन्ति** = नाशयति (नाश गर्छ) **पराक्रमः** = विक्रमः (पराक्रमले) **अनर्थम्** = अकल्याणम् (अकल्याणलाई) **हन्ति** = नाशयति (नाश गर्छ) **क्षमा** = सहनशीलता (सहनशीलताले) **नित्यम्** = निरन्तरम् (सँधै) **क्रोधम्** = कोपम् (रिसलाई) **हन्ति** = नाशयति (नाश गर्छ) **आचारः** = सद्व्यवहारः (असल व्यवहारले) **अलक्षणम्** = कुलक्षणम् (खराब कुराहरूलाई) **हन्ति** = नाशयति (नाश गर्छ) ।

२४.१.१० **स्वप्नेन** = स्वापेन (सुतेर) निद्राम् (निद्रालाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) **कामेन** = मदनेन (कामद्वारा) **स्त्रियः** = नारीः (स्त्रीजातिहरूलाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) **इन्धनेन** = दारुणा (दाउराले) **अग्निम्** = वह्निम् (आगालाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) **पानेन** (पिएर) **सुराम्**= मदिराम् (रक्सीलाई) **न जयेत्** = जेतुं नैव शक्यः (जित्न सकिंदैन) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वसूतानां न पुंसां वामलोचना ।।११।।

२४.१.११ अग्नि = वह्निः (आगो) **काष्ठानाम्** = इन्धनानाम् (काठबाट) **न तृप्यति** = तृप्तो न भवति (अघाउँदैन) **महोदधिः** = समुद्रः (समुद्र) **आपगानाम्** = नदीनाम् (नदीहरूबाट) **न तृप्यति** = तृप्तो न भवति (तृप्त हुँदैन) **अन्तकः** = कालः (काल) **सर्वभूतानाम्**= सर्वप्राणिनाम् (सबै प्राणीहरूबाट) **न तृप्यति** = न तृप्तो भवति (अघाउँदैन) **वामलोचना**= स्त्री (स्त्री जाति) **पुंसाम्** = पुरुषाणाम् (पुरुषहरूबाट) **न तृप्यति** = नैव तृप्ता भवति (तृप्त हुन्न) ।

२४.२ विग्रहः - अमित्रम् - न मित्रम् (नञ् स.) । **मूढचेतसम्** - मूढं चेतः यस्य तम् (बहु.) । **इषुमुक्तः** - इषुणा मुक्तः (तृ.त.) । **सराजकम्** - राज्ञा सहितम् (तृ.त.) । **विजितेन्द्रियः** - विजितानि इन्द्रियाणि येन सः (बहु.) । **सुवर्णपुष्पाम्** - सुवर्णस्य पुष्पाणि यस्यां सा (बहु.) ताम् । **कृतविद्यः** - कृता विद्या येन सः (बहु.) । **प्रियवादिनः** - प्रियं वदन्तीति (उपप.) । **अप्रियः** - न प्रियः (नञ्) । **अविश्वस्ते** - न विश्वस्तः (नञ्) तस्मिन् । **अनभिद्रोहः** - न अभिद्रोहः (नञ्) । **महोदधिः** - महान् चासौ उदधिः (कर्मधा.) । **सर्वभूतानाम्** - सर्वे च ते भूताः (कर्मधा.) । **वामलोचना** - वामे लोचने यस्याः सा (बहु.)।

२४.३ प्रकृतिप्रत्ययविच्छेदः - मुक्तः - मुच् + क्त । **उत्सृष्टः** - उत् + सृज् + क्त । **सेवितुम्** - सेव् + तुमुन् । **प्रियः** - प्रि + क । **शमः** - शम् + अच् । **कारुण्यम्** - करुणा + ष्यञ् । **स्वप्नः** - स्वप् + नङ् । **जीवितुम्** - जीव् + तुमुन् । **धनुष्मान्** - धनुष्+ मतुप्।

२४.४ कोषः- इषुः - पृषत्कवाणविशिखा अजिह्मगखगाशुगाः । कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः, इत्यमरः । **शीलम्** - शीलं स्वभावे सद्वृत्ते, इत्यमरः । **सुवर्णम्** - स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्, इत्यमरः । **पुष्पम्** - सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्, इत्यमरः । **अन्तकः** - कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः, इत्यमरः । **अग्निः** - अग्निर्वैश्वानरो बह्निर्वीतिहोत्रो धनञ्जयः, इत्यमरः । **निद्रा** - स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि, इत्यमरः । **धृतिः** - धृतिर्धारणधैर्ययोः, इत्यमरः । **शमः** - शमथस्तु शमः शान्तिः, इत्यमरः । **दमः** - दान्तिस्तु दमथो दमः, इत्यमरः । **वाग्** - ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. मूढचेतसः किं लक्षणम् ?
२. बुद्धिमतोत्सृष्टा बुद्धिः कं हन्ति ?
३. अनर्थैः को न युज्यते ?
४. कस्य जीवितेनार्थो नास्ति ?
५. सुवर्णपुष्पां पृथ्वीं के चिन्वन्ति ?
६. के पुरुषाः सुलभाः कश्च दुर्लभः ?
७. केषु न विश्वसेत् ?
८. सप्तसमिधः काः सन्ति ?
९. अकीर्त्यनर्थक्रोधालक्षणानि कैर्हन्यन्ते ?
१०. निद्रां स्त्रियोऽग्निं सुराञ्च कैर्जेतुं न शक्यते ?
११. अग्निः समुद्रोऽन्तकः स्त्रियश्च कैर्न तृप्यन्ति ?

३ निर्धारितपद्यानामन्वयं प्रदर्शयत ।

४ पाठान्तर्गतपद्यानां व्याख्यां कुरुत ।

५ सविग्रहं समासनामानि लिखत ।

अमित्रम् । मूढचेतसम् । इषुमुक्तः । सराजकम् । विजितेन्द्रियः । सुवर्णपुष्पाम्। कृतविद्यः । प्रियवादिनः । अप्रियः । अविश्वस्ते । अनभिद्रोहः । महोदधिः । सर्वभूतानाम् । वामलोचना ।

६ सन्धिं कुरुत ।

च+आरभते । हन्यात्+न । षट्+नाम् । यस्+अधिगच्छति । कुतस्+अनर्थैः। यस्य+इह । शूरस्+च । मूलानि+अपि । जयेत्+अग्निम् । जयेत्+निद्राम् । अग्निस्+तृप्यति । शमस्+दमः।

७ उक्तपद्यानि कस्य छन्दस उदाहरणानि ? सलक्षणं प्रकाशयत ।

८ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

९ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

मुक्तः। उत्सुष्टः । सेवितुम् । प्रियः । शमः । कारुण्यम् । स्वप्नः । जीवितम्। धनुष्मान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविंशः पाठः

इन्द्रवज्रोपेन्द्रवज्रावृत्तम्, उपजातिश्च

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

× × × × × ×

उपेन्द्रवज्रा जतजास्ततो गौ ।।

× × × × × ×

अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्याष्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ।।

× × × × × ×

सर्वौषधीनाममृतं प्रधानं
सर्वेषु सौख्येष्वशनं प्रधानम् ।
सर्वेन्द्रियाणां नयनं प्रधानम् ।
सर्वेषु गात्रेषु शिरः प्रधानम् ।।१।।

२५.१.१ **यदि** = चेत् (यदि) **तौ** = तगणौ (दुईवटा तगण) **जगौ** = जगणः, एको गुरुवर्णः (जगण र एउटा गुरु वर्ण र) **गः** = गुरुवर्णः (गुरु वर्ण भयो भने) **इन्द्रवज्रा स्यात्**= इन्द्रवज्रावृत्तं भवेत् (इन्द्रवज्रा छन्द हुन्छ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले तगण, तगण, जगण र दुईवटा गुरुवर्ण आउँछन्, त्यसलाई इन्द्रवज्रा छन्द भन्दछन्)।

२५.१.२ **यदि**= चेत् (यदि) **जतजाः** = जगणतगणजगणाः (जगण, तगण र जगण) **ततः**= तनदन्तरम् (त्यसपछि) **गौ** = गुरुवर्णौ (दुईवटा गुरुवर्ण भए भने) **उपेन्द्रवज्रा**= उपेन्द्रवज्रावृत्तं भवति (उपेन्द्रवज्रा छन्द हुन्छ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले जगण, तगण, जगण र दुईवटा गुरुवर्ण आउँछन्, त्यसलाई उपेन्द्रवज्रा छन्द भन्दछन्) ।

२५.१.३ **अनन्तरोदीरितलक्ष्मभाजौ** = इन्द्रोवज्रोपेन्द्रवज्रालक्षणयुतौ (इन्द्रवज्रा र उपेन्द्रवज्रा मिलेका) **यदीयौ** (जसका) **पादौ** = चरणौ (पाउहरू छन्) **ताः** (ती छन्दहरू) **उपजातयः**= कथ्यन्ते (उपजाति भनिन्छन्) **इत्थम्** = अनेनैव प्रकारेण (यसरी नै) **अन्याषु अपि मिश्रिताषु** = अन्येषु वृत्तेषु मिश्रितेष्वपि (अरू छन्द मिसिदा पनि) **इदमेव** = एतदेव (उपजाति वृत्त नै हुन्छ भनेर) **वदन्ति** = कथयन्ति (भन्दछन्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्धः सुवर्णे फलमिक्षुदण्डे
नाकारि पुष्पं खलु चन्दनस्य ।
विद्वान् धनाढ्यश्च नृपश्चिरायु-
र्धातुः पुरा कोऽपि न बुद्धिदोऽभूत् ।।२।।

न निर्मितः केन न दृष्टपूर्वः
न श्रूयते हेममयः कुरङ्गः ।
तथापि तृष्णा रघुनन्दनस्य
विनाशकाले विपरीतबुद्धिः ।।३।।

२५.१.४ **सर्वौषधीनाम्** = निखिलद्रव्याणाम् (सम्पूर्ण औषधिहरूमध्ये) **अमृतम्**= पीयूषम् (अमृत) **प्रधानम्** = मुख्यम् (मुख्य हुन्छ) **सर्वेषु** = निखिलेषु (सबै) **सौख्येषु**= सुखदायकेषु पदार्थेषु (सुख दिने वस्तुहरूमा) **अशनम्** = भोजनम् (खाने कुरा नै) **प्रधानम्**= मुख्यम् (मुख्य हुन्छ) **सर्वेन्द्रियाणाम्** = निखिलेन्द्रियाणाम् (हातगोडा आदि सम्पूर्ण इन्द्रियहरूमा) **नयनम्** = नेत्रम् (आँखा) **प्रधानम्** = मुख्यम् (मुख्य हुन्छ) **गात्रेषु** = शरीरावयवेषु (शरीरका सबै अवयवहरूमध्ये) **शिरः** = मस्तकम् (शिर) **प्रधानम्** = मुख्यम् (मुख्य हुन्छ) ।

२५.१.५ **ब्रह्मणा** = विधिना (विधिले) **सुवर्णे** = हेम्नि (सुनमा) **गन्धः** = सुवासः (वासना) **इक्षुदण्डे** = इक्षौ (उखुमा) **फलम्** = प्रसवम् (फल) **चन्दनस्य** = घनसारस्य (चन्दनमा) **पुष्पम्** = कुसुमम् (फूल) **विद्वान्** = प्रज्ञावान् (विद्वान्लाई) **धनाढ्यः** = धनिकः (धनी) **नृपः** = नरपतिः (राजालाई) **चिरायुः** = दीर्घजीवी (लामो समयसम्म बाँच्ने) **न अकारि**= न कृतम् (बनाएनन्) **अस्मिन् विषये** (यस विषयमा) **पुरा** = प्राक् (पहिले) **धातुः** = ब्रह्मणः (ब्रह्मालाई) **बुद्धिदः** = बुद्धिदाता (बुद्धि दिने) **कोऽपि** = पुरुषः (कुनै मानिस) **न अभूत्** = नाभवत् (भएन) ।

२५.१.६ **हेममयः** = सुवर्णमयः (सुनको) **कुरङ्गः** = मृगः (मृग) **केन** = केनापि पुरुषेण (कसैले पनि) **न निर्मितः** = न रचितः (रचना गरेको थिएन) **न दृष्टपूर्वः**= पूर्वं कदापि नैव विलोकितः (पहिले कहिल्यै पनि देखिएको थिएन) **न श्रूयते** = न आकर्ण्यते (सुनिएको पनि छैन) **तथापि** = तदपि (तैपनि) **रामः** = रामचन्द्रः (रामचन्द्र) **मृगाय** = सुवर्णहरिणाय (सुनको मृगका लागि) **लुलुभे** = लुब्धवान् (लोभिए) **प्रायः** = बहुशः (धेरैजसो) **समापन्नविपत्तिकाले** = समागतापत्समये (आपत्ति आइपरेको वेला) **पुंसाम्** = धीमतां पुरुषाणाम् (बुद्धिमान् पुरुषहरूका) **धियः** = बुद्धयः अपि (बुद्धिहरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन् ।।४।।

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ।।५।।

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलु सज्जनानाम् ।।६।।

पनि) **मलिनाः** = कुण्ठिताः (कुण्ठित) **भवन्ति** = जायन्ते (हुन्छन्) ।

२५.१.७ हे राजन् ! = हे भूप (हे राजन्) **नित्यम्** = निरन्तरम् (सधैं) **अर्थागमः**= घनागमनम् (धन आउनु) **अरोगिता** = आरोग्यम् (निरोगी हुनु) **प्रिया** = अभीष्टा (अनुकूल) **प्रियवादिनी** = मधुरभाषिणी (मीठो बोल्ने) **भार्या** = पत्नी (पत्नी हुनु) **वश्यः** = आज्ञाकारी (आज्ञा मान्ने) **पुत्रः** = तनयः (छोरो हुनु) **अर्थकरी** = संपत्त्युपार्जनकरी (सम्पत्ति आर्जन गर्न सकिने) **विद्या** = शास्त्रम् (विद्या हुनु) **जीवलोकस्य** = मनुष्यलोकस्य (यस मनुष्यलोकका) **षट्** = षट्सङ्ख्यकानि (६ वटा) **सुखानि** = सुखजनकानि सन्ति (सुख दिने वस्तु हुन्) ।

२५.१.८ यस्य = नरस्य (जुन मानिसको) **वृत्तम्** = सम्पत्तिः (सम्पत्ति छ) **सः नरः** = स एव पुरुषः (त्यही मानिस) **कुलीनः अस्ति** = उच्चकुलोत्पन्नः कथ्यते (कुलीन मानिन्छ) **सः**= पुरुषः (त्यही मानिस) **पण्डितः** = विद्वान् (विद्वान् मानिन्छ) **सः** = पुरुषः (त्यही मानिस) **श्रुतवान्** = शास्त्रज्ञः (पढे लेखेको मानिन्छ) **गुणज्ञः** = गुणज्ञाता (गुणज्ञ मानिन्छ) **स एव** (त्यही पुरुष) **वक्ता** = भाषणकुशलः (वक्ता मानिन्छ) **सः च**= तादृश एव पुरुषः (त्यस्तै मानिस) **दर्शनीयः** = विलोकनीयः (हेर्न लायक हुन्छ) **अतः** (यसैले) **सर्वे** = निखिलाः (सबै) **गुणाः** (गुणहरू) **काञ्चनम्** = सुवर्णम् (सुन अर्थात् द्रव्यमा) **आश्रयन्ति** = आश्रिता भवन्ति (आश्रित हुन्छन्) ।

२५.१.९ खलसज्जनानाम् = दुष्टशिष्टपुरुषाणाम् (दुष्ट र असल मानिसहरूमध्ये)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नैर्महार्हैस्तुतुषुर्न देवाः
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद् विरमन्ति धीराः ।।७।।

असंभवं हेममृगस्य जन्म
तथापि रामो ललुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले
धियोऽपि पुसां मलिना भवन्ति ।।८।।

दुष्टानाम् (दुष्टहरूको) **मैत्री** = सख्यम् (मित्रता) **आरम्भगुर्वी** = प्रारम्भे वर्द्धमाना (शुरूमा बढ्ने र) **क्रमेण** = क्रमशः (क्रमैले) **क्षयिणी** = क्षीयमाणा (नाश हुने खालको हुन्छ)**सज्जनानाम्** (सज्जनको) **मैत्री** (मित्रता) **पुरा** = प्रथमम् (पहिले) **लघ्वी** = स्वल्परूपा (सानो र) **पश्चाद्** = अनन्तरम् (पछि) **वृद्धिमती** = वर्धमाना भवति (बढ्ने हुन्छ) **अतः** = अस्मात् हेतोः (यसैले) **पूर्वार्द्धपरार्द्धभिन्ना** = पूर्वार्द्धे उत्तरार्द्धे च पृथक् रूपा (पूर्वार्ध र उत्तरार्द्धमा भिन्न भएका) **दिनस्य** = दिवसस्य (दिनको) **छाया इव** = अनातपरेखा इव (छाया जस्तै) **भवति** = जायते (हुन्छ अर्थात् दुर्जनको मित्रता दिनको पूर्वार्धको छाया जस्तै शुरूमा लामो र क्रमैले घट्दै जाने खालको हुन्छ । सज्जनको मैत्री अपराह्नको छाया जस्तै शुरूमा छोटो र क्रमैले बढ्दै जाने खालको हुन्छ)।

२५.१.१० देवाः = अमराः (देवताहरू) **महार्हैः** = बहुमूल्यैः (धेरै मूल्य पर्ने) **रत्नैः** = हीरकादिभिः (रत्नले पनि) **न तुतुषुः** = तुष्टिम् न प्रापुः (सन्तुष्ट भएनन्) **भीमविषेण**= भयङ्करकालकूटाख्यगरलेन (डरलाग्दो विषबाट पनि) **भीतिम्** = भयम् (डर) **न भेजिरे**= न प्रापुः (मानेनन्) **किन्तु** (तर) **सुधां विना** = अमृतप्राप्तिं विना (अमृत प्राप्त नगरिकन) **विरामम्** = स्वकार्यविश्रामम् (आफूले थालेको कामबाट विश्राम) **न प्रययुः** = न लेभिरे (लिएनन्) **हि** = यतः (किनभने) **धीराः** = धैर्यवन्तः (धैर्यशाली मानिसहरू) **निश्चितार्थात्**= प्रतिज्ञातार्थात् (प्रतिज्ञा गरिएको कार्यबाट) **न विरमन्ति** = विरामं न कुर्वन्ति (पराङ्मुख हुँदैनन् अर्थात् आफूले प्रतिज्ञा गरेको कुरा पूरा गरेर नै छाड्छन्) ।

२५.१.११ हेममृगस्य= सुवर्णमृगस्य (सुनको मृगको) **जन्म** = जननम् (उत्पत्ति) **असम्भवम्**= सम्भवरहितम् (असम्भव कुरा हो) **तथापि** (तैपनि) **रामः** = दाशरथिः (रामचन्द्र) **मृगाय** = सुवर्णमृगप्राप्त्यर्थम् (सुनको मृगको प्राप्तिका निमित्त) **लुलुभे** = लुब्धो बभूव (लोभिए) । **यतः** (किनभने) **समापन्नविपत्तिकाले** = निकटापत्तिसमये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
धाराधरो वर्षति नात्महेतोः
परोपकाराय सतां विभूतयः ।।९।।

(आपत्ति नजिकै भएको अवस्थामा) **पुंसाम्** = बुद्धिमतां पुरुषाणाम् (बुद्धिमान् मानिसहरूका) **धियः अपि** = बुद्धयः अपि (बुद्धिहरू पनि) **मलिनाः** = मलीमसाः (विवेकरहित) **भवन्ति** = जायन्ते (हुन्छन्) ।

२५.१.१२ **नद्यः** = सरितः (नदीहरू) **स्वयमेव** = आत्मनैव (आफैं) **अम्भः** = जलम् (पानी) **न पिबन्ति** = पानं नैव कुर्वन्ति (पिउँदैनन्) **वृक्षाः** = तरवः (रूखहरू) **स्वयम्** (आफैं) **फलानि** = प्रसवान् (फल) **न खादन्ति** = न भक्षयन्ति (खाँदैनन्) **धाराधरः** = मेघः (मेघ) **आत्महेतोः** = स्वस्य कृते (आफ्ना निमित्त) **न वर्षति** = वर्षणं न कुरुते (वर्षदैन) **सताम्** = सज्जनानाम् (सज्जनका) **विभूतयः** = संपदः (सम्पत्तिहरू) **परोपकाराय** = अन्योपकाराय (अरूकै उपकारका निमित्त) **भवन्ति** (हुन्छन्) ।

२५.२ **विग्रहः - जगौ** - जश्च गश्च (द्वन्द्व.) तौ । **जतजाः** - जश्च तश्च जश्च (द्वन्द्व.) ते । **अनन्तरोदीरितलक्ष्मभाजौ** - अनन्तरं उदीरितं लक्ष्म भजत इति (उपप.) तौ। **सर्वौषधीनाम्** - सर्वे च ते ओषधयः (कर्मधा.) तेषाम् । **सर्वेन्द्रियाणाम्** - सर्वाणि च तानि इन्द्रियाणि (कर्मधा.) तेषाम् । **इक्षुदण्डे** - इक्षोः दण्डः (ष.त.) तस्मिन् । **धनाढ्यः** - धनैः आढ्यः (तृ.त.) । **बुद्धिदः** - बुद्धिं ददातीति (उपप.) । **विनाशकाले**- विनाशस्य कालः (ष.त.) तस्मिन् । **विपरीतबुद्धिः** - विपरीता चासौ बुद्धिः (कर्मधा.)। **अर्थागमः** - अर्थानाम् आगमः (ष.त.) । **जीवलोकस्य** - जीवानां लोकः (ष.त.) तस्य। **पूर्वार्धपरार्धभिन्ना** - पूर्वार्धश्च परार्धश्च पूर्वार्धपरार्धौ (द्वन्द्व.) ताभ्यां भिन्ना (तृ.त.)। **भीमविषेण** - भीमश्चासौ विषः (कर्मधा.) तेन । **समापन्नविपत्तिकाले** - समापन्नश्चासौ विपत्तिकालः (कर्मधा.) तस्मिन् ।

२५.३ **प्रकृतिप्रत्ययविच्छेदः - प्रधानम्** - प्र-धा+ल्युट् + अन । **हीनः** - हा + क्त । **बुद्धिदः** - बुद्धि-दा + क । **निर्मितः**- निर् -मा + क्त । **हेममयः** - हेम + मयट् । **कुलीनः** - कुल + ख > ईन । **श्रुतवान्** - श्रु + क्तवतु । **गुणज्ञः** - गुण-ज्ञा + क । **वक्ता**- ब्रू (वच्) + तृच् । **दर्शनीयः** - दृश् + अनीयर् । **बुद्धिमती** - बुद्धि + मतुप् । **भिन्नः**- भिद् + क्त ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. औषधिषु, सौख्येषु गात्रेषु, इन्द्रियेषु च केषामस्ति प्रधान्यम् ?

२. कस्मिन् विषये धातुर्बुद्धिदो न कोप्यभवत् ?

३. विनाशकाले बुद्धिः कीदृशी भवति, कश्चात्र दृष्टान्तः ?

४. खलानां सज्जनानाञ्च मैत्र्योः किमन्तरम् ?

५. धीराः कस्माद् न विरमन्ति ?

६. पुसां धियः कदा मलिना भवन्ति ?

७. केषां विभूतयः परोपकाराय जायन्ते, के चात्र दृष्टान्ताः ?

३ सर्वोषधीनां० गन्धंसुवर्णे० इति पद्यद्वयं कस्मिन् छन्दसि रचितमस्ति ? चिञ्च तस्य लक्षणम् ? प्रकाशयत ।

४ न निर्मितः० इति पद्यं कस्य छन्दस उदाहरणम् ? सलक्षणं निरूपयत ।

५ अर्थागमादयः श्लोकाः कस्य छन्दस उदाहरणानि ? तत्र कयोश्च छन्दसो मिश्रणम् ? स्फुटं प्रतिपादयत ।

६ उपजातिछन्दसो लक्षणं सोदाहरणं स्फुटं प्रकाशयत ।

७ इन्द्रवज्रोपेवज्रयोर्लक्षणं स्फुटं प्रकाशयत ।

८ सविग्रहं समासनामानि लिखत ।

जगौ । जतजाः । अनन्तरोदीरितलक्ष्मभाजौ । सर्वौषधीनाम् । सर्वेन्द्रियाणाम्। इक्षुदण्डे । धनाढ्यश्च । बुद्धिदः । विनाशकाले । विपरीतबुद्धिः । अर्थागमः । जीवलोकस्य । पूर्वार्धपरार्धभिन्ना । भीमविषेण । समापन्नविपत्तिकाले ।

९ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

प्रधानम् । हीनः । बुद्धिदः । निर्मितः । हेममयः । कुलीनः । श्रुतवान् । गुणज्ञः । वक्ता । दर्शनीयः । भिन्नः ।

१० निर्धारितपाठान्तर्गतपद्यानामन्वयं निर्दिशत ।

११ सन्धिं कुरुत ।

सौख्येषु+अशनम् । नृपस्+चिरायुः । कस्+अपि । बुद्धिदस्+अभूत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रस्+अर्थकरी विद्या । यस्य+अस्ति । छाया+इव । निश्चितार्थात्+विरमन्ति ।

१२ निम्नसूक्तीनामाशयं प्रकाशयत ।

१. विनाशकाले विपरीतबुद्धिः ।

२. न निश्चितार्थाद् विरमन्ति धीराः ।

३. सर्वे गुणाः काञ्चनमाश्रयन्ति ।

१३ षष्ठ्यन्तपदान्यन्विष्य लिखत ।

१५ **कामपि घटनामश्रित्य दशाधिकैर्वाक्यैः स्वल्पमनुच्छेदं रचयत ।**

१६ वाच्यपरिवर्तनं कुरुत ।

१. हेममयः कुरङ्गो न श्रूयते ।

२. सर्वे गुणाः काञ्चनमाश्रयन्ति ।

३. धीरा निश्चितादर्थाद् न विरमन्ति ।

४. देवाः सुधां विना विरामं न प्रययुः ।

५. धातुर्बुद्धिदो न कोप्यभवत् ।

१७. **अधोलिखितपदानां वर्गं निर्धारयत–**

अमृतम् । प्रधानम् । अशनम् । नयनम् । सर्वेषु । गात्रेषु । शिरः । महार्हैः। रत्नैः। विना । धीराः । हेममृगस्य । धियः । अपि । मलिनाः । नद्यः । अम्भः । स्वयम् । फलानि । न । खादन्ति । धाराधरः । गन्धः । धनाढ्य : । विद्वान् । चिरायुः। हेममयः । प्रिया । कुलीनः । गुणज्ञः । दर्शनीयः । वक्ता । सर्वे । लघ्वी। वृद्धिमती। पश्चात् । छाया । खलु । पुरा । नरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षड्विंशः पाठः

वंशस्थवृत्तम्

जतौ तु वंशस्थमुदीरितं जरौ ।।१।।

× × × × ×

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभोजनम्
तृणानि शय्या रुचिरञ्च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ।।२।।

२६.१.१ **जतौ** = जगणतगणौ (जगण, तगण) **जरौ** = जगणरगणौ (जगण र रगण भएमा) **वंशस्थम्** = तदाख्यम् (वंशस्थ नाम गरेको छन्द) **उदीरितम्** = कथितम् (भनिएको छ अर्थात् जुन पद्यको चारै पाउमा क्रमैले जगण, तगण, जगण र रगण आउँछन् त्यसलाई वंशस्थ छन्द भनिन्छ) ।

२५.१.२ **व्याघ्रगजेन्द्रसेवितं** = शार्दूलगजराजविराजितम् (बाघ र हात्तीले भरिएको) **वनम्**= अरण्यम् (जङ्गल) **द्रुमालयम्** = वृक्षभवनम् (रूखको वासस्थान) **पक्वफलाम्बुभोजनम्**= परिपक्वफलसलिलखाद्यान्नम् (पाकेका फलफूल र पानीको भोजन) **तृणानि** = शष्पाणि (घाँस) **शय्या** = शयनस्थानम् (शयन स्थान) **परिधानवल्कलम्** = आच्छादनीयवृक्षत्वचम् (बोक्राको लुगा) **वरम्** = श्रेष्ठम् (बरु वेश हुन्छ) **किन्तु** (तर) **बन्धुमध्ये** = कुटुम्बमध्ये (दाजुभाइका बीचमा) **धनहीनजीवनम्** = द्रव्यरहितप्राणधारणम् (विना सम्पत्ति बाँच्नु) **न वरम्** = नोचितम् (उचित हुँदैन) ।

२५.१.३ **यः** = धनिकः (जुन धनी मानिस) **न ददाति** = दानं न करोति (दान गर्दैन) **न अश्नुते** = न भुङ्क्ते (खाँदैन) **तस्य** (त्यसको) **धनेन** = सम्पदा (सम्पत्तिले) **किम्** = किं भवति (के हुन्छ) **यः** = बलवान् (जो बलियो छ त्यसले) **रिपून्** = शत्रून् (शत्रूहरूलाई) **न बाधते**= न पीडयति (पीडा दिन सक्दैन भने) **तस्य** (त्यसको) **बलेन**= शक्त्या (बलले) **किम्** = किं भवति (के हुन्छ) **यः** = शास्त्रज्ञः (शास्त्र जान्ने मानिसले) **धर्मम्** = आचारादिकम् (धर्म) **न आचरेत्** = न पालयेत् (पालना गर्दैन भने) **तस्य** (त्यसको) **श्रुतेन** = शास्त्रज्ञानेन (शास्त्रको ज्ञानले) **किम्** = किं भवति (के हुन्छ) **यः** =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनेन किं यो न ददाति नाश्नुते
बलेन किं यस्य रिपून्न बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत्
किमात्मना यो न जितेन्द्रियो भवेत् ।।३।।

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ।।४।।

पुरुषः (जुन मानिस) **न जितेन्द्रियः**= न वशी (इन्द्रियलाई जित्न सक्दैन भने) **तस्य** (त्यसको) **आत्मना**= जन्मना (जन्मले) **किम्**= किं भवति (के हुन्छ अर्थात् केही पनि हुँदैन) ।

२५.१.४ **सुजीर्णम्** = सुपक्वम् (राम्रोसित पाकेको) **अन्नम्** = भक्ष्यान्नम् (खाने कुरा) **सुविचक्षणः** = कुशलः (सिपालु) **सुतः** = पुत्रः (छोरो) **सुशासिता** = सुशिक्षिता (राम्रोसित शिक्षा दिइएकी) **स्त्री** = पत्नी (पत्नी) **सुसेवितः** = सुष्ठु आराधितः (राम्रोसित अनुकूल बनाइएको) **नृपतिः** = भूपतिः (राजा) **सुचिन्त्य** = पूर्वापरं सम्यग् विचार्य (वर पर राम्रोसित विचार गरेर) **कृतम्** = सम्पादितम् (सम्पन्न गरिएको) **यत्** = कर्म (काम) **सुदीर्घकालेऽपि** = अतिचिरसमयेऽपि (धेरैपछिसम्म पनि) **विक्रियां न याति** = विकारं न प्राप्नोति (विग्रदैन) ।

२५.१.५ **तरवः** = वृक्षाः (रूखहरू) **फलोद्गमैः** = प्रसवोद्भवैः (फल लागेपछि) **नम्राः** = नमनशीलाः (नम्र) **भवन्ति** = जायन्ते (हुन्छन्) **घनाः** = मेघाः (मेघहरू) **नवाम्बुभिः**= नूतनजलैः (नयाँ अर्थात् वर्षाको पानीले) **दूरविलम्बिनः** = भूमिपर्यन्तं लम्बायमानाः (भुईसम्म लत्रने) **भवन्ति** = जायन्ते (हुन्छन् अर्थात् वर्षा ऋतुमा बादलहरू आकाशबाट पानीको बोझले गर्दा तल नुहेका हुन्छन्) **सत्पुरुषाः** = सज्जनाः (सज्जन मानिसहरू) **समृद्धिभिः** = सम्पत्तिभिः (सम्पत्तिले) **अनुद्धताः** = विनीताः (नम्र) **भवन्ति**= जायन्ते (हुन्छन्) **एषः**= अयम् (यो) **परोपकारिणाम्** = परहिताचरणकुशलानाम् (अर्काको हित गर्ने काममा संलग्न व्यक्तिहरूको) **स्वभाव एव** = प्रकृतिरेव (स्वभाव नै हो) ।

२६.२ विग्रहः - **व्याघ्रगजेन्द्रसेवितम्** - व्याघ्राश्च गजेन्द्राश्च (द्वन्द्व.) तैः सेवितम् (तृ.त.) । **पक्वफलाम्बुभोजनम्** - पक्वानि च तानि फलानि पक्वफलानि (कर्मधा.) पक्वफलानि च अम्बूनि च (द्वन्द्व.) पक्वफलाम्बूनां भोजनम् (ष.त.) । **द्रुमालयम्** -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ।।५।।

द्रुमस्य आलय (ष.त.) तम् । **बन्धुमध्ये** - बन्धूनां मध्ये (ष.त.) । **धनहीनजीवनम्** - धनेन हीनम् (तृ.त.) तच्च तद् जीवनम् (कर्मधा.) । **दूरविलम्बिनः** - दूरं विलम्बन्ते इति (उपप.) । **अनुद्धताः** - न उद्धताः (नञ् त.) । **सत्पुरुषाः** - सन्तश्च ते पुरुषा (कर्मधा.)। **धाराधरः** - धारायाः धरः (ष.त.) । **आत्महेतोः** - आत्मनः हेतुः (ष.त.) तस्य । **जितेन्द्रियः** - जितानि इन्द्रियाणि येन (बहु.) सः । **परोपकाराय** - परेषां उपकारः (ष.त.) तस्मै । **नवाम्बुभिः** - नवानि च तानि अम्बूनि (कर्मधा.) तैः ।

२६.३ **प्रकृतिप्रत्ययविच्छेदः - सेवितम्** - सेव् + क्त । **पक्वम्** - पच् + क्त । **भोजनम्** - भुज् + ल्युट् > अन । **जीवनम्** - जीव + ल्युट् > अन । **हीनः** - हा + क्त। **परोपकारी** - परोपकारः + इनि । **धरः** - धृ + अच् । **उद्धतः** - उत् + हन् + क्त । **विलम्बिनः** - वि-लवि + णिनि ।

२६.४ **कोषः - तरुः** - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः, इत्यमरः । **अम्बु**- आपःस्त्री भूम्नि वार्वारि सलिलं कमलं जलम् । पयः कीलालममृतं जीवनं भुवनं वनम् । कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् । अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्। मेघपुष्पं घनरसः, इत्यमरः । **घनः** - घनजीमूतमुदिरजलमुग्धुमयोनयः, इत्यमरः । **वनम्**- अटव्यरण्यं विपिनं गहनं काननं वनम्, इत्यमरः । **वल्कलम्** - त्वक् स्त्री वल्कं वल्कलम-स्त्रियाम्, इत्यमरः । **रिपुः** - रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः । द्विड्विपक्षाहितामित्रदस्यु-शात्रवशत्रवः । अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः, इत्यमरः । **सुतः** - आत्मजस्तनयः सूनुः सुतः पुत्रः, इत्यमरः । **स्त्री**- स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः । प्रतीपदर्शिनी वामा वनिता महिला तथा । विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना । प्रमदा मानिनी कान्ता ललना च नितम्बिनी । सुन्दरी रमणी रामा कोपना सैव भामिनी । वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी, इत्यमरः । **धाराधरः** - अभ्रं मेघो वारिवाहः स्तनयित्नुर्वलाहकः । धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत्, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ अधोलिखितप्रश्नानामुत्तराणि लिखत ।

१. कीदृशं जीवनं न वरम् ?

२. परोपकारिणां स्वभावः कीदृशः ?

३. सतां विभूतयः कस्मै जायन्ते ?

४. कानि कार्याणि दीर्घकालेऽपि विक्रियां न यान्ति ?

५. के समृद्धिभिरनुद्धता भवन्ति ?

३ इमानि पद्यानि कस्मिन् छन्दसि रचितानि सन्ति ? सलक्षणं प्रतिपादयत।

४ वंशस्थछन्दसो लक्षणं सान्वयं पर्यायशब्दान् लिखत ।

५ निर्धारितपद्यानां सान्वयं पर्यायशब्दान् लिखत ।

६ सविग्रहं समासनामनि लिखत ।

व्याघ्रगजेन्द्रसेवितम् । पक्वफलाम्बुभोजनम् । द्रुमालयम् । बन्धुमध्ये । धनहीनजीवनम् । दूरविलम्बिनः । अनुद्धताः । सत्पुरुषाः । धाराधरः । आत्महेतोः। जितेन्द्रियः परोपकाराय । नवाम्बुभिः ।

७ निर्धारितपद्यानां सरलार्थं लिखत ।

८ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

सेवितम् । पक्वम् । भोजनम् । जीवनम् । हीनः । परोपकारी । धरः । उद्धतः । विलम्बिनः ।

९ सन्धिं विधाय सूत्राणि लिखत ।

द्रुम+आलयम् । नम्रास्+तरवः । स्वभावस्+एष । न+अश्नुते । नव+अम्बु। एव+एष। यस्+च । जित+इन्द्रियः । पर+उपकारः । धाराधरस्+वर्षति । विलम्बिनस्+घनाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तविंशः पाठः

वसन्ततिलकवृत्तम्

ज्ञेयं वसन्ततिलकं तभजा जगौ गः ।।१।।

× × × × × ×

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्संगतिः कथय किं न करोति पुसाम् ।।२।।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।।३।।

२७.१.१ तभजाः = तगणभगणजगणाः (तगण, भगण र जगणहरू) **जगौ**= एको जगणः, एको गुरुवर्णश्च (जगण र गुरुवर्ण) **गः** = गुरुवर्ण (गुरुवर्ण हुन्छन् भने) **वसन्ततिलकम्** = तदाख्यं वृत्तम् (वसन्ततिलका छन्द हुन्छ भनेर) **ज्ञेयम्** = वेद्यम् (जान्नु पर्दछ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले तगण, भगण, जगण र जगण अनि दुईवटा गुरुवर्ण हुन्छन् भने त्यस छन्दलाई वसन्ततिलका छन्द भनिन्छ) ।

२७.१.२ धियः = बुद्धेः (बुद्धिको) **जाड्यम्** = मन्दताम् (मन्दतालाई) **हरति** = नाशयति (नाश गर्छ) **वाचि** = वचने (बोलीमा) **सत्यम्** = तथ्यम् (सत्यतालाई) **सिञ्चति**= प्लावयति (सञ्चार गराउँछ) **मानोन्नतिम्** = आदरवृद्धिम् (आदर बढाउने काम) **दिशति**= करोति (गर्छ) **पापम्**= किल्विषम् (पाप अर्थात् खराब प्रवृत्तिलाई) अपाकरोति = दूरीकरोति (हटाउँछ) **चेतः** = चित्तम् (चित्तलाई) **प्रसादयति** = निर्मलयति (निर्मल तुल्याउँछ) **दिक्षु** = दिशासु (दिशाहरूमा) **कीर्तिम्** = यशः (कीर्तिलाई) **तनोति** = विस्तारयति (फैलाउँछ) **कथय** = बद (भन) **सत्सङ्गतिः** = सज्जनसमागमः (सज्जनका साथ हुने सङ्गतले) **पुंसाम्** = नराणाम् (मानिसको) **किम्** = कार्यम् (कुन काम) **न करोति** = न विदधाति (गर्दैन अर्थात् सत्सङ्गतिले मानिसको बुद्धिलाई तिखारिदिन्छ, सत्य बोल्न सिकाउँछ, प्रतिष्ठा बढाउँछ, पाप कर्मबाट निवृत्त तुल्याउँछ र कीर्तिलाई फैलाइदिन्छ)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतञ्च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।४।।

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।५।।

२७.१.३ खलु = निश्चयेन (निश्चय नै) **नीचैः** = अधमैः पुरुषैः (तल्ला खालका मानिसहरू) **विघ्नभयेन** = प्रत्यूहभीत्या (विघ्न पर्छ भनेर) **न प्रारभ्यते** = कार्यस्य प्रारम्भमेव न कुर्वन्ति (कामको थालनी नै गर्दैनन्) **मध्याः** = मध्यमस्थितिका जनाः (मध्यम किसिमका मानिसहरू) **प्रारभ्य** = कार्यारम्भं कृत्वा (काम थालेर) **विघ्नविहताः**= प्रत्यूहपीडिताः (विघ्नद्वारा पीडित भएर) **विरमन्ति** = प्रारब्धं कार्यं त्यजन्ति (शुरु गरेको काम छोड्दछन्) **उत्तमजनाः** = श्रेष्ठगुणाः पुरुषाः (उत्तम खालका मानिसहरू) **विघ्नैः** = प्रत्यूहैः (विघ्नद्वारा) **पुनः पुनः** = भूयो भूयः (बारम्बार) **प्रतिहन्यमाना अपि** = पीडिता अपि (पीडित भएर पनि) **प्रारब्धम्** = उपक्रान्तं कर्म (थालिएको काम) **न परित्यजन्ति**= न त्यागं कुर्वन्ति (त्याग गर्दैनन् अर्थात् जतिसुकै विघ्न परे पनि उत्तम मानिसहरू आफूले थालेको कामलाई पूरा गरेरै छाड्छन्) ।

२७.१.४ सन्मित्रम् = सुसखा (असल मित्रले) **पापात्** = दुराचारात् (खराब कार्यबाट) **निवारयति** = निवर्तयति (हटाउँछ) **हिताय** = हितकर्मणे (हित कर्मका निमित्त) **योजयते**= प्रवर्तयति (लगाउँछ) **गुह्यम्** = गोपनीयम् (लुकाउनु पर्ने कुरालाई) **निगूहति** = आच्छादयति (ढाकिदिन्छ) **गुणान्** = सद्गुणान् (असल गुणहरूलाई) **प्रकटीकरोति** = प्रख्यापयति (प्रचार गर्दछ) **आपद्गतम्** = अतिसङ्कटस्थमपि (सङ्कट परेको वेलामा पनि) **न जहाति** = न त्यजति (छोड्दैन) **काले** = आपत्समये (आपत्ति परेको वेलामा) **ददाति** = धनादिकं यच्छति (धन आदि दिन्छ) **इदम्** = एतत् (यसलाई) **सन्मित्रलक्षणम्** = निष्कपटसुहृदः चिह्नम् (कपट नभएका मित्रको चिह्न हो भनेर) **सन्तः**= सज्जनाः (सज्जनहरू) **प्रवदन्ति**= कथयन्ति (भन्दछन्) ।

२७.१.५ नीतिनिपुणाः = नयशास्त्रविशारदाः (नीति जान्ने मानिसहरू) **निन्दन्तु**= दुष्यन्तु (दोष दिउन्) **यदि वा** = अथवा (अथवा) **स्तुवन्तु** = स्तुतिं कुर्वन्तु (प्रशंसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक् पादयोः पतति खादति पृष्टमासं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ।।६।।

गरुन्) **लक्ष्मीः** = सम्पत्तिः (सम्पत्ति) **समाविशतु** = आगच्छतु (आओस्) **वा** = अथवा (अथवा) **यथेच्छम्** = स्वेच्छानुसारम् (इच्छाअनुसार) **गच्छतु** = दूरे भवतु (जाओस्) **मरणम्** = मृत्युः (मृत्यु) **अद्यैव** = अस्मिन्नेव समये (आजै) **अस्तु** = भवतु (हओस्) **वा** = अथवा (अथवा) **युगान्तरे** = अन्यस्मिन् युगे (अर्कै युगमा) **अस्तु** (हओस्) **परम्**= किन्तु (तर) **धीराः** = धैर्यशालिनः पुरुषाः (आफ्नो अडानमा रहने मानिसहरू) **न्याय्यात्** = न्यायोचितात् (न्यायलाई अङ्गाल्ने) **पथः** = मार्गात् (बाटोबाट) **पदम्** = एकचरणमपि (एक पाइलो पनि) **न प्रविचलन्ति** = पराङ्मुखा न भवन्तीत्यर्थः । (विचलित हुँदैनन् अर्थात् न्यायको बाटोलाई कस्तै अवस्थामा पनि उनीहरूले त्याग गर्दैनन्)

२७.१.६ **खलो मशकश्च** (मूर्ख र लामखुट्टे) **प्राक्** = पूर्वम् (पहिले) **पादयोः**= चरणयोः (गोडामा) **पतति** = निपतति (पर्दछ) **पृष्ठमांसं खादति** = पृष्ठे दशति, परोक्षे निन्दां करोति (पिठ्यूँमा टोक्छ/पछाडि निन्दा गर्छ) **कर्णे** = कर्णप्रदेशे (कानमा) **किमपि**= अव्यक्तम् (नबुझिने खालको) **कलम्** = मधुरम् (मीठो) **विचित्रम्** = नानाप्रकारम् (विभिन्न किसिमको) **शनैः** = मन्दं (विस्तारै) **रौति** = शब्दं करोति/चाटु वचनं कथयति (आवाज दिन्छ/चाकरीको बोली बोल्छ) **छिद्रम्** = रन्ध्रम् (प्वाल/समय) **निरूप्य** = अवलोक्य (हेरेर) **अशङ्कः** = शङकारहितः (कुनै शङ्का नमानीकन) **सहसा** = द्राक् (हतपत्त) **प्रविशति** = प्रवेशं करोति (पसिहाल्छ) **मशकः** = कीटविशेषः (लामखुट्टेले) **खलस्य** = दुर्जनस्य (दुष्टको) **सर्वम्** = निखिलम् (सबै) **चरितम्** = आचरणम् (चरित्र) **करोति** = विदधाति (गर्दछ)।

२७.२ **विग्रहः - विघ्नभयेन** - विघ्नस्य भयम् (ष.त.) तेन । **विघ्नविहताः** - विघ्नैः विहताः (तृ.त.) । **उत्तमजनाः** - उत्तमाश्च ते जनाः (कर्मधा.) । **आपद्गतम्** - आपदि गतम् (स.त.)। **सन्मित्रलक्षणम्** - सच्च तत् मित्रम् सन्मित्रम् (कर्मधा.) तस्य लक्षणम् (ष.त.) । **नीतिनिपुणाः** - नीतौ निपुणाः (स.त.)। **यथेष्टम्** - इष्टम् अनतिक्रम्य (अव्य.)। **सत्सङ्गतिः** - सतां सङ्गतिः (ष.त.) ।

२७.३ **प्रकृतिप्रत्ययविच्छेदः - गुह्यम्** - गुह् + क्यप्, **मरणम्** - मृ + ल्युट् > अन, **न्याय्यम्** - न्याय + यत् । **निरूप्य** - नि - रूप् + क्त्वा > ल्यप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१. उपरितनपद्यानि सस्वरं पठत ।

२. अधोलिखितप्रश्नानामुत्तराणि लिखत ।

  १. सत्सङ्गतेः कार्याणि कानि ?

  २. प्रारब्धं के न परित्यजन्ति ?

  ३. सन्मित्रस्य लक्षणानि कानि ?

  ४. धीराः किं न कुर्वन्ति ?

  ५. मशकस्य खलस्य च चरितानि कानि ?

३. इमानि पद्यानि कस्य वृत्तस्योदाहरणानि, किञ्च तस्य लक्षणम् ? स्फुटं प्रकाशयत।

४. निर्धारितपाठान्तर्गतपदानां सान्वयं पर्यायशब्दान् लिखत ।

५. वसन्ततिलकाया लक्षणं विलिख्योदाहरणे संगमयत ।

६. सविग्रहं समासनामानि लिखत ।

विघ्नभयेन । विघ्नविहताः । उत्तमजनाः । आपद्गतम् । सन्मित्रलक्षणम् । नीतिनिपुणाः। यथेष्टम् । सत्सङ्गतिः ।

७. सन्धिं कुरुत ।

धियस्+हरति । गतम्+च । निपुणास्+यदि । यथा+इष्टम् । प्रविशति+अशङ्कः। पापात्+निवारयति ।

८. निर्धारितपद्यानां सरलार्थं लिखत ।

९. सत्सङ्गतेः महत्त्वं दशभिर्वाक्यैर्वर्णयत ।

१०. निम्नलिखितपदानां वर्गं निर्धारयत–

पापात् । निवारयति । हिताय । योजयते । आपद्गतम् । जहाति । ददाति । काले । सन्तः । निन्दन्तु । यदि । वा । यथेष्टम् । लक्ष्मीः । गच्छतु । मरणम् । पदम्। छिद्रम् । मशकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टत्रिंशः पाठः

मालिनीवृत्तम्

ननमयययुतेयं मालिनी भोगिलोकैः ।।१।।

× × × × × ×

स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ ।
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ।।२।।

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ।।३।।

२८.१.१ **ननमयययुता** = नगणनगणमगणयगणयगणैः (नगण, नगण, मगण, यगण र यगणले) **युता** = समन्विता (युक्त भएको) **भोगिलोकैः** – अष्टभिस्तदनु सप्तभिरक्षरैर्यतियुता (आठौं त्यसपछि सातौं अक्षरमा विश्राम हुने) **इयम्**– एषा (यो) **मालिनी** (मालिनी छन्द हुन्छ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले नगण, नगण, मगण, यगण र यगण आउँछन्, आठौं र त्यसपछि सातौं अक्षरमा विश्राम हुन्छ भने त्यसलाई मालिनी छन्द भन्दछन्)।

२८.१.२ **सः** = प्रसिद्धः (ती) **गगनविहारी** = आकाशचारी (आकाशमा हिड्ने) **कल्मषध्वंसकारी** = अन्धकारनाशकः (अन्धकारलाई नाश गर्ने) **दशशतकारधारी** = सहस्रकिरणयुतः(हजारौं किरण भएका) **ज्योतिषाम्**= नक्षत्राणाम् (नक्षत्रहरूको) **मध्यचारी**= मध्ये गमनशीलः (माझमा हिड्ने) **असौ** = एषः (यी) **विधुः अपि** = चन्द्रः अपि (चन्द्रमा पनि) **विधियोगात्** = दैववशात् (दैवले गर्दा) **राहुणा** = छायाख्यग्रहविशेषेण (राहुद्वारा) **ग्रस्यते** = आच्छाद्यते (ग्रसित हुन पुग्छन् अर्थात् ढाकिन्छन्) **ललाटे** = भाले (निधारमा) **लिखितम्** = अङ्कितम् (लेखिएको कुरा) **प्रोज्झितुम्** = अन्यथा कर्तुम् (बदल्न) **कः समर्थः** = न कोऽपि शक्तः (कोही पनि सक्दैन) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीतलं याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ।।४।।

शशिनि खलु कलङ्कः कण्टकः पद्मनाले
युवतिकुचनिपातः पक्वता केशजाले ।

२८.१.३ **नरपतिहितकर्ता** = भूपतिकल्याणकारी (राजाको हित गर्ने व्यक्ति) **लोके** = संसारे (संसारमा) **द्वेष्यताम्** = ईर्ष्याभावम् (ईर्ष्याको पात्र) **याति** = प्राप्नोति (बन्दछ) **जनपदहितकर्ता** = जनानां कल्याणकारी (जनताको कल्याण गर्ने व्यक्ति) **पार्थिवेन्द्रैः** = नृपैः (राजाहरूले) **त्यज्यते** = परित्यज्यते (त्यागिदिन्छन्) **इति** = इत्थम् (यस्तो) **महति**= विशाले (ठूलो) **समाने** = तुल्ये (बराबर अवस्थाका) विरोधे (विरोध) **वर्तमाने** = स्थिते (भएको हुँदा) **नृपतिजनपदानाम्** = नृपाणां प्रजानाञ्च (राजा र प्रजा दुवैको) **कार्यकर्ता**= कार्यकारी (काम गर्ने व्यक्ति) **दुर्लभः** = दुःखेनैव प्राप्तुं शक्यः (बढो मुस्किलले मात्र फेला पर्छ) ।

२८.१.४ **यदि** = चेत् (बरू) **पश्चिमे** = वारुण्याम् (पश्चिमी) **दिग्विभागे** = दिशायाम् (दिशामा) **भानुः** = सूर्यः (सूर्य) **उदयति** = उद्गच्छति (उदाउलान्) **यदि** = चेत् (बरू) **मेरुः** = सुमेरुपर्वतः (सुमेरु पहाड) **प्रचलति** = गच्छति (हिड्ला) **वह्निः** = अग्निः (आगो) **शीतलम्** = शीतम् (चिसो) **याति** = प्राप्नोति (होला) **पर्वताग्रे** = अद्रिपृष्ठे (पहाडको टुप्पामा) **शिलायाम्** = पाषाणे (ढुङ्गामा) **पङ्कजम्** = कमलम् (कमल) **विकसति** = फुल्लति (बरू फुल्ला) **पुनः** = भूयः (तर) **सज्जनानाम्** = महताम् (सज्जनहरूको) **भाषितम्** = वाक्यम् (बोली) **पुनरुक्तम्** = द्विरावृत्तम् (पुनरावृत्ति) **न भवति** = न जायते (हुँदैन अर्थात् सज्जनहरूले एक पटक बोलेपछि फेरि त्यसैलाई दोहोऱ्याइरहँदैनन्) ।

२८.१.५ **खलु** = निश्चयेन (निश्चय नै) **शशिनि** = चन्द्रमसि (चन्द्रमामा) **कलङ्कः**= लाञ्छनम् (चिह्न हुनु) **पद्मनाले** = कमलदण्डे (कमलको डाँठमा) **कण्टकम्** (काँडा हुनु) **युवतिकुचनिपातः** = स्त्रीणां स्तनपातः (स्त्री जातिहरूको स्तन क्रमशः झुक्दै जाने हुनु) **जलधिजलम्** = समुद्रजलम् (समुद्रको पानी) **अपेयम्** = पातुमयोग्यम् (पिउनु हुने नहुनु) **पण्डिते** = विदुषि (विद्वान्हरूमा) **निर्धनत्वम्** = धनाभावः (धनको अभाव हुनु) **वयसि** = वृद्धावस्थायाम् (बूढो अवस्थामा) **धनविवेकः** = धनविचारः (धन कमाउने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलधिजलमपेयं पण्डिते निर्धनत्वं
वयसि धनविवेको निर्विवेको विधाता ।।५।।

विचार हुनुमा) **विधाता** = ब्रह्मा (ब्रह्मा) **निर्विवेकः** = विवेकरहितः (अविवेकी हुन्) ।

२८.२ विग्रहः - गगनविहारी - गगने विहरति इति (उप त.) । **कल्मषध्वंसकारी**- कल्मषस्य ध्वंसः (ष.त.) तम् करोति (उप त.) । **दशशतकरधारी** - दशशतञ्च ते कराः (कर्मधा.) तान् धारयतीति (उप त.) । **मध्यचारी** - मध्ये चरति (उप त.) । **विधियोगात्**- विधेः योगः तस्मात् (ष.त.) । **नरपतिहितकर्ता** - नरपतीनां हितम् (ष.त.) तस्य कर्ता (ष.त.) । **जनपदहितकर्ता** - जनपदानां हितम् (ष.त.) तस्य कर्ता (ष.त.) । **पार्थिवेन्द्रैः**- पार्थिवानां इन्द्राः (ष.त.) तैः । **नृपतिजनपदानाम्** - नृपतयश्च जनपदानि च (द्वन्द्व.) तेषाम् । **युवतिकुचनिपातः** - युवतीनां कुचौ (ष.त.) तयोः निपातः (ष.त.) । **पद्मनाले**- पद्मस्य नालः(ष.त.) तस्मिन् । **केशजाले**- केशानां जालं तस्मिन् (ष.त.) । **जलनिधिजलम्**- जलानां निधिः (ष.त.) तस्य जलम् (ष.त.) । **अपेयम्** - न पेयम् अपेयम् (नञ् त.) । **निर्विवेकः** - निर्गतः विवेकः यस्मात् (बहु.) सः ।

२८.३ प्रकृतिप्रत्ययविच्छेदः - द्वेष्यताम् - द्वेष्य + तल् । **लिखितम्** - लिख्+ क्त । **पार्थिवः** - पृथु + अण्। **वर्तमानः** - वृत् + लट् > शानच् । **शशी** - शश + इनि। **पक्वता** - पक्व + तल् । **उक्तम्** - ब्रू (वच्) + क्त । **निर्धनत्वम्** - निर्धन + त्व ।

२८.४ कोषः - गगनम् - नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खम्, इत्यमरः । **कल्मषम्** - अस्त्री पङ्कं पुमान् पाप्मा पापं किल्विषकल्मषम्, इत्यमरः । **ज्योतिः**- ज्योतिरग्नौ दिवाकरे । पुमान् नपुंसके दृष्टौ स्यान्नक्षत्रप्रकाशयोः, इति मेदिनी । **विधुः** - विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः, इत्यमरः । **विधिः** - दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः, इत्यमरः । **ललाटम्**, ललाटमलिकं गोधिः, इत्यमरः । **भानुः** - भानुर्हंसः सहस्रांशुस्तपनः सविता रविः, इत्यमरः । **वह्निः** - अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः, इत्यमरः । **पद्मम्**- वा पुंसि पद्मं नलिनमरविन्दमथोत्पलम्, इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. किं प्रोज्भितुं न शक्यते ?

२. को द्वेष्यतां याति ?

३. कीदृशः कार्यकर्ता दुर्लभः ?

४. केषां भाषितं पुनरुक्तं न भवति ?

५. विधातुर्विवेकहीनत्वे कारणं किम् ?

३ उक्तपद्यानि कस्मिन् छन्दसि रचितानि सन्ति ? किञ्च तस्य लक्षणम् ? प्रकाशयत।

४ सविग्रहं समसनामानि लिखत ।

गगनविहारी । कल्मषध्वंसकारी । दशशतकरधारी । मध्यचारी । विधियोगात्। नरपतिहितकर्ता । जनपदहितकर्ता । पार्थिवेन्द्रैः । नृपतिजनपदानाम् । युवतिकुचनिपातः। पद्मनाले । केशजाले । जलनिधिजलम् । अपेयम् । निर्विवेकः ।

५ पाठान्तर्गतपद्यानां सान्वयं पर्यायशब्दान् लिखत ।

६ सन्धिं कुरुत ।

राहुणा+असौ । योगात्+ग्रस्यते । पार्थिव+इन्द्रैः । पर्वत+अग्रे । निर्विवेकस्+विधाता । त्वम्+च । समस्+इह ।

७ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

८ मालिनीछन्दसो लक्षणं सोदाहरणं प्रदर्शयत ।

९ वाच्यपरिवर्तनं कुरुत ।

१. जनपदहितकर्ता पार्थिवेन्द्रैस्त्यज्यते ।

२. राहुणा विधुरपि ग्रस्यते ।

३. ललाटे लिखितं प्रोज्भितुं न शक्यते ।

४. नरपतिहितकर्तारं जना द्विषन्ति ।

५. इमानि कार्याणि सम्यक् कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊनत्रिंशः पाठः

मन्दाक्रान्तावृत्तम्

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।।१।।

× × × × × × ×

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ।।२।।

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।

२९.१.१ **अम्बुधिरसनगैः** = चतुर्थैः षड्भिः तदनु अष्टभिरक्षरैर्यतियुता (चौथो त्यसपछि छैठौं अनि सातौं अक्षरमा विश्राम हुने) **मः** = मगणः (मगण) **भनौ** = भगणनगणौ (भगण र नगण) **तौ** = तगणद्वयम् (दुईवटा तगण र) **गुरुयुग्मम्** = गुरुद्वयम् (दुई गुरुवर्ण भएकोलाई) **मन्दाक्रान्ता** (मन्दाक्रान्ता छन्द भनिन्छ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले मगण, भगण, नगण, दुईवटा तगण र दुईवटा गुरुवर्ण हुन्छन्, अनि चौथो, छैठौं र सातौं अक्षरमा विश्राम हुन्छ भने त्यसलाई मन्दाक्रान्ता छन्द भन्दछन्) ।

२९.१.२ **पुनरपि** = भूयोऽपि (बारम्बार) **घृष्टं घृष्टम्** (घोटिएको) **चन्दनम्** = मलयजम् (चन्दन) **चारुगन्धम्** = शोभनगन्धयुक्तं भवति (सुगन्ध दिने हुन्छ अर्थात् चन्दन जति घोट्यो त्यति सुगन्ध दिन्छ) **इक्षुदण्डम्** = इक्षुयष्टिः (उखुको लाँक्रो) **छिन्नं छिन्नम्** = भूयो भूयश्छेदितम् (बारम्बार काट्ता पनि) **स्वादु** = स्वादयुक्तं भवति (स्वादिलो हुन्छ अर्थात् उखुको लाँक्रो जति काट्यो उति स्वादिलो हुन्छ) **दग्धं दग्धम्** = पुनः पुनरपि अग्नौ प्रतप्तम् (बारम्बार आगामा तताउँदा पनि) **काञ्चनम्** = सुवर्णम् (सुन) **कान्तवर्णम्**= सुन्दरं भवति (राम्रो हुन्छ अर्थात् सुन जति आगामा तातायो त्यति नै टल्कने हुन्छ) **अतः** (यसैले) **उत्तमानाम्** = महताम् (उत्कृष्ट मानिसहरूको) **प्राणान्तेऽपि** = प्राणात्ययेऽपि (प्राण गएतापनि) **प्रकृतिविकृतिः** = स्वभावविकारः (स्वभावमा विकृति) **न जायते** = नोत्पद्यते (हुँदैन) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धृष्टः पार्श्वे वसति च सदा दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।।३।।

धूमज्ज्योतिसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।

२९.१.३ मौनात् = तूष्णीम्भावात् (चूप लाग्यो भने) **मूकः** = निर्वचः (लाटो ठानिन्छ) **प्रवचनपटुः** = भाषणनिपुणः (बोलक्कड भयो भने) **वातुलः** = वातरोगग्रस्तः (बताहा मानिन्छ) **वा**= अथवा (अथवा) **जल्पकः**= वाचालः (बक्बके ठानिन्छ) **यदि**= चेत् (यदि) **सदा** = सर्वदा (सँधै) **पार्श्वे** = समीपे (नजीकमा) **वसति** = तिष्ठति (बस्छ भने) **धृष्टः** = निर्लज्जः (लाज नभएको ठानिन्छ) **यदि** = चेत् (यदि) **दूरतः** = दूरे वसति (टाढा बस्छ भने) **अप्रगल्भः** = प्रतिभाहीनः (केही नजान्ने ठानिन्छ) **क्षान्त्या** = क्षमया (सह्यो भने) **भीरुः** = भयान्वितः (डरपोक मानिन्छ) **यदि** = चेत् (यदि) **न सहते** = न मर्षयति (सहँदैन भने) **प्रायशः** = बहुधा (धेरैजसो) **नाभिजातः** = अकुलीनः (कुजात मानिन्छ) **अतः** (यसैले) **परमगहनः** = अतिगूढः (अत्यन्त गहिरो) **सेवाधर्मः**= परिचर्यारूपं कर्म (सेवाको काम) **योगिनाम्**= त्रैकालिकज्ञानशालिनां महात्मनामपि (तीनै कालको कुरा जान्ने योगीका निमित्त पनि) **अगम्यः**= अज्ञेयः (जान्न नसकिने खालको छ)।

२९.१.४ धूमज्योतिसलिलमरुताम् = धूम्रतेजोजलवायूनाम् (धूँवा, तेज, पानी र वायुको) **सन्निपातः**= समूहः (समूहको रूपमा रहेको) **मेघः**= बलाहकः(बादल) **क्व**= कुत्र (कहाँ) **पटुकरणैः** = निपुणेन्द्रियैः (कामका लागि सिपालु इन्द्रिय भएका) **प्राणिभिः**= जनैः (प्राणीहरूबाट) **प्रापणीयाः** = प्रापयितुं शक्याः (पुऱ्याउन सकिने) **सन्देशार्थाः** = सन्देशविषयाः (समाचारका विषयहरू) **क्व** = कुत्र (कहाँ) **इति** = एतत् (यो कुरा) **औत्सुक्यात्** = उत्कण्ठावशात् (उत्कण्ठाले गर्दा) **अपरिगणयन्** = अविचारयन् (विचारै नगरी) **गुह्यकः** = यक्षः (यक्षले) **तम्** = मेघम् (मेघलाई) **ययाचे** = प्रार्थितवान् (प्रार्थना गऱ्यो) **हि** = यतः (किनभने) **कामार्ताः** = मदनपीडिताः (कामवासनाले ग्रस्त भएका प्राणीहरू) **चेतनाचेतनेषु** = जडचैतन्ययुक्तेषु (चेतना भएको र नभएको विषयमा) **प्रकृतिकृपणाः** = स्वभावेनैव दीना भवन्ति (स्वभावले नै दीनता व्यक्त गर्ने हुन्छन्) ।

२९.१.५ यत्र = यस्मिन् (जुन) **क्वचिदपि** = कस्मिंश्चिद् (कुनै) **गृहे** = भवने (घरमा) **अनेके**= वहवो जनाः (धेरै मानिसहरू) **तिष्ठन्ति**= निवसन्ति (बस्दछन्) **अथ**= अनन्तरम् (पछि गएर) **एकः** = एकाकी (एउटा) **तिष्ठति** = निवसति (बसिरहेको हुन्छ) **यत्र** = यस्मिन् गृहे (जुन घरमा) **एकः** = एकाकी (एउटा छ) **तदनु** = पश्चात् (पछि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।४।।
यत्रानेके क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थं नेयौ रजनिदिवसौ लोलयन् द्वाविवाक्षौ
कालः कल्यो भुवनफलके क्रीडति प्राणिशारैः ।।५।।

गएर) **तत्र** = तस्मिन् गृहे (त्यस घरमा) **बहवः** = अनेकाः जनाः सन्ति (धेरै मानिस भइरहेका हुन्छन्) **अन्ते च** = पर्यन्ते च (फेरि पछि) **एकोऽपि न** = एकाकी अपि नभवति (एक जना पनि नभएको हुन्छ) **इत्थम्** = अनया रीत्या (यसरी) **द्वौ** = उभौ (दुईवटा) **अक्षौ इव** = गुटिके इव (गोटी झैं) **नेयौ** = नेतव्यौ (बिताइने) **रजनीदिवसौ**= रात्रिदविसौ (रात र दिनलाई) **लोलयन्** = सञ्चालयन् (सञ्चालन गरिरहेको) **कल्यः** = निरामयः (रोग मृत्यु आदिबाट कहिल्यै ग्रस्त नहुने) **कालः** = कालपुरुषः (काल पुरुष) **भुवनफलके** = भुवनाङ्गणे (भुवनरूपी फल्याक(बोर्ड)मा) **प्राणिशारैः** = प्राणिगुटिकाभिः (प्राणीरूपी गोटीहरूले) **क्रीडति** =खेलति (खेल्दछ) ।

२९.२ विग्रहः - **चारुगन्धम्** - चारु च तद् गन्धम् (कर्मधा.) । **इक्षुदण्डम्** - इक्षोः दण्डः (ष.त.) तम् । **कान्तवर्णम्** - कान्तः वर्णः यस्य तत् (बहु.) । **प्राणान्ते** - प्राणानाम् अन्तः (ष.त.) तस्मिन् । **प्रकृतिविकृति**- प्रकृतेः विकृतिः (ष.त.) । **प्रवचनपटुः**- प्रवचने पटुः (स.त.) । **अप्रगल्भः** - न प्रगल्भः (नञ् त.) । **सेवाधर्मः** - सेवा एव धर्मः (रूप. त.) । **परमगहनः** - परमश्चासौ गहनः (कर्मधा.) । **अगम्यः** - न गम्यः (नञ् स.) । **धूमज्योतिसलिलमरुताम्** - धूमश्च ज्योतिश्च सलिलं च मरुच्च (द्वन्द्व.) तेषाम् । **पटुकरणैः** - पुटूनि च तानि करणानि (कर्मधा.) तैः । **सन्देशार्थाः** - सन्देशस्य अर्थाः (ष.त.) । **कामार्ताः** - कामेन आर्ताः (तृ.त.)। **चेतनाचेतनेषु** - चेतनाश्च अचेतनाश्च (द्वन्द्व) तेषु । **प्रकृतिकृपणाः** - प्रकृत्या कृपणाः (तृ.त.) । **रजनिदिवसौ** - रजनिश्च दिवसश्च तौ (द्व.) । **भुवनफलके** - भुवनमेव फलकं तस्मिन् (रूपक.) **प्रणिन एव शाराः**, **तैः** (रूपक.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. प्रकृतिविकृतिः केषां न जायते, कश्चात्र दृष्टान्तः ?

२. सेवाधर्मः कीदृशः ?

३. मेघः केषां सन्निपातो विद्यते ?

४. के प्रकृतिकृपणाः भवन्ति ?

५. कामार्तानां का दशा जायते ?

३ इमानि पद्यानि कस्य वृत्तस्योदाहरणानि ? किञ्च तस्य लक्षणम् ? प्रकाशयत।

४ सान्वयं पर्यायशब्दान् लिखत ।

५ सविग्रहं समासनामानि लिखत ।

चारुगन्धम्। इक्षुदण्डम् । कान्तवर्णम् । प्राणान्ते । प्रकृतिविकृतिः । प्रवचनपटुः। अप्रगल्भः । सेवाधर्मः । परमगहनः । अगम्यः । धूमज्योतिसलिलमरुताम् । पटुकरणैः। सन्देशार्थाः । कामार्ताः । चेतनाचेतनेषु । प्रकृतिकृपणाः । रजनीदिवसौ । भुवनफलके। प्राणिशारैः ।

६ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

७ मन्दाक्रान्ताछन्दसो लक्षणं विलिख्योदाहरणे संगमयत ।

८ सन्धिं विधाय सूत्राणि च लिखत ।

च+एव । प्राणान्ते+अपि । न+उत्तमाः । अपि+अगम्यः । प्रायशस्+नाभिजातः। काम+आर्ताः । इति+औत्सुक्यम् ।

९ कमपि विषयमवलम्ब्य दशाधिकैर्वाक्यैरेकमनुच्छेदं रचयत ।

१०. अधोलिखितपदानां वर्गं निर्धारयत–

घृष्टम् । चन्दनम् । चारुगन्धम् । छिन्नम् । पुनः । इक्षुदण्डम् । स्वादु । च। एव । दग्धम् । काञ्चनम् । कान्तवर्णम् । उत्तमा । जायते । न । मूकः । प्रवचनपटुः। वातुलः । सहते । प्रायशः । जल्पकः । परमगहनः पटुकरणैः । गुह्यकः । तम् । ययाचे । प्रापणीयाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशः पाठः

शिखरिणीवृत्तम्

रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।।१।।

× × × × × × × ×

यदा किञ्चिद्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित् किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ।।

३०.१.१ **यमनसभलाः** = यगणमगणनगणसगणभगणैः एकेन लघुवर्णेन च युता (यगण, मगण, नगण, सगण, भगण र एउटा लघु वर्ण भएको) **गः** = एकेन गुरुवर्णेन युता (एउटा गुरुवर्ण भएको) **रसैः** = षड्भिरक्षरैः (छैठौं अक्षर तथा) **रुद्रैः** = एकादशभिरक्षरैः (एघारौं अक्षरले) **छिन्ना** = यतियुता (यति भएको) **शिखरिणी** = तदाख्यछन्दः (शिखरिणी छन्द हुन्छ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले यगण, मगण, नगण, सगण, भगण र एउटा लघु वर्ण र एउटा गुरुवर्ण आउँछन्, अनि छैठौं र त्यसपछि एघारौं अक्षरमा विश्राम हुन्छ त्यसलाई शिखरिणी छन्द भन्दछन्)।

३०.१.२ **यदा** = यस्मिन् काले (जुन समयमा) **अहम्** (म) **किञ्चिज्ज्ञः** = अल्पज्ञः (अलिअलि जान्दथें) **तदा** = तस्मिन् काले (त्यसवेला) **द्विप इव** = गज इव (हात्ती झैं) **मदान्धः** = विवेकशून्यः (विवेकरहित) **समभवम्** = जतोऽस्मि (बनेको थिएँ) **सर्वज्ञः**= सकलज्ञानसम्पन्नः अस्मि (सम्पूर्ण कुरा जान्दछु भनेर) **मम** = मे (मेरो) **मनः** = मानसम् (मन) **अवलिप्तम्** = गर्वितम् (घमण्डमा डुबेको) **अभवत्** = अजायत (भयो) **यदा** = यस्मिन् काले (जुन वेला) **बुधजनसकाशात्** = विद्वज्जनसमागमात् (विद्वान्को सम्पर्कबाट) **किञ्चित् किञ्चित्** = ईषदीषत् (अलिअलि) **अवगतम्** = ज्ञातम् (थाहा पाएँ) **तदा** = तस्मिन् समये (त्यस वेला) **मूर्खः** = जडबुद्धिरस्मि इति (मूर्ख रहेछु भनेर) **मे** = मम (मेरो) **मदः** = गर्वः (घमण्ड) **ज्वर इव** = शरीरताप इव (ज्वरो जस्तै) **व्यपगतः** = निर्गतः (हट्यो) ।

३०.२ **विग्रहः** - **मदान्धः** - मदेन अन्धः (तृ.त.) । **सर्वज्ञः** - सर्वं जानातीति (उप.प.) । **बुधजनसकाशात्** - बुधाश्च ते जनाः (कर्मधा.) तेषां सकाशात् (ष.त.) । **द्विपः** - द्वाभ्यां पिबतीति (उप.प.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यं सस्वरं पठत ।

२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. को मदान्धः सञ्जातः ?

२. मदान्धत्वस्य कारणं किम् ?

३. मनः केनावलिप्तमभवत् ?

४. बुधजनात् किमवगतम् ?

५. मदः क इव व्यपगतः ?

३ अस्मिन् पद्ये कस्य छन्दसः प्रयोगो विद्यते, किञ्च तस्य लक्षणम् ?

४ निर्धारितपद्यस्यान्वयं विलिख्य पर्यायशब्दान् प्रदर्शयत ।

५ सविग्रहं समासनामानि लिखत ।

मदान्धः । सर्वज्ञः । बुधजनसकाशात् । द्विपः ।

६ सन्धिं कुरुत ।

ज्ञस्+अहम् । द्विपस्+इव । अभवत्+अवलिप्तम् । मदस्+मे । सकाशात्+अवगतम्।

७ निर्धारितपद्यस्य सरलार्थं लिखत ।

८ शिखरिणीवृत्तस्य लक्षणं विलिख्योदाहरणे संगमयत ।

९ शिखरिणीवृत्तस्य पद्यपत्रयमन्विष्य लिखत ।

१० दशाधिकैर्वाक्यैः शरदो वैशिष्ट्यं वर्णयत ।

११. अधोलिखितपदानां वर्गं निर्धारयत-

यदा । अहम् । द्विपः । मदान्धः । इव । समभवम् । तदा । सर्वज्ञः । अस्मि। इति। मम । मनः । अवलिप्तम् । अभवत् । किञ्चिद् । बुधजनः । मूर्खः । ज्वरः । मे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकत्रिंशः पाठः

शार्दूलविक्रीडितवृत्तम्

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।।१।।

× × × × × × × × ×

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।।२।।

३१.१.१ सगुरवः = गुरुवर्णसहिताः (एउटा गुरुवर्णले सहित भएका) **मसजस्तताः**= मगणसगणजगणसगणतगणतगणाः (मगण, सगण, जगण, सगण, तगण र तगण) **सूर्याश्वैः** = द्वादशभिस्तदनु अष्टभिरक्षरैः (बाह्र त्यसपछि आठ अक्षरमा विश्राम हुँदा) **शार्दूलविक्रीडितम्** = तदाख्यं छन्दः (शार्दूलविक्रीडित नामक छन्द हुन्छ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले मगण, सगण, जगण, सगण, तगण, तगण र एउटा गुरुवर्ण आउँछन्, बाह्रौं अक्षर र त्यसपछि आठौं अक्षरमा विश्राम हुन्छ भने त्यसलाई शार्दूलविक्रीडित छन्द भनिन्छ)।

३१.१.२ हुतभुक् = अग्निः (आगो) **जलेन** = सलिलेन (पानीद्वारा) **वारयितुम्**= निवारयितुम् (हटाउन, निभाउन) **शक्यः** = योग्यः (सकिन्छ) **सूर्यातपः** = अर्कातपः (सूर्यको तातो) **छत्रेण** = आतपत्रेण (छाताद्वारा) **वारयितुं शक्यः** (हटाउन सकिन्छ) **समदः** = उन्मत्तः (उन्मत्त भएको) **नागेन्द्रः** = गजराजः (हात्ती) **निशितांकुशेन** = तीक्ष्णांकुशेन (तीखो अंकुशेले) **वारयितुं शक्यः** (तह लगाउन सकिन्छ) **गोगर्दभौ** = वृषभरासभौ (गोरु र गधा) **दण्डेन**= लगुडेन (लौराले) **वारयितुं शक्यः** (धपाउन सकिन्छ) **व्याधिः** = ज्वरादिरोगः (रोगलाई) **भेषजसङ्ग्रहैः** = औषधसंग्रहणैः (औषधिको संग्रहद्वारा) **वारयितुं शक्यः** (हटाउन सकिन्छ, विसेक पार्न सकिन्छ) **विषम्** = गरलम् (विषलाई) **विविधैः**= नानाविधैः (अनेकथरिका) **मन्त्रप्रयोगैः**= विषनाशकमन्त्रैः(विष नाश गर्ने मन्त्रद्वारा) **वारयितुं शक्यः** (हटाउन सकिन्छ) **एवम्** (यसरी) **सर्वस्य** = पदार्थस्य (सबै विषयको) **औषधम्**= भेषजम् (औषधि) **शास्त्रविहितम्** = शास्त्रोपदिष्टम्, **अस्ति** (श.र. .. बयान गरिएको छ) **मूर्खस्य** = मूढस्य (मूर्खको) **औषधम्** = भेषजम् (औषधि) **नास्ति** = न विद्यते (छैन अर्थात् विभिन्न साधनको प्रयोगद्वारा हरेक विषयको औषधि गर्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ।।३।।

विधि शास्त्रमा उल्लेख भएको छ तर मूर्खको मूर्ख्याइँ हटाउने विधि कुनै शास्त्रमा पनि वर्णन गरेको पाइँदैन) ।

३१.१.३ **विद्या नाम** (विद्या भनेको) **नरस्य** = मनुष्यस्य (मानिसको) **अधिकम्**= भूयिष्ठम् (ठूलो) **रूपम्** = आकारविशेषः (रूप हो) **तथा** (त्यस्तै) **प्रछन्नगुप्तम्** = गूढतया रक्षितम् (लुकाएर रक्षा गरिएको) **धनम्** = द्रव्यम् (धन हो) **विद्या** (विद्या) **भोगकरी** = भोगदात्री (भोग दिने वस्तु हो) **यशःसुखकरी** = कीर्तिप्रमोददायिनी (कीर्ति र आनन्द दिने वस्तु हो) **विद्या** (विद्या) **गुरूणाम्** = महताम् अपि (ठूलाको पनि) **गुरुः**= महती (ठूलो हो) **विदेशगमने** = प्रवासे (विदेशमा रहँदा) **बन्धुजनः** = बान्धवः (दाजुभाइ हो) **परादेवता** = उत्कृष्टदेवता (ठूलो देवता हो) विद्या (विद्या अर्थात् विद्या भएको व्यक्ति) **राजसु** = नृपाणां मध्ये (राजाहरूको बीचमा अर्थात् राजसभामा) **पूज्यते**= पुरस्क्रियते(पुरस्कृत हुन्छ अर्थात् विद्वान्को राजसभामा पनि सम्मान हुन्छ) **धनम्** = द्रव्यन्तु (धन त) **न** = न पूज्यते (पुजिदैन) **अतः** (यसैले) **विद्याविहीनः** = विद्यारहितः (विद्या नभएको मानिस) **पशुः** = पशुतुल्यो भवति (कर्तव्य र अकर्तव्य आदिको विवेक गर्न नसक्ने हुँदा पशुजस्तै हुन्छ) ।

३१.१.४ **देहिनाम्** = प्राणिनाम् (प्राणीहरूका निमित्त) **क्षान्तिश्चेत्** = क्षमा चेत् (यदि सहनशीलता छ भने) **कवचेन** = वर्मणा (कवचले) **किम्** = किं फलम् (के हुन्छ अर्थात् शत्रुको प्रहारलाई वास्ता नगर्ने सहनशील पुरुषको शरीरलाई रक्षा गर्न कवचको कुनै आवश्यकता पर्दैन) **क्रोधः** = कोपः (रिस) **अस्ति** = वर्तते चेत् (छ भने) **अरिभिः**= शत्रुभिः (शत्रुहरूले) **किम्** = किं प्रयोजनम् (के हुन्छ अर्थात् सम्पूर्ण अनर्थकारी रिस शरीरभित्र छ भने त्यसभन्दा बढी शत्रुले के अनर्थ गर्न सक्छन्) **ज्ञातिश्चेत्** = दायादश्चेत् (अंशवण्डा लगाउने दाजुभाइ छन् भने) **अनलेन** = पावकेन (आगोले) **किम्** = किं प्रयोजनम् (के हुन्छ अर्थात् अंशियार दाजुभाइले जति पीडा दिन्छन् त्यस किसिमको पीडा आगाले पनि दिंदैन) **यदि** = चेत् (यदि) **सुहृद्** = मित्रम् (असल मीत छ भने) **दिव्यौषधैः**= अतिशयगुणशालिभिः भेषजैः (उत्कृष्ट औषधिले) **किम्** = किम् फलम् (के हुन्छ अर्थात् हितकारक मित्र भएपछि हित प्राप्तिका निमित्त औषधिको सेवन गर्नुपर्ने आवश्यकता नै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षान्तिश्चेत् कवचेन किं किमरिभिः क्रोधोऽस्ति चेद् देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि
व्रीडा चेत् किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ।।४।।

हुँदैन) ।

३१.१.४ यदि= चेत् (यदि) **दुर्जनाः** = खलाःसन्ति (दुर्जनहरू छन् भने) **सर्पैः**= भुजङ्गमैः (सर्पले) **किम्** = किं प्रयोजनम् (के हुन्छ अर्थात् दुर्जन सर्पभन्दा पनि डरलाग्दा हुन्छन्) **यदि** = चेत् (यदि) **अनवद्या** = निर्दोषा (दोष नभएको) **विद्या** = ज्ञानम् (विद्या छ भने) **धनैः** = वित्तैः (सम्पत्तिले) **किमु** = किं प्रयोजनम् (के हुन्छ अर्थात् सम्पूर्ण सम्पत्ति विद्याबाट नै प्राप्त हुन्छ भने धनको के आवश्यकता) **व्रीडा** = लज्जा चेत् (यदि लाज छ भने) **भूषणैः** = अलङ्कारैः (गहनाले) **किम्** = किं प्रयोजनम् (के हुन्छ अर्थात् लज्जा गहनाभन्दा पनि महत्त्वपूर्ण हुन्छ) **यदि** = चेत् (यदि) **सुकविता** = सुन्दरं कवित्वम् (असल कविता) **अस्ति** = विद्यते (छ भने) **राज्येन** = आधिपत्येन (राज्यले) **किम्** = किं प्रयोजनम् (के हुन्छ अर्थात् असल कविताले दिन सक्ने आनन्द राज्य प्राप्तिबाट पनि उपलब्ध हुँदैन) ।

३१.२ विग्रहः - सूर्यातपः - सूर्यस्य आतपः (ष.त.) । **नागेन्द्रः** - नागानां इन्द्रः (ष.त.) । **निशिताङ्कुशेन** - निशितश्चासौ अङ्कुशः (कर्मधा.) तेन । **गोगर्दभौ** - गौश्च गर्दभश्च (द्वन्द्व.) तौ । **समदः** - मदेन सहितः (तृ.त.) । **भेषजसंग्रहैः** - भेषजानां संग्रहाः (ष.त.) तैः । **मन्त्रप्रयोगैः** - मन्त्राणां प्रयोगाः (ष.त.) तैः । **शास्त्रविहितम्** - शास्त्रेषु विहितम् (स.त.) । **प्रच्छुन्नगुप्तम्** - प्रच्छन्नञ्च तद् गुप्तम् (कर्मधा.) । **भोगकारी** - भोगं कारयतीति (उप.प.)। **यशःसुखकरी** - यशश्च सुखञ्च (द्वन्द्व.) ते करोतीति (उप.प.)। **बन्धुजनः** - बन्धुश्चासौ जनः (कर्मधा.) । **विद्याविहीनः** - विद्यया विहीनः (तृ.त.) ।

३१.३. प्रकृतिप्रत्ययविच्छेदः - शक्यः - शक् + यत् । **वारयितुम्** - वृ - णिच् + तुमुन् । **गुप्तम्** - गुप् + क्त। **क्षान्तिः** - क्षाम् + क्तिन् । **ज्ञातिः** - ज्ञा + क्तिन् । **सुकविता** - सु - कवि + तल् । **देही**- देह + इनि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ उपरितनपद्यानि सस्वरं पठत ।

१ निम्नप्रश्नानामुत्तराणि लिखत ।

१. हुतभुक् केन वारयितुं शाक्यते ?

२. सूर्यातपः नागेन्द्रश्च काभ्यां वार्येते ?

३. कास्यौषधं शास्त्रेषु वर्णितं नास्ति ?

४. विद्यायाः किं वैशिष्ट्यं वर्तते ?

५. कथंभूतो नरः पशुतुल्यो भवति ?

३ उक्तपद्यानि कस्मिन् छन्दसि रचितानि सन्ति ? किञ्च तस्य लक्षणम्? कुत्र कुत्र च विश्रामः ? स्फुटं प्रकाशयत ।

४ विग्रहान् प्रदर्श्य समासामनि लिखत ।

सूर्यातपः । नागेन्द्रः । निशिताङ्कुशेन । गोगर्दभौ । समदः । भेषजसंग्रहैः। मन्त्रप्रयोगैः । शास्त्रविहितं । प्रच्छुन्नगुप्तम् । भोगकरी । यशःसुखकरी । बन्धुजनः। विद्याविहीनः ।

५ निर्धारितपद्यानामन्वयं प्रदर्श्य पर्यायशब्दान् लिखत ।

६ वाक्यविश्लेषणं कुरुत ।

विद्या नरस्य रूपं प्रच्छन्नगुप्तं धनं गुरूणामपि गुरुः विदेशगमने बन्धुः यशोदा सुखदा राजपूज्या च वर्तते ।

७ उक्तपद्यानां सरलार्थं लिखत ।

८ शार्दूलविक्रीडितच्छन्दसो लक्षणं सोदाहरणं प्रकाशयत ।

९. निम्नपदानां वर्गं निर्दिशत–

जलम् । हुतभुक् । छत्रम् । सूर्यातपः । दण्डः । विद्या । यशःसुखकरी । धनम् । विद्याविहीनः । गुरुः । सर्पः । अस्ति । किमु । यदि । किम् । चेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वात्रिंशः पाठः

स्रग्धरावृत्तम्

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।।१।।

× × × × × × × × × ×

सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां
लज्जां तावद् विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिवाणाः पतन्ति ।।२।।

३२.१.१ म्रभ्नैः = मगणरगणभगणनगणैः (मगण, रगण, भगण र नगण तथा) **यानां त्रयेण** = त्रिसंख्येन यगणेन (तीनवटा यगणले) **युक्ता** (युक्त) **त्रिमुनियतियुता**= सप्तभिः, सप्तभिः सप्तभिश्चाक्षरैः (सातौं त्यसपछि सातौं अनि सातौं अक्षरले) **यतियुता**= विश्रामयुक्ता (यति भएको) **इयम्** = एषा (यो छन्द) **स्रग्धरा** (स्रग्धरा मानिन्छ अर्थात् जुन श्लोकको प्रत्येक पाउमा क्रमैले मगण, रगण, भगण, नगण, तीनवटा यगण आउँछन् र प्रत्येक सातौं अक्षरमा विश्राम हुन्छ भने त्यसलाई स्रग्धरा छन्द भनिन्छ) ।

३२.१.२ यावत् = यावत् कालपर्यन्तम् (जहाँसम्म) **भ्रूचापाकृष्टमुक्ताः** = भ्रूकुटिरूपचापाकृष्टत्यक्ता (आखिभौं रूपी ताँदोबाट खिचिएर छोडिएका) **श्रवणपथगता**= कर्णरन्ध्रप्रविष्टाः (कानको बाटो गरेर पसेका) **नीलपक्ष्माणः** = कृष्णवर्णपक्षयुक्ताः (कालो (रौं) प्वाँख भएका) **धृतिमुषः** = धैर्यनाशकाः (धैर्यलाई नाश गर्ने) **एते** = इमे (यी) **लीलावतीनाम्**= स्त्रीणाम् (स्त्री जातिहरूका) **दृष्टिवाणाः** = वीक्षणशराः (दृष्टिरूपी वाणहरू) **न पतन्ति** (पर्दैनन्) **तावत्** = तत्कालपर्यन्तम् (त्यहाँसम्म) **पुरुषः** = जनः (मानिस) **सन्मार्गे** = सद्वर्त्मनि (असल बाटोमा) **आस्ते** = विद्यते (रहन्छ) **तावदेव** (त्यहाँसम्म मात्रै) **इन्द्रियाणाम्** = विषयाणाम् (इन्द्रियहरूको) **प्रभवति** = वशीकर्तुं समर्थः (वश गर्न समर्थ हुन्छ) **तावदेव** (त्यहाँसम्म मात्रै) **लज्जाम्** = त्रपाम् (लाज) **विधत्ते** = धारयति (धारण गर्छ) **तावदेव** (त्यहाँसम्म मात्रै) **विनयम्** = नम्रताम् (नम्र भावलाई) **समालम्बते**= आश्रयति (ग्रहण गर्छ अर्थात् स्त्री जातिको नजर परेपछि मानिसले असल आचरण, इन्द्रियलाई वश गर्ने काम, लज्जा, नम्रता आदि सबै कुरा त्यागिदिन्छ) ।

३२.२ विग्रहः - भ्रूचापाकृष्टमुक्ताः - भ्रुवौ एव चापः (रूपक.) तेन आकृष्टा (तृ.त.) ते च ते मुक्ताः (कर्मधा.) । **श्रवणपथगताः** - श्रवणौ एव पन्थानौ (रूपक.) तेभ्यः गताः (प.त.) । **निलक्ष्माणः** - निलाः पक्ष्माणः येषान्ते (बहु.) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

१ **उपरितनपद्यं सस्वरं पठत ।**

२ **निम्नप्रश्नानामुत्तराणि लिखत ।**

१. पुरुषः सन्मार्गे कियत्समयमास्ते ?

२. लीलावतीनां दृष्टिवाणेषु पतत्सु पुरुषस्य का दशा जायते ?

३. इदं पद्यं कस्मिन् छन्दसि रचितं विद्यते ? किञ्च तस्य लक्षणम् ?

४. कुत्र कुत्र चात्र विश्रामः ?

३ **उक्तपद्यान्तर्गतपदानामन्वयं प्रदर्श्य पर्यायशब्दान् लिखत ।**

४ **उक्तपद्यस्य सरलार्थं लिखत ।**

५ **सविग्रहं समासनामानि लिखत ।**

भ्रूचापाकृष्टमुक्ताः । श्रवणपथगताः । निलपक्ष्माणः । लीलावतीनाम् । धृतिमुषः। दृष्टिवाणाः ।

६ **कमप्येकं विषयमवलम्ब्य स्वल्पमनुच्छेदं रचयत ।**

७ **पञ्चदशाधिकैर्वाक्यैर्हेमन्तस्य शिशिरस्य वा शोभां वर्णयत ।**

८ **वाक्येषु प्रयोगं कुरुत ।**

आस्ते । समालम्बते । विद्यते । प्रभवति । पतन्ति । हृदि । यावत् । तावद्। मुक्ताः । कीर्तिता ।

९ **प्रकृतिप्रत्ययविच्छेदं कुरुत ।**

कीर्तिता । मुक्ताः । श्रवणम् । आकृष्टाः । लीलावती । धृतिः । दृष्टिः । विनयः ।

१० **स्रग्धराछन्दसि रचितं पद्यत्रयमन्विष्य लिखत ।**

११. **अधोलिखितपदानां वर्गं निर्धारयत-**

मार्गः। तावत् । आस्ते । प्रभवति । पुरुषः । लज्जा । मुक्ताः । विधत्ते । हृत्। दृष्टिः। एते । धृतिमुषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेन्द्र-संस्कृत-विश्वविद्यालयका महत्त्वपूर्ण प्रकाशनहरू

	पुस्तक	लेखक/सम्पादक/अनुवादक/टीकाकार/टिप्पणीकार	मूल्य
१.	स्कन्दपुराणस्य अम्बिकाखण्डः	सं. कृष्णप्रसाद भट्टराई	१२५/-
२.	कालचक्रान्तर्गतो ज्योतिषभागः	सं. प्रा. श्रीनयराज पन्त आदि	५०/-
३.	रामराज्यम्	ले. पूर्णप्रसाद ब्राह्मण	२५/-
४.	षड्दर्शनीसङ्ग्रहः	ले. जापराज, सं. डा. दीर्घराज घिमिरे	३०/-
५.	जनकदर्शनम्	ले. डा. स्वामी रामानन्दगिरि	११५/-
६.	श्रीकृष्णश्रीरामचरितादर्शः	ले. पूर्णप्रसाद ब्राह्मण	३५/-
७.	श्रीकृष्णचरितामृतम्	ले. पं. दधिराम मरासिनि	२०/-
८.	स्तवमाला	ले.पं. दधिराम मरासिनि	३०/-
९.	पदार्थीयदिव्यचक्षुः	ले. सुमति उमापति, सं. प्रा. श्रीरामेश्वर शर्मा	४५/-
१०.	हरिकेलिमहाकाव्यम्	ले. वंशमणि, सं. डा. वेणीमाधव ढकाल	२००/-
११.	श्रीस्वर्गद्वारी-महाप्रभुचरित्र	ले. श्री दुर्गादत्त पौड्याल	४५/-
१२.	संस्कृतविद्वत्सम्मेलनसंस्मरणग्रन्थः	सं. प्रा. श्रीशिवहरि मरहट्टा आदि	२४०/-
१३.	संस्कृतशिक्षणाभ्यासः (प्रथमभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	५२/-
१४.	संस्कृतशिक्षणाभ्यासः (द्वितीयभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	५०/-
१५.	आशौच-विवेचन	ले. प्रा. डा. रामचन्द्र गौतम	७५/-
१६.	मधुरिमा (संस्कृतकवितासङ्ग्रहः)	सं. सहप्रा. श्रीभागवत शर्मा आदि	२५/-
१७.	गण्डकीगौरवम्	ले. उमानाथ पन्थी, सं. डा. वेणीमाधव ढकाल आदि	३०/-
१८.	श्रीरामचरितामृतम्	ले. दधिराम मरासिनि, सं.डा.वेणीमाधव ढकाल आदि	५०/-
१९.	साहित्यप्रवेशिका	ले. प्रा. श्रीतीर्थराज सुवेदी आदि	५०/-
२०.	व्याकरणप्रवेशिका	ले. प्रा. श्रीस्थानेश्वर गौतम आदि	१००/-
२१.	श्री ५ वीरेन्द्र ग.आ.र.म. स्मारिका	सं. प्रा. श्रीस्थानेश्वर गौतम आदि	१००/-
२२.	कर्मकाण्डभास्करः	ले. दधिराम मरासिनि,सं.डा. वेणीमाधव ढकाल आदि	२१५/-
२३.	संस्कृत-नेपालीशब्दकोशः	ले. कुलचन्द्र गौतम, सं.डा. वेणीमाधव ढकाल आदि	२६५/-
२४.	तन्त्रचिन्तामणिः (पूर्वभागः)	ले. नवमी सिंह, सं. प्रा.श्रीविद्यानाथ उपाध्याय	२९०/-
२५.	नेपाली कविता र ध्वनि सिद्धान्त	ले. प्रा. अम्बिकाप्रसाद अधिकारी	४०/-
२६.	स्थानीय जडिबुटीद्वारा स्वास्थ्य रक्षा	ले. डा. श्याममणि अधिकारी	१२५/-
२७.	गोरखादरबार क्षेत्रको सांस्कृतिकपक्ष	ले. लोकप्रसाद शर्मा भट्टराई	२८५/-
२८.	ब्रह्मसूत्रशाङ्करभाष्यम्- समन्वयाध्यायः नेपालीभाषानुवादसहितः	भाष्यकार-शङ्कराचार्य, अनुवादक पं. मीन-प्रसाद नेपाल, सं.डा. वेणीमाधव ढकाल आदि	४१५/-
२९.	हरिकेलिनवनीतम्, मञ्जुबोधिनीटीका-विलसितम्	ले. वंशमणिशर्मा टीकाकार- डा. वेणीमाधव ढकाल	६८/-
३०.	गण्डकीमाहात्म्यम्	अनुवादक- डा. टीकाराम अधिकारी	९५/-
३१.	संस्कृतरचनाप्रकाशः - १	ले. प्रा. श्री नीलमणि ढुङ्गाना आदि	८६/-
३२.	संस्कृतरचनाप्रकाशः - २	ले. प्रा. श्री नीलमणि ढुङ्गाना	५८/-
३३.	संस्कृतरचनाप्रकाशः - ३	ले. प्रा. श्री नीलमणि ढुङ्गाना	४२/-
३४.	सुन्दरचरितनाटकम्, यशोदाभिधया संस्कृतटीकयाऽलङ्कृतम्	ले. छविलाल सूरि टीकाकार- प्रा. नीलमणि ढुङ्गाना	९५/-
३५.	नेपालभारतसम्बन्धसंस्कृतविद्वद्गोष्ठी स्मारिका	सं. प्रा. श्री तीर्थराजसुवेदी आदि	१५५/-
३६.	अन्त्यकर्मपद्धतिः (नेपालीभाषाटिप्पणीसहिता)	ले. पं. दधिराममरासिनि, टिप्पणीकार - श्रीऋषिरामशर्मा घिमिरे	
३७.	पं कुलचन्द्र गौतम र उनको साहित्य साधना	ले. डा. टीकाराम अधिकारी	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu